पाठ्यक्रमविकासकेन्द्रम्

# न्यायदर्शनम्

कक्षा १०

# न्यायदर्शनम्

कक्षा १०

नेपालसर्वकारः
शिक्षाखेलकुदमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाखेलकुदमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८३

अस्य पाठ्यपुस्तकस्य विषये रचनात्मकपरामर्शदानार्थमन्तर्जालपुटसङ्केतः
coordination@moecdc.gov.np

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽद्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणंविधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति ।शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्त्यौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य न्यायदर्शनविषयकपाठ्यक्रमस्याधारेण दशम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं प्रा. पद्मप्रसादः भट्टराई, सहप्रा. डा. रमा भट्टराई, उपप्रा. माधवः घिमिरे, उपप्रा. लक्ष्मण आचार्य-प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः युवराजः पौडेल, प्रा.डा. माधवशरण उपाध्यायः, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, निश्चलः अधिकारी, शिवराजः लामिछाने, पुरुषोत्तमः घिमिरे, राजुः श्रेष्ठ, विनोदराजः भट्ट-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य टङ्कणं रूपसज्जा च भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

**पाठ्यक्रमविकासकेन्द्रम्**

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| न्यायसिद्धान्तमुक्तावलीग्रन्थग्रन्थकारयोः परिचयः | | १ |
| प्रथमः पाठः | न्यायवैशेषिकशास्त्रे प्रथितानां कतिपयेषां पारिभाषिकशब्दानां ज्ञानम् | २ |
| द्वितीयः पाठः | मङ्गलाचरणम् | १४ |
| तृतीयः पाठः | द्रव्यादिपदार्थविभागः | २६ |
| चतुर्थः पाठः | गुणकर्मविभागप्रकरणम् | ३५ |
| पञ्चमः पाठः | अभावपदार्थनिरूपणम् | ४४ |
| षष्ठः पाठः | साधर्म्यवैधर्म्यप्रकरणम् | ४९ |
| सप्तमः पाठः | कारणनिरूपणप्रकरणम् | ५६ |
| अष्टमः पाठः | द्रव्यगुणकर्मादीनां साधर्म्यवैधर्म्यनिरूपणम् | ६३ |
| नवमः पाठः | द्रव्येषु गुणस्थितिनिदर्शनम् | ७२ |
| दशमः पाठः | पृथिवीनिरूपणम् | ७५ |
| एकादशः पाठः | अवयविनिरूपणम् | ८३ |
| द्वादशः पाठः | जलनिरूपणम् | ९३ |
| त्रयोदशः पाठः | तेजोनिरूपणम् | १०१ |
| चतुर्दशः पाठः | वायुनिरूपणम् | १०८ |
| पञ्चदशः पाठः | आकाशनिरूपणम् | ११४ |
| षोडशः पाठः | कालनिरूपणम् | ११९ |
| सप्तदशः पाठः | दिङ्निरूपणम् | १२४ |
| अष्टादशः पाठः | अत्मनिरूपणम् | १२८ |
| ऊनविंशः पाठः | आत्मविषयकमतान्तरनिरसनम् | १३५ |
| विंशः पाठः | बुद्धिस्वरूपनिरूपणम् | १५१ |
| एकविंशः पाठः | प्रत्यक्षानुभवभेदनिरूपणम् | १५९ |
| द्वाविंशः पाठः | त्वगिन्द्रियादिविषयव्यवस्थापनम् | १६५ |
| त्रयोविंशः पाठः | निर्विकल्पकस्वरूपनिरूपणम् | १७४ |
| चतुर्विंशः पाठः | लौकिकसन्निकर्षनिरूपणम् | १८३ |
| पञ्चविंशः पाठः | अलौकिकसन्निकर्षनिरूपणम् | १९२ |
| परिशिष्टम् | | १९९ |

# न्यायसिद्धान्तमुक्तावलीग्रन्थग्रन्थकारयोः परिचयः

मुक्तावलीग्रन्थस्य रचयिता विश्वनाथपञ्चाननभट्टाचार्यो वर्तते। अयं नैयायिको बङ्गदेशीयः पण्डित आसीत्। अस्य कालः १५५६ शकसंवत्सर उच्यते। अनेन न्यायपरम्परायां न्यायसूत्रोपरि वृत्तिर्लिखिता आसीत् सा चेदानीं 'विश्वनाथवृत्तिः' इति नाम्ना प्रसिद्धा वर्तते। नव्यन्यायशास्त्रस्य परम्परायां संस्थितेनानेन विदुषा उत्तरकाले छात्राणामुपकाराय वैशेषिकशास्त्रोक्तान् सप्तपदार्थान् न्यायशास्त्रोक्तानि चत्वारि प्रमाणानि चादाय एकः स्वतन्त्रो भाषापरिच्छेदनामकः प्रकरणग्रन्थो विरचितः। कारिकाणां समूहरूपत्वेन कारिकावली नाम्ना च स ग्रन्थः परिचितो वर्तते। तत्र १६८ सङ्ख्याकाः कारिकाः सन्ति। ग्रन्थोऽयं प्रत्यक्षानुमानोपमानशब्दस्मृतिमनोगुणादिभेदेन सप्तसु प्रकरणेषु विभक्तो वर्तते। अनेन स्वशिष्यस्य राजीवस्यानुरोधेनोत्तरकाले तासां कारिकाणां स्वेनैव व्याख्यानं कृतम्। तदेव व्याख्यानमिदानीं 'न्यायसिद्धान्तमुक्तावली' इति नाम्ना प्रसिद्धमस्ति। मुक्तावल्यां स स्वयमेव लिखति-

**निजनिर्मितकारिकावलीमतिसङ्क्षिप्तचिरन्तनोक्तिभिः।**

**विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः॥**

अयंग्रन्थो न्यायशास्त्राध्येतॄणां कृतेऽत्यन्तमुत्कृष्टो व्युत्पादकश्च वर्तते। अत्यन्तं सरलया भाषया न्यायवैशेषिकोक्तशैल्या चानेनास्मिन् ग्रन्थे विषयाः प्रतिपादिताः सन्ति। इदानीं प्रायेण सर्वेष्वपि संस्कृतविश्वविद्यालयेषु महाविद्यालयेषु च न्यायशास्त्रस्य पाठ्यक्रमे प्रथमावस्थायामयमेव ग्रन्थो न्यायदर्शनाध्येतॄणां व्याकरणशास्त्राध्येतॄणां च कृते पाठ्यग्रन्थत्वेन स्वीकृतोऽस्ति। अधुनायं ग्रन्थो बह्वीषु भाषासु प्रकाशितो वर्तते। अस्योपरि बह्व्यः टीकाश्च बहुभिर्विद्वद्भी रचिताः सन्ति। तासु दिनकरी, किरणावली इत्यादयः प्रसिद्धाः सन्ति। भट्टाचार्यवंशे जातोऽप्यसौ सर्वविद्यासु निष्णातत्वात् 'पञ्चाननः' इत्युपाधिना विभूषित आसीत्।

प्रथमः पाठः


# न्यायवैशेषिकशास्त्रे प्रथितानां कतिपयेषां पारिभाषिकशब्दानां ज्ञानम्

न्यायदर्शनस्य पारिभाषिकशब्दानां ज्ञानं विना न्यायशास्त्रे प्रवेशः क्लेशकरो भवति । न्यायदर्शनं स्वीकृत्य अधीयानानां छात्राणां पाठ्यग्रन्थत्वेन न्यायसिद्धान्तमुक्तावलीग्रन्थस्य निर्धारणादुक्तग्रन्थे प्रसिद्धानां कतिपयपारिभाषिकशब्दानां परिचयोऽत्र प्रस्तूयते-

## निरूपकत्वम्


यो ज्ञापको भवति स एव निरूपक उच्यते । यथा घटाभाव इत्यत्र अभावो घटनिष्ठप्रतियोगिताया निरूपको भवति । यस्य अभाव उच्यते स प्रतियोगी भवति इति नियमाद् अत्र घटाभावस्य प्रतियोगी घटो जातः । प्रतियोगिता च घटनिष्ठा जाता । घटनिष्ठप्रतियोगिताया निरूपकश्च अभावोऽस्ति अत्र, यतो हि अभावस्य कारणेन एव घटे प्रतियोगिताधर्मः समागतो वर्तते इति घटवृत्ति(निष्ठ)प्रतियोगिताया ज्ञापको जातोऽभावः, अतो 'घटाभावः' इति वाक्याद् 'घटनिष्ठप्रतियोगितानिरूपकोऽभावः' इति बोधो जायते । रेखाचित्रमाध्यमेन विज्ञायताम् –

### घटनिष्ठप्रतियोगितानिरूपकोऽभावः






एवं 'घटवद् भूतलम्' इत्यत्र भूतलघटयोराधाराधेयभावस्य प्रतीतेरुक्तवाक्याद् घटनिष्ठाधेयतानिरूपकं भूतलमिति बोधो जायते । अत्र घटस्याधेयत्वेन भूतलस्य चाधारत्वेन घटनिष्ठाधेयताया निरूपकं भूतलं (धर्मी) भवति । भूतलरूपाधिकरणस्य धर्मिणः सत्त्वादेव घटे आधेयताधर्मोऽस्ति अर्थाद् घटनिष्ठाधेयताया भूतलसापेक्षितत्वेन घटनिष्ठाधेयताया निरूपकं/ ज्ञापकं जातं भूतलम् । तेनोक्तवाक्याद् 'घटनिष्ठाधेयतानिरूपकं भूतलम्' इति बोधो जायते । वैपरीत्येन बोधे तु 'भूतलनिष्ठाधिकरणतानिरूपको घटः' इति बोधो भवति । रेखाचित्रमाध्यमेन विज्ञायताम्–

## घटनिष्ठाधेयतानिरूपकं भूतलम्





यद् ज्ञाप्यं भवति तदेव निरूपितमुच्यते। निरूपितं च धर्म एव भवति न तु धर्मी। यथा 'घटाभाव' इत्यत्र घटनिष्ठा या प्रतियोगिता सा अभावेन निरूपिता/ज्ञाप्या अस्ति इति तत्र ज्ञाप्यता आगता। एवं 'घटवद् भूतलम्' इत्यत्र घटे विद्यमाना आधेयता भूतलेन निरूपिता जाता इति 'भूतलनिरूपिताधेयताश्रयो घटः' इत्युक्तवाक्याद् बोधो जायते।




## अधिकरणत्वम्

आश्रयता, आधारता इत्येतौ द्वावपि अधिकरणताया एव पर्यायवाचिनौ शब्दौ स्तः। यो यस्य आधारो भवति तत् तस्याधिकरणमुच्यते। 'आधारोऽधिकरणम् (पा.सू. १/४/४५)' इति हि भगवान् पाणिनिराह। अधिकरणवृत्तिधर्मश्च अधिकरणत्वम्, तच्च आधेयतानिरूपितं भवति। 'तस्य भावस्त्वतलौ (पा.सू. ५/१/११९)' इति सूत्रेण त्वप्रत्ययविधाने अधिकरणत्वम्, तल्प्रत्ययविधाने च अधिकरणता इति रूपद्वयं निष्पद्यते। उभयोरेक एवार्थः। तच्च अधिकरणत्वं सकलेषु अधिकरणेषु वर्तते इति अधिकरणस्य साधारणो धर्मोऽधिकरणत्वं भवति। कस्मिँश्चिद् अपि वस्तुनि एकः साधारणो धर्मः, अपरश्च असाधारणो धर्मः। तन्मात्रवृत्तिधर्मः असाधारणः तदितरस्मिन्नपि वर्तमानो धर्मः साधारण उच्यते। यथा पृथिव्यां पृथिवीत्वधर्मः तस्यासाधारणो धर्मो भवति चेद् द्रव्यत्वं पृथिव्याः साधारणो धर्मो भवति। पृथिवी हि नवसु द्रव्येषु एकं द्रव्यमस्ति, अतः तत्र द्रव्यत्वधर्मोऽपि अस्ति परन्तु स च धर्मः पृथिवीमतिरिच्य जलतेजोवाय्वाकाशादिष्वपि वर्तते इति हेतोः स साधारणो धर्म उच्यते। पृथिवीत्वधर्मस्तु पृथिवीमात्रवृत्तिरस्तीति स धर्मः पृथिव्या असाधारणधर्मो भवति। प्रकृते च अधिकरणत्वधर्मः सकलाधिकरणेषु वर्तते इति स साधारणधर्मो भवति। स च धर्म आधेयताधर्मेण निरूपितो वर्तते। यत आधेयताधर्मं विना अधिकरणताया वक्तुमशक्यत्वेन अधिकरणत्वस्य आधेयतासापेक्षत्वादुभयोर्धर्मयोः परस्परं निरूप्यनिरूपकभावसम्बन्धस्य अङ्गीकाराद् आधेयतानिरूपिता अधिकरणता भवतीति 'आधेयतानिरूपितत्वमधिकरणत्वम्' इत्युच्यते।




## आधेयत्वम्


वृत्तिता इति आधेयताया एव पर्यायशब्दः। यद्वस्तु कुत्रचित् तिष्ठति स आधेयः कथ्यते। आधेयवृत्तिधर्मः आधेयत्वम्/आधेयता इत्युच्यते। अयमपि साधारणधर्मः, सकलेषु आधेयेषु विद्यमानत्वात्। आधेयत्वधर्मश्च अधिकरणताधर्मेण निरूपिता भवतीति अधिकरणतानिरूपित्वम् आधेयत्वं भवति। उपरि धर्मयोर्मध्ये परस्परं निरूप्यनिरूपकभावसम्बन्धस्य विद्यमानत्वाद् यथा अधिकरणता आधेयतानिरूपिता भवतीति यदुक्तम्, तद्वद् आधेयता अपि अधिकरणताधर्मेण निरूपिता भवति, अतः 'अधिकरणतानिरूपितत्वम् आधेयत्वम्' इति तल्लक्षणं वक्तुं शक्यम्।




अत्र ध्यातव्यो विषयः– धर्मयोः परस्परं निरूप्यनिरूपकभावाद् आधेयतानिरूपिता अधिकरणता, अधिकरणतानिरूपिता च आधेयता उच्यते। अत्र एकेन धर्मेण अपरो धर्मो निरूपितो भवति यदा तदा पूर्वोक्तधर्मो निरूपको भवति। यदा च धर्मस्य साक्षाद् धर्मिणि अन्वयो विधेयः तदा निरूपकत्वसम्बन्धः तत्र वक्तव्यः। यथा आधेयतानिरूपकम् अधिकरणम्, अधिकरणतानिरूपक आधेयः, आधेयताया आधेये निष्ठत्व/वृत्तित्वसम्बन्धेन अन्वयः करणीयः, एवम् अधिकरणताया अपि अधिकरणे निष्ठत्व/वृत्तित्वसम्बन्धेन अन्वयः करणीयः, तथा च घटभूतलयोर्मध्ये तथा वक्तव्यत्वे घटस्य अत्र आधेयत्वाद् भूतलस्य च अधिकरणत्वाद् घटवद्भूतलमिति वाक्याद् 'घटनिष्ठाधेयतानिरूपिताधिकरणताश्रयः भूतलम्' इति बोधः। वैपरीत्ये तु 'भूतलनिष्ठाधिकरणतानिरूपिताधेयताश्रयो घटः' एवंविधो बोधो भवति। धर्मस्य साक्षाद् अपरत्र धर्मिणि अन्वये तु 'घटनिष्ठाधेयतानिरूपकं भूतलम्/भूतलनिष्ठाधिकरणतानिरूपको घटः' इत्येवं रीत्या वक्तव्यम्। धर्मी सदैव निरूपक एव भवति न तु निरूपितः


## प्रकारता

प्रकारता विशेषणता इत्येतौ शब्दौ पर्यायौ भवतः। प्रकारे वर्तमाना प्रकारतापि साधारणधर्मोऽस्ति सर्वेषु प्रकारेषु विद्यमानत्वात्। सा च प्रकारता विशेष्यताधर्मेण निरूपिता भवति। यथा- 'नीलो घटः' इत्यत्र घटो विशेष्यो वर्तते चेत् तत्र नीलपदार्थः प्रकारो वर्तते, घटे नीलस्य प्रकारविधया भानात्। एवं च प्रकारता नीलनिष्ठा भवति, सा च घटनिष्ठविशेष्यतानिरूपिता भवति। तथा च 'घटनिष्ठविशेष्यतानिरूपिता नीलनिष्ठा प्रकारता, तदाश्रयो नीलः' इति उक्तवाक्याद् बोधः।



## विशेष्यता

विशेष्यता धर्मिता इत्येतौ शब्दौ पर्यायौ भवतः। विशेष्ये धर्मिणि वर्तमानः साधारणो धर्मो भवति विशेष्यता/धर्मिता। सा च विशेष्यता प्रकारताधर्मेण/विशेषणताधर्मेण निरूपिता भवतीति 'नीलो घटः' इत्यत्र नीलनिष्ठप्रकारतानिरूपिता घटनिष्ठविशेष्यता जाता। तदाश्रयश्च घटोऽभवत्। तथा च 'नीलनिष्ठप्रकारतानिरूपितविशेष्यताश्रयो भूतलम्' इति 'नीलो घटः' इत्यस्माद् वाक्याद् बोधो भवति।





## प्रतिबन्धकता

'कारणीभूताभावप्रतियोगिता' इदं च प्रतिबन्धकलक्षणं न्यायमतेन अस्ति दर्शनान्तरेषु भिन्नमेव प्रतिबन्धकस्य लक्षणदर्शनात्। विरोधिता प्रतिबन्धकता इति एतौ शब्दौ समानार्थकौ। न्यायमतानुसारेण कार्यसामान्यं प्रति प्रतिबन्धकाभावस्य कारणत्वाङ्गीकारात् कारणीभूताभावपदेन प्रतिबन्धकाभावो गृह्यते। तस्य प्रतियोगी च भवति प्रतिबन्धकः, यस्य अभावः स तस्य प्रतियोगीति न्यायात्। एवं च 'कारणीभूताभावप्रतियोगित्वं प्रतिबन्धकत्वम्' इति तल्लक्षणमुच्यते। यथा- घटं प्रति वृष्टिः प्रतिबन्धिका भवति। सकलघटसामग्रीसत्त्वेऽपि वृष्टिसत्त्वे घटकार्यस्य अजननाद् घटं प्रति वृष्टिः प्रतिबन्धिका। तदभावश्चात्र कारणं वक्तव्यम्। तथा चात्र प्रतिबन्धकाभावः/ वृष्ट्यभावोऽपि घटजनने कारणं जातं चेत् कारणीभूताभावपदेन प्रतिबन्धकाभावः समागतो भवति। तत्प्रतियोगित्वं च प्रतिबन्धके अस्तीति कारणीभूताभावप्रतियोगित्वं प्रतिबन्धकत्वम् इति लक्षणं घटप्रतिबन्धकीभूतवृष्टौ समन्वितं भवति।


## प्रतिबध्यता

प्रतिबध्यता नाम विरोध्यता। सा च प्रतिबन्धकताधर्मेण निरूपिता भवति। यः प्रतिबन्धको भवति स विरोधी भवति अतः प्रतिबध्यपदार्थो विरोध्यो जात इति विरोध्यता प्रतिबध्यवृत्तिधर्मः। सा च प्रतिबन्धकताधर्मेण निरूपिता भवति।




## उत्तेजकत्वम्

कस्यचन कार्यस्य यः प्रतिबन्धको भवति तद्गतप्रतिबन्धकतां च यो विघटयति स एव उत्तेजको भवति। यथा चन्द्रकान्तमणिसन्निधाने वह्निर्दाहमुत्पादयितुं न शक्नोति। तस्यामेव अवस्थायां सूर्यकान्तमणेरपि सन्निधानं भवति चेत् तदा दाहप्रतिबन्धकस्य चन्द्रकान्तमणेः सत्त्वेऽपि वह्निर्दाहं करोतीति चन्द्रकान्तमणेः प्रतिबन्धकतां सूर्यकान्तमणिः अपहरति/ विघटयति इति वक्तव्यम्। तथा च चन्द्रकान्तमणिगतप्रतिबन्धकतायाः सूर्यकान्तमणिना विघटनात् सूर्यकान्तमणेस्तत्र उत्तेजकत्वमस्तीति प्रतिबन्धकताधर्मविघटकत्वमेव सूर्यकान्तमणेरुत्तेजकत्वम्।



## अप्रयोजकत्वम्

प्रयोजकत्वं नाम व्यभिचारशङ्कानिवारकतर्कवत्त्वम्। तच्छून्यत्वमेव अप्रयोजकत्वम्, अर्थाद् यत्र अनुमानप्रयोगे हेतुरस्तु साध्यं मास्तु इत्यादिना साध्यं विनापि पक्षे हेतुसद्भावस्य शङ्का केनचित् समुपस्थाप्यते सैव शङ्का अप्रयोजकशङ्का इत्युच्यते। तस्यैव अपरं नाम अस्ति व्यभिचारशङ्का। व्यभिचारशङ्कायां च उक्तशङ्का निवारणीया भवति सत्तर्केण, अन्यथा अनुमानं दुर्बलीभूय तत्र प्रयुक्तो हेतुः स्वसाध्यं साधयितुं क्षमो न भवति। तादृशव्यभिचारशङ्काया निवारकस्य तर्कस्य शून्यत्वे/अभावे तु उक्ता शङ्का प्रबला भवतीति तदा सत्प्रतिपक्षहेत्वाभासोद्भावेन हेतोर्दुष्टत्वाद् अनुमानमेव तत्र न भवति, अतो यदा अनुमाने तथाविधव्यभिचारशङ्का समुदेति तस्य निवारणं सत्तर्केण करणीया। सत्तर्काभावे/सत्तर्कशून्यत्वे च अप्रयोजकत्वम्।

## विनिगमना


विनिगमनेति पारिभाषिकशब्दस्य अर्थो भवति एकतरपक्षपातिनी युक्तिः। एकस्मिन् विषये पक्षद्वयस्य समुपस्थितत्वे एकपक्षस्य दार्ढ्याय काचन समीचीना युक्तिर्भवति चेत् सैव विनिगमना इत्युच्यते। तत्र विनिगमनायां सत्याम् एकः पक्षः दृढो भवति अपरश्च दुर्बलः। यथा तेजसोऽभावस्तमो वक्तव्यो वा तमसोऽभावस्तेजः ? इति जिज्ञासायां तेजोऽभाव एव तमो वक्तव्यः, न तु तमसोऽभावस्तेज इत्यत्र नैयायिकैः काचन दृढतरा युक्तिः प्रदीयते। तत्र सैव युक्तिर्विनिगमना वर्तते इति तस्याः सत्त्वेन तेजोऽभाव एव तमोऽङ्गीक्रियते न तु तमसोऽभावरूपस्तेजपदार्थः। क्वचित् तथाविधा युक्तिरुभयपक्षतो दातुं न शक्यते चेत् तदा उभयपक्षतो विनिगमनाया अभावेन कस्यापि पक्षस्य सिद्धिर्न भवति।

## अयुतसिद्धत्वम्

ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेव अवतिष्ठते तौ अयुतसिद्धौ उच्येते। तस्य भावः अयुतसिद्धत्वम्। यथा घटे विद्यमानो नीलो रक्तो वा गुणो घटनाशात् पूर्वं घटाश्रितमेव अवतिष्ठते इति घटस्तद्रूपं च द्वौ अयुतसिद्धपदार्थौ भवतः। अपृथक्सिद्धपदार्थयोर्मध्ये एवंविधः सम्बन्धः अङ्गीक्रियते इति सामान्यतो वक्तुं शक्यते। न्यायमते अवयवावयविनौ, गुणगुणिनौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चायुतसिद्धपदार्थरूपेण परिचीयन्ते।

## साधर्म्यम्

समानानां भावः साधर्म्यं समानो धर्म इति यावद्। अथवा समानो धर्मो येषां ते सधर्माणः, तेषां भावः साधर्म्यम्। समानो धर्म इत्येव फलितार्थः। यथा द्रव्यादिपदार्थानां ज्ञेयत्वम्, अभिधेयत्वं साधर्म्यं भवति। सर्वत्र ज्ञेयत्वस्य अभिधेयत्वस्य च सत्त्वाद् ज्ञेयत्वम् अभिधेयत्वं वा द्रव्याणां समानो धर्मो भवति। एवं द्रव्यादीनां पञ्चानां भावत्वं समानो धर्मः/साधर्म्यं भवति। द्रव्यगुणकर्मणां सत्तावत्त्वं समानो धर्मो भवति। अन्यत्रापि एवं रीत्या चिन्तनीयम्।




## वैधर्म्यम्


विरुद्धानां भावो वैधर्म्यम्। विरुद्धो धर्म इति यावत्। अथवा विरुद्धो धर्मो येषां ते विधर्माणः, तेषां भावो वैधर्म्यम्। विरुद्धो धर्म इत्येव फलितार्थः। यथा सत्तावत्त्वं द्रव्यादित्रिकस्य (द्रव्यगुणकर्मणां) साधर्म्यं चेत् तदेव सत्तावत्त्वं सामान्यविशेषसमवायादिपदार्थानां वैधर्म्यं भवति अर्थाद् येषां येषां यद्यत् साधर्म्यं भवति तदेव इतरस्य वैधर्म्यं भवतीत्यर्थः। यथोक्तं भाषापरिच्छेदकारेण 'यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत्' (का.२९) इति।

## पारिमाण्डल्यम्

पारिमाण्डल्यशब्दः अणुपरिमाणस्य कृते प्रयुज्यते। पारिमाण्डल्यम् अणुपरिमाणम् इति विश्वनाथो मुक्तावल्यां लिखति- 'पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्' (कारिका–१५) इति। परितो मण्डलम् वर्तुलम् परिमण्डलम्, तस्य भावः पारिमाण्डल्यम् इति उक्तशब्दस्य व्युत्पत्तिः। अणुपरिमाणं हि न दीर्घं न च ह्रस्वं वक्तुं शक्यते इति तस्य परितः समानरूपेण वर्तुलाकारत्वाद् अणुपरिमाणस्य पारिमाण्डल्यं नाम।

## भूतत्वम्

पृथिवीजलतेजोवाय्वाकाशाश्च भूतपदेन उच्यन्ते। तेभ्यो मिलितेभ्यो जायमानत्वादेव किल अस्मदादीनां शरीरं भौतिकमुच्यते। भूतेभ्य उत्पन्नम्/जातं भौतिकम्। अत्र पञ्चसु अपि भूतपदार्थेषु विद्यमानः तेषाम् एकैकविशेषगुणः चक्षुरादीन्द्रियैर्गृह्यते इति बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वस्य तत्र सत्त्वात् बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वमेव भूतत्वम्। न तु कश्चिद् अतिरिक्तो धर्मस्तद्, घटत्वादिरिव।




## मूर्तत्वम्

क्रियावद् वस्तु मूर्तवस्तु उच्यते, अर्थाद् यस्मिन् क्रिया जायते स पदार्थ एव मूर्तपदार्थ उच्यते। सा च क्रिया अविभुपदार्थेष्वेव भवतीति पृथ्वीजलतेजोवायुमनांसि मूर्तद्रव्याणि भवन्ति। अतः क्रियावत्त्वं मूर्तत्वम् इति तल्लक्षणं क्रियते। मूर्तत्वधर्मोऽपि न घटत्वजातिरिव अतिरिक्तपदार्थ इति ज्ञापनाय क्रियावत्त्वं मूर्तत्वमिति तल्लक्षणमुच्यते।

## विभुत्वम्

विभुपदार्थानां सर्वत्र सत्त्वेन तेषां संयोगश्च सर्वमूर्तद्रव्यैः सह अवश्यंभावात् सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम् इति विभुत्वस्य लक्षणं क्रियते। विभुत्वमपि न घटे घटत्वमिव विभुपदार्थे विद्यमाना काचन जातिः, अपि तु सर्वमूर्तद्रव्यैः सह जायमानः संयोग एव विभुत्वम्, न तु अतिरिक्तपदार्थः।

## अव्याप्यवृत्तित्वम्

यद् वस्तु स्वाधिकरणं न व्याप्नोति तदेव अव्याप्यो भवति। अर्थाद् यत्र स्वयं स्वस्य अभावश्च भवति तादृशपदार्थः अव्याप्यवृत्तिपदार्थ उच्यते। यथा संयोगो गुणः। स च स्वस्याधिकरणे वृक्षे शाखाप्रदेशावच्छेदेन वर्तते चेद् मूलप्रदेशावच्छेदेन नास्ति अपि। एवं च एकस्मिन्नेव अधिकरणे वृक्षे स्व-स्वाभावयोः वक्तुं शक्यत्वेन संयोगः अव्याप्यवृत्तिरुच्यते। एवं च अव्याप्यवृत्तित्वं नाम स्वात्यन्ताभावसामानाधिकरण्यमिति फलितं भवति। स्वस्य स्वात्यन्ताभावेन सह सामानाधिकरण्यम् इति लक्षणार्थः। सामानाधिकरण्यं नाम एकाधिकरणवृत्तित्वम्, समानम् अधिकरणं यावत्।

## व्याप्यवृतित्वम्

यद्वस्तु स्वाधिकरणं व्याप्नोति तद् व्याप्यवृत्तिपदार्थ उच्यते। यथा रूपं स्वाधिकरणं घटं व्याप्य तिष्ठति अर्थाद् व्याप्नोति अतो रूपं व्याप्यवृत्तिगुणो भवति। संयोग इव रूपमपि घटस्य एकदेशेन अस्ति अन्यदेशेन च नास्ति इति। न हि तथा अनुभवो वर्तते कस्यापि। अतो रूपगुणस्य स्वात्यन्ताभावेन सह सामानाधिकरण्याभावाद् रूपं व्याप्यवृत्ति ज्ञेयं भवति। एवं रीत्या अन्यत्रापि चिन्तनीयम्।

### *पदानामर्थपरिचयः*

| | | |
|---|---|---|
| **निरूपकत्वम्** | = | ज्ञापकत्वम् (यः कस्यचिद् धर्मस्य ज्ञानं कारयति, तद्वृत्तिधर्मः) |
| **निरूपितत्वम्** | = | ज्ञाप्यत्वम् (यज्ज्ञापितो भवति तद्वृत्तिधर्मः) |
| **अधिकरणत्वम्** | = | आधेयतानिरूपितो धर्मः |
| **आधेयत्वम्** | = | अधिकरणतानिरूपितो धर्मः (वृत्तित्वम्/आश्रितत्वम्) |
| **प्रकारता** | = | प्रकारवृत्तिधर्मः (विशेषणत्वम्) |
| **विशेष्यता** | = | विशेष्यवृत्तिधर्मः (धर्मिता) |
| **प्रतिबन्धकता** | = | कारणीभूताभावप्रतियोगिता (कार्यविरोधिता) |
| **प्रतिबध्यता** | = | विरोध्यता |
| **उत्तेजकत्वम्** | = | प्रतिबन्धकताधर्मविघटकत्वम् |
| **अप्रयोजकत्वम्** | = | व्यभिचारशङ्कानिवारकतर्कशून्यत्वम् |
| **विनिगमना** | = | एकतरपक्षपातिनी युक्तिः (निर्णायिका युक्तिः) |
| **अयुतसिद्धत्वम्** | = | अनश्यदेकमपराश्रितत्वम् (नित्यसम्बद्धत्वम्) |
| **साधर्म्यम्** | = | समानो धर्मः |
| **वैधर्म्यम्** | = | विरुद्धो धर्मः |
| **पारिमाण्डल्यम्** | = | अणुपरिमाणम् |
| **भूतत्वम्** | = | बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् |
| **मूर्तत्वम्** | = | क्रियावत्त्वम् |
| **विभुत्वम्** | = | सर्वमूर्तद्रव्यसंयोगित्वम् |
| **अव्याप्यवृत्तित्वम्** | = | स्वात्यन्ताभावसामानाधिकरण्यम् (एकस्मिन् देशे सत्त्वं देशान्तरे चासत्त्वम्) |
| **व्याप्यवृत्तित्वम्** | = | स्वात्यन्ताभावासामानाधिकरण्यम् (सर्वदेशावच्छेदेन विद्यमानत्वम्) |

## अभ्यासः

### १. रिक्तस्थानानि पूरयत

(क) यो ज्ञापको भवति स एव ________ उच्यते।

(ख) ________ इति आधेयताया एव पर्यायशब्दः।

(ग) कार्यसामान्यं प्रति ________ कारणत्वाङ्गीकारात् स एव प्रतिबन्धकः।

(घ) यद् वस्तु स्वाधिकरणं व्याप्नोति तद् ________ पदार्थ उच्यते।

(ङ) ______ भिन्नानां कारणत्वमुदाहृतम् इति मुक्तावल्यां प्रोक्तम्।

### २. परस्परं मेलयत

| | |
|---|---|
| निरूपकत्वम् | स्वात्यन्ताभावसामानाधिकरण्यम् |
| अव्याप्यवृत्तित्वम् | ज्ञापकत्वम् |
| विनिगमना | बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् |
| भूतत्वम् | एकतरपक्षपातिनी युक्तिः |
| मूर्तत्वम् | क्रियावत्त्वम् |

### ३. अतिसङ्क्षिप्तमुत्तरं दत्त

(क) 'ज्ञाप्यत्वम्' कस्य शब्दस्यार्थो वर्तते ?

(ख) अभावेन निरूपिता घटनिष्ठा का भवति ?

(ग) न्यायमते अयुतसिद्धपदार्थाः के सन्ति ?

(घ) 'अणुपरिमाणम्' इत्यस्य कृते पारिभाषिकशब्दः कः ?

(ङ) स्वात्यन्ताभावसामानाधिकरण्यं किमस्ति ?

४. **व्याख्यात्मकमुत्तरं लिखत**

(क) 'घटवद् भूतलम्' इत्युदाहरणमादाय आधेयता-अधिकरणतयोः निरूप्यनिरूपकभावं स्पष्टयत।

(ख) 'यदुक्तं यस्य साधर्म्यम्...' इत्यनुसारेण साधर्म्यवैधर्म्ययोः स्वरूपं प्रदर्शयत।

(ग) उत्तेजकत्वं नाम किम् ? चन्द्रकान्तमणिसूर्यकान्तमण्योरुदाहरणेन वर्णयत।

(घ) अप्रयोजकत्वस्य लक्षणं विलिख्य व्यभिचारशङ्काया निवारणे तर्कस्य भूमिकां निर्दिशत।

(ङ) विभुत्वस्य लक्षणं विलिख्य तस्य मूर्तद्रव्यैः सह सम्बन्धं दर्शयत।

५. **अधिकरणताधेयतयोर्विषये सहपाठिभिः सह चर्चां कृत्वा पञ्चोदाहरणानि लिखत।**

६. **सचित्रमयुतसिद्धत्वं प्रकाशयत।**

७. **'नीलो घटः' इति वाक्याज्जायमानं प्रकारताविशेष्यतयोः शाब्दबोधं रेखाचित्रमाध्यमेन प्रदर्शयत।**

८. **'लोकव्यवहारे न्यायदर्शनस्योपयोगिता' इति विषयमवलम्ब्य दश वाक्यानि लिखत।**

## *परियोजनाकार्यम्-*

"न्यायसिद्धान्तमुक्तावल्यां प्रतिपादिताः पारिभाषिकशब्दाः तेषां महत्त्वञ्च" इति विषयमधिकृत्य सङ्क्षिप्तं निबन्धं (५०० शब्दात्मकम्) प्रस्तुत।

# मङ्गलाचरणम्

कारिका- चूडामणीकृतविधुर्वलयीकृतवासुकिः।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥ १ ॥

**अन्वयः-** चूडामणिकृतविधुः वलयीकृतवासुकिः लीलाताण्डवपण्डितः भवः भव्याय भवतु।

**व्याख्या–** ग्रन्थकारो विश्वनाथपञ्चाननभट्टाचार्यः प्रारिप्सितस्य मुक्तावलीग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं मङ्गलमाचरति चूडामणिरित्यादिना। स्मृतिविषयीभूतो भगवान् शङ्करोऽचिरमेव स्वाभीष्टं फलं प्रयच्छत्वित्याशयेन पद्यमिदं विरचितवान् ग्रन्थकारः पञ्चाननः। तथा च येन चूडामणिस्थानापन्नत्वेन चन्द्रः स्वीकृतः (न चूडामणिः = अचूडामणिः, अचूडामणिः चूडामणिः कृतो येन सः) येन वलयस्थानापन्नत्वेन वासुकिसर्पराजः स्वीकृतः(न वलयः = अवलयः, अवलयः वलयः कृतो येन सः) यश्च लीलया एव ताण्डवाख्यनृत्यकरणे कुशलः (लीलया ताण्डवः = लीलाताण्डवः, तत्र पण्डितः = कुशलः)। तादृशो भवः = भवन्ति = जायन्ते जन्मस्थितिलया यस्मात् स भवः = शङ्करः, भव्याय = अस्मत्कल्याणाय भवतु = अस्तु। अत्र उपर्युक्तेन पद्येन आशीर्वादात्मकं मङ्गलमाचरितवान् ग्रन्थकारः।

ग्रन्थप्रयोजनं निर्दिशति-

निजनिर्मितकारिकावलीमतिसङ्क्षिप्तचिरन्तनोक्तिभिः।
विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः ॥ २ ॥

**अन्वयः-** राजीवदयावशंवदः (अहं विश्वनाथः) निजनिर्मितकारिकावलीम् अतिसङ्क्षिप्तचिरन्तनोक्तिभिः कौतुकात् ननु विशदीकरवाणि।

**व्याख्या-** राजीवदयावशंवदः = राजीवः (ग्रन्थकारस्य शिष्यस्य नाम) तस्योपरि दया (करुणा) तया वशंवदः = वशीभूतः, अर्थात् शिष्यस्य राजीवस्योपरि या दया तया प्रेरितः सन् निजनिर्मितकारिकावलीम् = स्वप्रणीतां कारिकावलीनाम्नीं कृतिम्। अतिसङ्क्षिप्तचिरन्तनोक्तिभिः = अतिसङ्क्षिप्ताः (अत्यन्तं लघ्व्यः) याः चिरन्तनोक्तयः

(प्राचीननैयायिकानां मणिकारादीनां वचनानि) ताभिः कौतुकात् = कुतूहलादथवा शिष्यहितरूपकौतुकात्। ननु = निश्चयार्थकमव्ययम्। विशदीकरवाणि = व्याख्यास्यामि / स्पष्टं करिष्यामि।

अधस्तनेन पद्येन वस्तुनिर्देशात्मकं मङ्गलं निर्दिशति-

**सद्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका**
**सत्सामान्यविशेषनित्यमिलिताऽभावप्रकर्षोज्ज्वला।**
**विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली**
**विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम्॥ ३॥**

**अन्वयः-** सद्रव्या गुणगुम्फिता सत्कर्मणां ज्ञापिका सत्सामान्यविशेषनित्यमिलिता अभावप्रकर्षोज्ज्वला सद्युक्तिः एषा सिद्धान्तमुक्तावली विष्णोः वक्षसि विश्वनाथेन विन्यस्ता सुकृतिनां मनसः मुदं चिरं वितनुताम्।

**व्याख्या-** श्लोकोऽयं ग्रन्थपक्षतया मालापक्षतया च द्वेधा व्याख्यायते, तत्र **ग्रन्थपक्षे** तावद् एवंविधोऽर्थः करणीयः-

द्रव्यैः = पृथिव्यादिनवसङ्ख्याकद्रव्यैः, सहिता = युक्तेति सद्रव्या, पृथिव्यादिनवद्रव्याणां प्रतिपादिकेत्यर्थः। गुणैः = रूपरसादिचतुर्विंशतिसङ्ख्याकैः गुणैः, गुम्फिता = ग्रथिता, अर्थाद् एतेषां प्रकाशिकेत्यर्थः। सन्ति च तानि कर्माणि = सत्कर्माणि, उत्क्षेपणादीनि कर्माणीत्यर्थः। तेषां ज्ञापिका = प्रतिपादिका। कर्मणि सदिति विशेषणेन कर्म नातिरिक्तः पदार्थ इति वादिनां मतं खण्डितं भवतीति अत्र ज्ञापितम्। एवं सत्सामान्यं च विशेषश्च नित्याश्चेति सत्सामान्यविशेषनित्याः, तैर्मिलिताः = युक्तेत्यर्थः। अभावस्य यः प्रकर्षः = न्यायमते परमतखण्डनपूर्वकम् अभावस्य पृथगेव पदार्थान्तरत्वेन अङ्गीकार एवात्र प्रकर्षपदार्थः, तेन उज्ज्वला = प्रकाशिका, तदुपस्थापिकेत्यर्थः। सत्यो युक्तयो यस्यां सा = सद्युक्तिः वादिप्रतिवादिभिरखण्डनीया युक्तयोऽत्र राजन्ते इत्यर्थः। सिद्धान्तमुक्तावली-वादिप्रतिवादिभ्यां निर्णीतोऽर्थः सिद्धान्तः, ते एवात्र मुक्ताः = मुक्ता इव पदार्था इत्यर्थः। तेषामावली = पङ्क्तिः, एषा = एतादृशी, सिद्धान्तमुक्तावली, विश्वनाथकृतिना = विश्वनाथनामकेन विदुषा, विष्णोः श्रीहरेः, वक्षसि = वक्षःस्थले, विन्यस्ता = अर्पिता, एवम्भूतेयं मुक्तावली सुकृतीनां = पुण्यवतां ज्ञानवतां च विदुषाम्, मनसः = चित्तस्य, मुदम् = हर्षं, चिरम् = बहुकालं यावत् वितनुताम् = अभिवर्धयतामित्यर्थः।

**मालापक्षे-** द्रव्यैः = मूल्यवद्भिर्द्रव्यैः सहिता = युक्तेति सद्रव्या, गुणेन = सूत्रेण गुम्फिता = ग्रथितेति गुणगुम्फिता, सुकृतीनाम् = पुण्यवतां सत्कर्मणां ज्ञापिका = बोधिका, एतादृशमालायुतो जनो नूनं सत्कर्मवान् भवेदिति तस्यानुमापिकेति तात्पर्यम्। सन्तौ च तौ सामान्यविशेषौ = सत्सामान्यविशेषौ, सामान्यमणिर्विशेषमणिश्चेत्यर्थः, ताभ्यां नित्यमिलिता = नित्ययुक्ता एषा मालेत्यर्थः। या चाभावे = अन्धकारे, प्रकर्षेण = अतिशयेन, उज्ज्वला =

विषयप्रकाशिका अस्ति। एवं सद्युक्तिरेषा = मालागतरचनाविशेषेण युता एषा सिद्धान्तमुक्तावली = सिद्धान्ताश्चासौ मुक्ताः = सिद्धान्तमुक्ताः = सम्यक्तया सिद्धीकृता मुक्ताः = मणयः, तासामावली = समुदायविशेषः, तादृशीभिर्मुक्ताभिः सज्जीकृता मालेत्यर्थः। विश्वनाथकृतिना श्रीविष्णोर्वक्षसि अर्पिता एवंविधा माला चिरकालपर्यन्तं सुकृतिनां मनसो मुदं = मनसो हर्षं वितनुताम् = विशदीकुरुताम् इति।

ग्रन्थकारो नमस्कारात्मकं मङ्गलमाचरति-

**कारिका-** **नूतनजलधररुचये गोपवधूटीदुकूलचौराय।**
**तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय॥ १॥**

**अन्वयः-** नूतनजलधररुचये गोपवधूटीदुकूलचौराय संसारमहीरुहस्य बीजाय तस्मै कृष्णाय नमः।

**व्याख्या-** नूतनश्चासौ जलधर इति नूतनजलधरः (मेघः), तस्य रुचिरिव रुचिर्यस्य सः नूतनजलधररुचिः, तस्मै। सद्योवृष्टिप्रदाता मेघ इव स्वाश्रितान् भक्तान् तदभिलषितकामान् प्रदाय सुखीकरणस्वभावायेत्यर्थः। गाः पान्तीति गोपाः, गोपानां वधूट्यः (स्त्रियः) तासां दुकूलानि (वस्त्राणि) चोरयतीति चौरः, तस्मै गोपवधूटीदुकूलचौराय। संसरतीति संसारः प्रपञ्चः, स एव महीरुहः (वृक्षः), तस्य बीजाय (निमित्तकारणाय) श्रीकृष्णाय मम नमः (नमस्कारः अस्ति)।

## मङ्गलवादः

मङ्गलप्रयोजनं निर्दिशति-

**मुक्तावली- विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति- नूतनेति। ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणम्, विनापि मङ्गलं नास्तिकादीनां ग्रन्थेषु निर्विघ्नपरिसमाप्तिदर्शनादिति चेत्-**

**व्याख्या–** मङ्गलं विघ्नध्वंसं प्रति समाप्तिं प्रति वा कारणं भवितुं नार्हति, मङ्गलं विनापि नास्तिकविरचितग्रन्थेषु समाप्तिदर्शनाद् इति मूलार्थः। मङ्गलं हि विघ्नं निवारयति, विघ्नमपसार्य कार्यं वा सम्पादयतीति आस्तिकानां विश्वासः। अतः कस्यापि कार्यस्य आरम्भे मङ्गलमाचर्यते। समाप्तिकामो विघ्नध्वंसकामो वा मङ्गलमाचरेत् इति शिष्टाचारानुमिता श्रुतिरत्र प्रमाणं भवति।

तच्च मङ्गलं त्रिविधम्- आशीर्वादात्मकम्, नमस्कारात्मकम्, वस्तुनिर्देशात्मकं च। तदनुरोधेन ग्रन्थकर्ताऽपि ग्रन्थारम्भे मंगलाचरणं करोति। अत्र केचन आस्तिकजना मङ्गलस्य फलं विघ्नध्वंसो भवतीति वदन्ति चेत् केचन विघ्नध्वंसपूर्वकं समाप्तिः तत्फलं वक्तव्यमिति वदन्ति। तदनुरोधेनैव मूले पक्षद्वयं समुपस्थापयति ग्रन्थकारः।

नास्तिकाश्च मङ्गलस्य विघ्नध्वंसः समाप्तिर्वा किमपि फलं भवितुं न शक्नोति, तस्य उभौ प्रत्यपि कारणत्वादर्शनादिति वदन्ति। तदेव पूर्वपक्षं 'ननु मङ्गलम्...' इत्यादिना मूले ग्रन्थकार उपस्थापयति। मङ्गलं यदि समाप्तिं प्रति विघ्नध्वंसं प्रति वा कारणं स्यात् तर्हि तद्विना कथं समाप्तिः दृश्येत ? समाप्तिश्च दृष्टा अस्ति, अतो मङ्गलं न कारणमित्यागतं भवतीति पूर्वपक्षस्याशयः। अत्र मूले मङ्गलं विनापि समाप्तिदर्शनाद् इत्यनेन व्यतिरेकव्यभिचारः प्रदर्शितो वर्तते।

व्यभिचारो द्विविधः- अन्वयव्यभिचारो व्यतिरेकव्यभिचारश्च। अन्वयव्यभिचारो नाम तत्सत्त्वे तदभावः अर्थात् कारणसत्त्वे कार्याभावः। व्यतिरेकव्यभिचारो नाम तदभावे तत्सत्त्वम् अर्थात् कारणाभावेऽपि कार्यसत्त्वम्।

प्रकृते च बहुषु ग्रन्थेषु मङ्गलरूपं कारणं न दृश्यते, अथापि समाप्तिरूपं कार्यं तत्र दृष्टमिति मङ्गलस्य समाप्तिकारणत्ववादिमते व्यतिरेकव्यभिचारो दृष्टः। मूले व्यतिरेकव्यभिचारप्रदर्शनमन्वयव्यभिचारस्यापि उपलक्षकमस्तीति बोद्धव्यम्, यतो बहुत्र आस्तिकग्रन्थेषु मङ्गलदर्शनेऽपि समाप्तिर्नैव दृग्गोचरीभूता। यथा मङ्गले कृतेऽपि बाणभट्टविरचितः कादम्बरीग्रन्थो न समाप्तिं गतः। अत्र मङ्गलरूपकारणसत्त्वेऽपि समाप्तिरूपकार्यादर्शनाद् अन्वयव्यभिचारो दृश्यते।

कार्यकारणभावस्य निश्चायकौ हि अन्वयसहचरव्यतिरेकसहचरौ भवतः। तत्सत्त्वे तत्सत्त्वम् (कारणसत्त्वे कार्यसत्त्वम्) अन्वयसहचरः। तदभावे तदभावः (कारणाभावे कार्याभावः) व्यतिरेकसहचरः। तदत्र मङ्गलसमाप्त्योर्मध्ये उभयमपि नास्तीति हृदयम्।

ग्रन्थकारो मङ्गलस्य साफल्ये युक्तिं दर्शयति-

**मुक्तावली- न, अविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे तत्र च फलजिज्ञासायां सम्भवति दृष्टफलकत्वेऽदृष्टफलकल्पनाया अन्याय्यत्वाद् उपस्थितत्वाच्च समाप्तिरेव तत्फलं कल्प्यते। इत्थं च यत्र मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत् कल्प्यते। यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम्। प्रचुरस्यैवाऽस्य बलवत्तरविघ्ननिवारणे कारणत्वं बोध्यम्। विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः। नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलम्, समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात्। न चैवं स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य निष्फलत्वापत्तिरिति वाच्यम् ? इष्टापत्तेः, विघ्नशङ्कया तदाचरणात्, तथैव शिष्टाचारात्। न च तस्य निष्फलत्वे तद्बोधकवेदाप्रामाण्यापत्तिरिति वाच्यम् ? सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्। अत एव पापभ्रमेण कृतस्य प्रायश्चित्तस्य निष्फलत्वेऽपि न तद्बोधकवेदाप्रामाण्यम्। मङ्गलं च**

**विघ्नध्वंसविशेषे कारणम्, विघ्नध्वंसविशेषे च विनायकस्तवपाठादि। क्वचिच्च विघ्नात्यन्ताभाव एव समाप्तिसाधनम्। प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात्। इत्थं च नास्तिकादीनां ग्रन्थेषु जन्मान्तरीयमङ्गलजन्यदुरितध्वंसः स्वतः सिद्धविघ्नात्यन्ताभावो वाऽस्तीति न व्यभिचार इति प्राहुः ॥**

**व्याख्या-** न = मङ्गलं विफलं नास्तीत्यर्थः, कुतः ? अविगीतशिष्टाचारविषयत्वात् = अविगीतः = अनिन्दितः, यः शिष्टाचारः = प्रामाणिकजनानामाचारः = कर्म, तद्विषयत्वात् = प्रामाणिकानामास्तिकानामनिन्दिताचारस्य विषयत्वादित्यर्थः। फलसाधनतांशे भ्रमरहितैः शिष्टैः यतो मङ्गलमाचर्यते तस्माद् मङ्गलं विफलं नास्तीति हृदयम्। तच्च फलं समाप्तिरेव। दृष्टे फले विद्यमाने अदृष्टफलकल्पनाया अन्याय्यत्वाद् दृष्टस्य समाप्तिरूपफलस्य अस्मत्पुरतः समुपस्थिततत्वाच्च समाप्तिरेव मङ्गलस्य फलं कल्प्यते = अनुमीयते। मूले कल्प्यते इत्यनेन मङ्गलस्य फलमस्तीति अनुमानप्रमाणेन तत् साध्यते इति सूचितम्।

अनुमानप्रयोगश्चेत्थम्- मङ्गलं सफलम्, अविगीतशिष्टाचारविषयत्वाद् दर्शादिवत्। अत्र मङ्गलं पक्षः, सफलत्वं साध्यम्, अविगीतशिष्टाचारविषयत्वं हेतुः, दर्शादिर्दृष्टान्तो ज्ञेयः। अत्राविगीतशिष्टाचारविषयत्वहेतुना मङ्गलात्मके पक्षे सफलत्वं साध्यते। 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति श्रुत्या दर्शपूर्णमासयागस्य स्वर्गसाधनत्वप्रतिपादनात् तादृशयागकर्तुरभ्रान्ततया तदनुष्ठितस्य यागस्य यथा स्वर्गादिसाधनत्वम्, तद्वन्मङ्गलस्यापि शिष्टाचारविषयत्वेन तदपि नूनं फलवद् इत्याशयः।

एवं च मङ्गलस्य सफलत्वे सिद्धे ततोऽनुमानान्तरं भवति – 'मङ्गलं समाप्तिफलकं समाप्त्यन्याफलकत्वे सति समाप्तिफलकत्वात्' इति। अत्र समाप्तिकामो मङ्गलमाचरेत् इति शिष्टाचारानुमितश्रुतिश्च मङ्गलस्य समाप्तिफलकत्वं साधयति। यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति श्रुतिर्दर्शपूर्णमासयागस्य स्वर्गफलं बोधयति तद्वत्। एवं चानया रीत्या मङ्गलस्य समाप्तिरूपफलवत्त्वे सिद्धे पूर्वपक्षिणा प्रदत्तो व्यभिचार एवं रीत्या वारणीयो भवति- यत्र मङ्गलं न दृश्यते समाप्तिश्च दृश्यते तत्र जन्मान्तरीयं मङ्गलं कल्प्यते, फलबलेन तत्कल्पनीयत्वात्। यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरविघ्नस्य विघ्नप्राचुर्यस्य वा सत्त्वेन समाप्तिर्न जाता इति वक्तव्यम्। बलवत्तरविघ्ननाशं प्रति बलवत्तरमङ्गलस्यैव कारणत्वेन किं वा विघ्नप्राचुर्यस्य नाशाय मङ्गलप्राचुर्यस्यैव कारणत्वेन तत्र मङ्गलस्य बलवत्त्वाभावात् / प्राचुर्याभावाद् वा बलवत्तरविघ्नस्य नाशः / विघ्नप्राचुर्यस्य वा नाशो न जात इति वक्तव्यम्। येन च समाप्तिर्नैव जातेति।

प्राचुर्यं नाम अधिकसङ्ख्यावत्त्वम्। अधिकसङ्ख्याकविघ्नानां विनाशाय अधिकसङ्ख्याकमङ्गलस्यैव कारणत्वं भवतीति तात्पर्यम्। तत्र च तथाभावात् तथा जातं स्यादिति कल्पनीयमित्यर्थः। तथा च मङ्गलस्य समाप्तिः फलं

सिद्धम्।

अत्र प्राचीननैयायिका विघ्नध्वंसो मङ्गलस्य द्वारं भवतीति समाप्तिरेव तस्य मुख्यं फलमिति वदन्ति। नव्यनैयायिकास्तु विघ्नध्वंस एव मङ्गलस्य फलमिति वदन्ति। समाप्तिं प्रति कारणानि च बुद्धिप्रतिभादयो भवन्तीति तेषां मतमस्ति।

शङ्का– यदि प्राचीननैयायिकमतानुसारेण विघ्नध्वंस एव मङ्गलस्य फलमुच्यते चेद् अविघ्नवता पुरुषेण कृतस्य मङ्गलस्य निष्फलत्वेन कथं मङ्गलस्य साफल्यं सम्भवेत् ? तादृशस्थले च किं मङ्गलं निष्फलमेव स्यात् ?

उत्तरम्– सत्यम्, यदि विघ्नविरहवान् पुरुषोऽपि मङ्गलमाचरति तदा तु तत्कृतमङ्गलस्य निष्फलत्वमिष्टमेव। फलसाधनतानिश्चये एव जनानां प्रवृत्तिर्भवतीति मङ्गलस्य तदा अफलवत्त्वे कथं तत्र प्रवृत्तिः ? इति शङ्का तु नोचिता, विघ्नशङ्कया तत्र प्रवृत्त्युपपत्तेः।

न चात्र विघ्नध्वंसं प्रति मङ्गलस्य कारणताया बाधितत्वेन विघ्नध्वंसकामो मङ्गलमाचरेदिति शिष्टाचारानुमितश्रुतेः बाधितार्थविषयबोधकत्वेन अप्रामाण्यं स्यादिति आशङ्कनीयम्, सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्। यथा पापभ्रमेण कृतस्य प्रायश्चित्तस्य वेदबोधितत्वेऽपि न तद्बोधकवेदस्य अप्रामाण्यमङ्गीक्रियते तद्वद् अत्रापि विघ्नशङ्कया कृतस्य मङ्गलस्य निष्फलत्वेऽपि न श्रुतेरप्रामाण्यमापादयितुं शक्यते इत्यर्थः।

अत्र विघ्नसमानाधिकरणमङ्गलस्यैव विघ्नध्वंसं प्रति कारणत्वेन विघ्नविरहवता कृतस्य मङ्गलस्य निष्फलत्वेऽपि न दोष इति हृदयम्, अतो विघ्नसमानाधिकरणमङ्गलविघ्नध्वंसयोरेव कार्यकारणभावो विज्ञेयः। तथा च विघ्नविरहवता कृतस्य मङ्गलस्य निष्फलत्वेऽपि न तद्बोधकश्रुतेरप्रामाण्यम्।

विघ्नध्वंसं प्रति मङ्गलस्य कारणत्वमिति ये नव्याः स्वीकुर्वन्ति तेषां मते मङ्गलस्य न विघ्नध्वंससामान्यं प्रति कारणत्वम्, अपि तु विघ्नध्वंसविशेषं प्रत्येव। यतो हि विघ्नध्वंसत्वावच्छिन्नं प्रति मङ्गलस्य कारणत्वमेव व्यभिचरति। 'सर्वे विघ्नाः शमं यान्ति गणेशस्तवपाठतः' इत्यादिना गणेशस्तवपाठादेरपि विघ्नविनाशकत्वसिद्धेस्तत्र मङ्गलस्याभावेन व्यतिरेकव्यभिचारः स्पष्टः। एवं क्वचित् प्रायश्चित्तादिनापि विघ्नध्वंसो भवितुमर्हतीति विघ्नध्वंसविशेषं प्रत्येव मङ्गलस्य कारणत्वमङ्गीकरणीयम्। एवं च मङ्गलं विघ्नध्वंसं करोति, ततो बुद्धिप्रतिभादिकारणकलापैश्च समाप्तिर्जायते इति नवीनानां मतमेतादृशं फलितं भवति।

अत्रेदमपि ध्येयं यद् विघ्नस्य समाप्तिप्रतिबन्धकत्वेन समाप्तिप्रतिबन्धकनिवारणमात्रे मङ्गलं चरितार्थम्, तदेव च

तस्य फलम्। समाप्तिस्तु तदन्यबुद्धिप्रतिभादिकारणकलापैः सम्पत्स्यते। कार्यसामान्यं प्रति प्रतिबन्धकाभावस्यापि कारणत्वाङ्गीकाराद् यत्र विघ्नसत्त्वदशायां तन्नाशो मङ्गलेन जायते, तदापि प्रतिबन्धकाभावरूपकारणान्तरं सूपपन्नम्। यदा च विघ्न एव नास्ति, तदापि विघ्नात्यन्ताभावरूपप्रतिबन्धकाभावस्य सत्त्वेन समाप्तेरुपपत्तिः। एवं च प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वेन विघ्नात्यन्ताभावस्थलेऽपि समाप्तेरुपपत्तिरिति नव्यमते जन्मान्तरीयमङ्गलकल्पनस्यानिवार्यता न भवतीति लाघवम्।

समाप्तिरेव मङ्गलस्य फलमिति प्राचीनमते तु यत्र मङ्गलं विनापि समाप्तिर्दृश्यते, तत्रावश्यमेव जन्मान्तरीयं मङ्गलं कल्पनीयं भवति। विघ्नध्वंस एव मङ्गलस्य फलमिति नव्यमते तु जन्मान्तरीयमङ्गलस्य कल्पनमवश्यं करणीयं न भवति, तत्र विघ्नात्यन्ताभावस्यापि सम्भवादिति प्राचीनमतापेक्षया लाघवम्। तदेव लाघवमतं स्वीकृत्य व्यभिचारं वारयति- 'इत्थं च नास्तिकादिग्रन्थेषु...' इत्यादिना ग्रन्थकारः।

समाप्तिरेव मङ्गलस्य फलं वक्तव्यमिति प्रतिपादयतां प्राचीनानां तु अयमाशयो यद् विघ्ननाश एव मङ्गलस्य फलं स्यात्, तर्हि समाप्तिकामस्य पुरुषस्य मङ्गले प्रवृत्तिर्न स्यात्, अतो मङ्गलस्य फलं विघ्नध्वंसद्वारा समाप्तिरेव वक्तव्येति।

## अथ ईश्वरवादः

ईश्वरसाधकानुमानं प्रस्तौति ग्रन्थकारः-

**मुक्तावली- संसारेति। संसार एव महीरुहो वृक्षस्तस्य बीजाय = निमित्तकारणायेत्यर्थः। एतेन ईश्वरे प्रमाणमपि दर्शितं भवति। तथाहि- यथा घटादिकार्यं कर्तृजन्यम्, तथा क्षित्यङ्कुरादिकमपीति। न च तत्कर्तृत्वमस्मदादीनां सम्भवतीत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः। न च शरीराजन्यत्वेन कर्त्रजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यम्।**

**व्याख्या-** संसाररूपवृक्षस्य बीजरूपेण श्रीकृष्णचन्द्रस्य कारिकायां निर्देशेन 'ईश्वरो जगत उपादानकारणम्' इति भ्रमो मा भूदित्येतदर्थं न्यायमतेन बीजपदार्थं परिष्करोति ग्रन्थकारः- बीजाय = निमित्तकारणाय इति। अत्र बीजपदं न उपादानकारणपरम् (समवायिकारणपरम्) अपि तु निमित्तकारणपरमिति तात्पर्यम्। न्यायसिद्धान्तानुसारेण ईश्वरः संसारस्य निमित्तकारणमेव भवति। ग्रन्थकारेणात्र ईश्वरं जगत्कारणत्वेन निर्दिश्य ईश्वराख्यः पदार्थो वर्तते इति संसूच्य चार्वाकादीनामीश्वरानङ्गीकर्तृणां मतं निराक्रियते।

ननु ईश्वरो न प्रत्यक्षज्ञानस्य विषयः, तर्हि तस्य सिद्धिः केन प्रमाणेन क्रियते ? तत्राह ग्रन्थकारः- एतेन ईश्वरे

प्रमाणमपि दर्शितं भवतीति। ईश्वरं जगतो निमित्तकारणं भवतीति प्रतिपादनेन ईश्वरविषये प्रत्यक्षादिप्रमाणानामसामर्थ्यात् तत्साधकतयात्र अनुमानं प्रमाणं दर्शितं भवति। अनुमानमेव ईश्वरसद्भावे प्रमाणं भवतीति तात्पर्यम्।

प्रत्यक्षप्रमाणेन तस्यासिद्धत्वात्, शब्दप्रमाणे च अवैदिकेभ्योऽनाश्वासाद् (अविश्वासात्) अनुमानेन ईश्वरं साधयन्ति नैयायिकाः। अनुमानप्रयोगस्तु- "क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वाद् घटवद्"। अत्र क्षित्यङ्कुरादिकं पक्षः, कर्तृजन्यत्वं साध्यम्, कार्यत्वं हेतुः, घटो दृष्टान्तः। क्षित्यङ्कुरादिके पक्षे कार्यत्वहेतुना कर्तृजन्यत्वमत्र साध्यते।

अत्र अन्वयव्याप्तिः- यत्र यत्र कार्यत्वम्, तत्र तत्र कर्तृजन्यत्वम् (यथा घटः)। व्यतिरेकव्याप्तिः- यत्र कर्तृजन्यत्वं नास्ति, तत्र कार्यत्वमपि नास्ति (यथा आकाशः)। एवं क्षित्यङ्कुरादौ कार्यत्वहेतुना कर्तृजन्यत्वे सिद्धे, तत् कर्तृत्वमस्मदादीनां जीवानां न सम्भवतीति तत्कर्ता सर्वज्ञः सर्वशक्तिमान् ईश्वरः सिध्यति। कर्तृत्वं नाम- "स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्"। कस्यचित् कार्यस्य कर्ता स एव भवति यस्य समीपे त्रयो गुणाः स्युः १. ज्ञानम् (उपादानविषयकमपरोक्षज्ञानम्) २. चिकीर्षा (कार्यकरणेच्छा) ३. कृतिः (प्रयत्नः)। तादृशकृतिमत्त्वं चास्मदादीनामल्पशक्तिमतां जीवानां भवितुं न शक्नोतीति तत्कर्तृत्वेन ईश्वरः सिद्ध्यति।

अत्र चार्वाकाः प्रकृतानुमाने सत्प्रतिपक्षहेत्वाभासं दर्शयन्ति- 'क्षित्यङ्कुरादिकं कर्तृ-अजन्यं शरीराजन्यत्वाद् आकाशवत्' यच्च शरीरवता पुरुषेण न जन्यते तच्च कर्तृजन्यमपि न भवति, यथा आकाशस्तादृशो वर्तते तद्वत् क्षित्यङ्कुरादेरपि शरीराजन्यत्वेन तदपि कर्तृ-अजन्यमेवेति सत्प्रतिपक्षदोषप्रदातुराशयः।

सत्प्रतिपक्षस्य लक्षणं हि यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते सः सत्प्रतिपक्षः। यस्य हेतोः साध्याभावसाधको हेत्वन्तरहेतुर्भवति स हेतुः सत्प्रतिपक्षितो भवतीति अस्यार्थः। अत्र शरीराजन्यत्वेन हेतुना पक्षे क्षित्यङ्कुरादौ कर्तृ-अजन्यत्वसाधने सिद्धान्तपक्षस्यानुमाने विद्यमानः कार्यत्वहेतुः सत्प्रतिपक्षनामको दुष्टहेतुर्भवति। तथा चात्र प्रकृतानुमाने साध्याभावस्य कर्तृ-अजन्यत्वरूपस्य साधकरूपेण हेन्वन्तरस्य = अन्यहेतोः (शरीराजन्यत्वहेतोः) सत्त्वेन कार्यत्वहेतुः सत्प्रतिपक्षनामकदोषेण युक्तो भवतीति दुष्टहेतुर्जातः। तथा चायं हेतुः स्वसाध्यसाधनेऽसमर्थो भवतीति उक्तं भवति। तेन नोक्तानुमानेन क्षित्यङ्कुरादिपक्षे सकर्तृकत्वसिद्धिरिति तात्पर्यम्। अस्योत्तरं ग्रन्थकारः 'अप्रयोजकत्वात्' इत्यादिना ददाति। तत्स्वरूपं स्पष्टयन्नाह ग्रन्थकारः-

**मुक्तावली- अप्रयोजकत्वात्। मम तु कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एवानुकूलस्तर्कः। इत्थञ्च द्यावाभूमी जनयन् देव एको विश्वस्य कर्ता भुवनस्य गोप्ता इत्यादय आगमा अप्यनुसन्धेयाः।**

**व्याख्या-** अत्र समाधानमुच्यते उक्तानुमाने सत्प्रतिपक्षदोषो नास्ति। कुतः ? अप्रयोजकत्वात् = व्यभिचारशङ्का

निवारकतर्कशून्यत्वात्। उक्तानुमाने व्यभिचारशङ्कायां तन्निराकरणाय व्यभिचारनिवारकानुकूलतर्कस्य अभावेन उक्तानुमानं पक्षे साध्याभावसाधनाय समर्थं न भवतीति तात्पर्यम्।

सिद्धान्ते तु- पक्षे क्षित्यङ्कुरादौ कर्तृजन्यत्वसाधकानुमाने व्यभिचारशङ्कायां सत्यां तन्निवारकस्य अनुकूलतर्कस्य सत्त्वेन कर्तृजन्यत्वसाधको हेतुः सबलः। कर्तृ-अजन्यत्वसाधकानुमाने तु कर्तृ-अजन्यत्वसाधकहेतोः शरीराजन्यत्वस्य व्यभिचारशङ्कायां सत्यां तन्निवारकस्य अनुकूलतर्कस्यासत्त्वेन दुर्बलत्वात्, समबलयोरेव सत्प्रतिपक्षदोषस्य स्वीकारात्, अत्र तथाभावात् (समबलत्वाभावात्) सत्प्रतिपक्षदोषोऽत्र नास्तीत्यर्थः।

अयं भावः- 'हेतुरस्तु साध्यं मास्तु' इत्याशङ्का एव व्यभिचाराशङ्का उच्यते। प्रकृते च ईश्वरासाधकानुमाने 'कार्यत्वमस्तु कर्तृजन्यत्वं मास्तु' इति व्यभिचाराशङ्का भवति। ईश्वराभावसाधकानुमाने च 'शरीराजन्यत्वमस्तु कर्तृ-अजन्यत्वं मास्तु' इति व्यभिचाराशङ्का भवति। ईश्वरसाधकानुमाने कार्यत्वमस्तु कर्तृजन्यत्वं मास्तु इति व्यभिचारशङ्कायां तन्निवारकोऽनुकूलस्तर्को वर्तते। यथा- कार्यत्वं यदि कर्तृजन्यत्वव्यभिचारि स्यात् तर्हि कार्यं कर्तृजन्यं न स्यात् (कर्तृत्वेन कार्यत्वेन च द्वयोः कार्यकारणभावो न स्यात्)। तत्र न स्यादिति तु वक्तुं न शक्यते कार्यत्वस्य कर्तृत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकत्वात्। एवंविधकार्यकारणभावरूपतर्कस्य अत्रावतरणाद् ईश्वरसाधकानुमाने हेतुः सबलो वर्तते। यथा वा "पर्वतो वह्निमान् धूमात्" इत्यत्र "धूमोऽस्तु वह्निर्मास्तु" इति व्यभिचारशङ्कायां तन्निवारकतर्कस्य "धूमो यदि वह्निव्यभिचारी स्यात् तर्हि वह्निजन्यो न स्यात्" इत्येवंविधस्य कार्यकारणभावमूलकानुकूलतर्कस्य सत्त्वेन धूमहेतुः सबलः। अतः "पर्वतो वह्न्यभाववान् पाषाणमयत्वात्" इत्यादिना सत्प्रतिपक्षदोषोद्भावनेऽपि तस्य पाषाणमयत्वरूपदुर्बलेन हेतुना यथा न सत्प्रतिपक्षो दोषः तद्वत् प्रकृतेऽपि सत्प्रतिपक्षदोषो नास्ति। ईश्वराभावसाधकानुमाने तु "शरीराजन्यत्वमस्तु कर्तृ-अजन्यत्वं मास्तु" इति व्यभिचारशङ्कायाम् अनुकूलतर्कस्य अभावोऽस्ति, अतस्तस्य हेतुर्दुर्बलः। तथा चात्र सत्प्रतिपक्षदोषो नास्ति।

अनया रीत्या सत्प्रतिपक्षदोषनिरासनेन सह ईश्वरसिद्धिप्रक्रियां प्रस्तुत्य वेदप्रामाण्यवादी नैयायिक ईश्वरसद्भावविषये तस्य जगत्कर्तृत्वविषये च वेदाख्यः शब्दोऽपि प्रमाणं भवतीति प्रदर्शयति- "द्यावाभूमी जनयन् देव एकः" इत्यादिकम्। अत्रेयं श्रुतिरीश्वरं जगत्कर्तृत्वेन निरूपयति। "देव एकः" इत्यनेन तस्य एकत्वं च। "कर्ता भुवनस्य गोप्ता" इत्यादिना च य एव कर्ता स एव गोप्ता (पालकश्च) अस्तीति प्रदर्शयन्ती श्रुतिरीश्वरस्य सर्वज्ञत्वं सर्वसामर्थ्यं च संसूचयति।

## पदानामर्थपरिचयः

| | | |
|---|---|---|
| **चूडामणीकृतविधुः** | = | येन चन्द्रः शिरोभूषणत्वेन स्वीकृतः सः (भगवान् शङ्करः) |
| **भवः** | = | शङ्करः, (संसारस्य उत्पत्ति-स्थिति-लयकर्ता शिवः) |
| **लीलाताण्डवपण्डितः** | = | अनायासेन ताण्डवनृत्ये कुशलः |
| **मङ्गलम्** | = | विघ्नविनाशाय क्रियमाणं शुभकर्म |
| **व्यतिरेकव्यभिचारः** | = | कारणाभावे कार्यसत्त्वम् (तदभावे तत्सत्त्वम्) |
| **अन्वयव्यभिचारः** | = | कारणसत्त्वे कार्याभावः (तत्सत्त्वे तदभावः) |
| **अविगीतशिष्टाचारः** | = | शिष्टैः (विद्वद्भिः) क्रियमाणो निर्दोषो व्यवहारः |
| **लाघवम्** | = | कल्पनाया लघुत्वम् (सिद्धान्ते सुगमता) |
| **गौरवम्** | = | कल्पनाया आधिक्यम् (सिद्धान्ते क्लिष्टता) |
| **निमित्तकारणम्** | = | समवायि-असमवायिभ्यां भिन्नं कारणम् |
| **चिकीर्षा** | = | कार्यं कर्तुम् इच्छा |
| **कृतिः** | = | प्रयत्नः |
| **सत्प्रतिपक्षः** | = | हेतुगतदोषविशेषः |
| **अनुकूलतर्कः** | = | व्यभिचारशङ्कानिवारकोपयोगी तर्कः |

## अभ्यासः

### १. रिक्तस्थानानि पूरयत

(क) 'चूडामणीकृतविधुः' इत्यत्र विधुः नाम ________ ।

(ख) मङ्गलस्य ________ एव फलम् इति प्राञ्चो वदन्ति ।

(ग) कार्यसामान्यं प्रति ________ अपि कारणत्वम् अङ्गीक्रियते ।

(घ) ईश्वरो जगतः ________ कारणं वर्तते ।

(ङ) तर्कः ________ आवश्यकः ।

### २. उचितोत्तरे ( ✓ ) चिह्नेन अनुचितोत्तरे ( X ) इति चिह्नेन सङ्केतयत

(क) मङ्गलं विनापि नास्तिकानां ग्रन्थे समाप्तिर्दृश्यते । (________)

(ख) नव्यनैयायिकमते मङ्गलस्य फलं समाप्तिरस्ति । (________)

(ग) ईश्वरः प्रत्यक्षप्रमाणस्य विषयोऽस्ति । (________)

(घ) क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वादिति ईश्वरानुमानम् । (________)

(ङ) मङ्गलस्य कारणतायां व्यतिरेकव्यभिचारो नास्तिकादिग्रन्थेषु दृश्यते । (________)

### ३. सङ्क्षेपेण उत्तरयत

(क) त्रिविधं मङ्गलाचरणं किम् ?

(ख) 'सद्रव्या' इति पदस्य ग्रन्थपक्षे कोऽर्थः ?

(ग) प्राचीनमते मङ्गलस्य द्वारं किम् ?

(घ) कर्तृत्वस्य लक्षणं किम् ?

(ङ) ईश्वरसाधने कोऽनुकूलस्तर्कः ?

४. **व्याख्यात्मकमुत्तरं लिखत**

(क) प्राचीननव्यनैयायिकानां मते मङ्गलस्य फलविषये को भेदः ? लाघवगौरवदृष्ट्या स्पष्टयत।

(ख) ईश्वरसाधकानुमानं प्रस्तुत।

(ग) सत्प्रतिपक्षदोषः कथं वार्यते ? तत् स्पष्टयत।

५. **"किं मङ्गलं विना कार्यं सफलं भवति ?" इति विषये प्राचीननव्यमतयोः कक्षायां संवादं कुरुत।**

६. **'चूडामणीकृतविधुः' तथा 'सद्रव्या गुणगुम्फिता' इति श्लोकद्वयस्य सस्वरं वाचनं कुरुत।**

## *परियोजनाकार्यम्-*

"न्यायदर्शने ईश्वरसिद्धिः" इति विषये सखिभिर्विमर्शं विधाय निष्कर्षं प्रस्तुत।

तृतीयः पाठः

# द्रव्यादिपदार्थविभागः

पदार्थान् विभजितुमुपक्रमते ग्रन्थकारः-

**कारिका-** **द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम्।**
**समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः ॥ २ ॥**

**अन्वयः-** द्रव्यम्, गुणः, कर्म, सविशेषकं सामान्यम्, समवायः, तथा अभावः सप्त पदार्थाः कीर्तिताः।

**कारिकार्थः**– द्रव्यम्, गुणः, कर्म, समान्यम्, विशेषः, समवायः, अभाव इत्येवंरूपेण पदार्थाः सप्तविधा वैशेषिकशास्त्रे उक्ताः सन्ति।

शक्तिसादृश्ययोरतिरिक्तपदार्थत्वमाशङ्क्य निराकरोति-

**मुक्तावली- अत्र सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं प्राप्तम्, तेन भावत्वेन पृथगुपन्यासो न कृतः। एते च पदार्था वैशेषिकनये प्रसिद्धाः, नैयायिकानामप्यविरुद्धाः। प्रतिपादितं चैवमेव भाष्ये। अत एवोपमानचिन्तामणौ सप्तपदार्थभिन्नतया शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वमाशङ्कितम्। ननु कथमेत एव पदार्थाः ? शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वात्। तथाहि- मण्यादिसमवहितेन वह्निना दाहो न जन्यते, तच्छून्येन तु जन्यते, तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते, उत्तेजकेन मण्याद्यपसारणेन च जन्यते इति कल्प्यते। एवं सादृश्यमप्यतिरिक्तः पदार्थः, तद्धि न षट्सु भावेष्वन्तर्भवति, सामान्येऽपि सत्त्वात्, यथा गोत्वं नित्यम्, तथाऽश्वत्वमपीति सादृश्यप्रतीतेः। नाप्यभावे, सत्त्वेन प्रतीयमानत्वादिति चेद्- न, मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति स्वातन्त्र्येण मण्यभावादेरेव वा हेतुत्वं कल्प्यते, अनेनैव सामञ्जस्येऽनन्तशक्ति-तत्प्रागभाव-ध्वंस कल्पनानौचित्यात्। न चोत्तेजके सति प्रतिबन्धकसद्भावेऽपि कथं दाह इति वाच्यम्, उत्तेजकाभावविशिष्टमण्यभावस्य हेतुत्वात्।**

**व्याख्या-** महर्षिगौतमप्रणीतं न्यायशास्त्रं महर्षिकणादप्रणीतं च वैशेषिकशास्त्रं समानतन्त्रम् (एकशास्त्रम्) उच्यते। अतो न्यायशास्त्रे महर्षिगौतमेन प्रमाणादिषोडशपदार्थानामुल्लेखे विहितेऽपि वैशेषिकशास्त्रोक्तेषु द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावाख्येषु सप्तसु पदार्थेषु उक्तषोडशपदार्थानामन्तर्भावसम्भवेन

लाघवाद् युक्तियुक्तत्वाच्च वैशेषिकोक्ताः सप्तपदार्था अत्र विश्वनाथपञ्चाननेन न्यायसिद्धान्तमुक्तावलीग्रन्थे प्रतिपाद्यविषयत्वेनोक्ताः सन्ति।

**प्रश्नः-** ननु अन्यत्र पदार्थो द्विविधः, भावोऽभावश्च इत्येवंरीत्या लघुभूततया भावाभावभेदेन पदार्थानां विभागः कृतो दृश्यते। अत्र त्वयापि तथाविधो भावाभावभेदेन पदार्थानां विभागः कुतो न कृतः ?

**उत्तरम्-** अत्र द्रव्यगुणेत्यादिना प्रत्येकं सप्तपदार्थानां नामग्रहणेन सप्तमपदार्थस्य अभावत्वेन उल्लेखेनैव अन्येषां षण्णां पदार्थानां भावत्वं स्वतः प्राप्तं भवतीति उपर्युक्तप्रकारेण भावाभावभेदेन पृथगुपन्यासोऽत्र न कृतः।

अयं भावः- न्यायसूत्रे 'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभासच्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः' (न्या.सू. १/१/१) इत्यादिना तत्त्वज्ञानोपयोगिभूतानां षोडशपदार्थानां समुल्लेखेऽपि वैशेषिकशास्त्रोक्तद्रव्यगुणकर्मादिपदार्था अपि अस्माकं कृते न विरुद्धा भवन्तीति न्यायभाष्यकारेण वात्स्यायनेन प्रतिपादितत्वात्, तयोः समानतन्त्रत्वाच्चात्र ग्रन्थकारो वैशेषिक शास्त्रोक्तप्रक्रियानुरोधेनैव पदार्थानामुद्देशं करोति 'द्रव्यं गुणस्तथा कर्म...' इत्यादिना।

वैशेषिकशास्त्रोक्तानां पदार्थानां न्यायशास्त्रकारैरङ्गीकारादेव 'उपमानचिन्तामणौ' नव्यन्यायस्य प्रवर्तकेन गङ्गेशोपाध्यायेन सप्तपदार्थभिन्नतया शक्तिसादृश्यादिपदार्थानामतिरिक्तत्वमाशङ्क्य तत् खण्डितं प्राप्यते।

अत्राशङ्का- ननु कथं सप्तैव पदार्था उच्यन्ते ? शक्तिः सादृश्यं चातिरिक्तपदार्थौ स्तः। यतो हि एतौ उभावपि भवदुक्तेषु द्रव्य-गुण-कर्मादिषु सप्तसु पदार्थेषु नान्तर्भवतः। तथा हि चन्द्रकान्तमणेः सन्निधाने वह्निर्दाहं न जनयति, तदसन्निधाने तु जनयति इति दर्शनात् चन्द्रकान्तमणिः स्वसन्निहिते वह्नौ विद्यमानां दाहकशक्तिं नाशयति इति कल्प्यते। अथ च चन्द्रकान्तमणेः सन्निधानेऽपि उत्तेजकीभूतस्य सूर्यकान्तमणेः सन्निधाने वह्निः पुनर्दाहकार्यं जनयतीति तत्र शक्तिनामकः पदार्थो वर्तते इति सिद्धं भवति। पदार्थत्वेन सिद्धा च सा शक्तिर्द्रव्य-गुण-कर्मादिषु अनन्तर्भावात् सप्तपदार्थेभ्योऽतिरिक्ता वचनीया इति।

अनन्तर्भावप्रकारश्चेत्थम्- शक्तिर्न सामान्यविशेषसमवायरूपा जन्यत्वात्, न अभावरूपा भावत्वेनानुभवात्, न गुणकर्मणी तयोरपि वर्तमानात्। यदि शक्तिर्गुणरूपा कर्मरूपा वा भवेत्तर्हि तत्र शक्तिर्न तिष्ठेत्, गुणे कर्मणि च गुणकर्मणोः सत्त्वानङ्गीकारादिति तात्पर्यम्। न द्रव्यरूपा गुणादिष्वपि वर्तमानाद्। एवं रीत्या शक्तिः क्लृप्तेषु सप्तसु पदार्थेषु नान्तर्भूतेति साऽतिरिक्तपदार्थरूपेण ग्राह्येति।

एवं सादृश्यमपि अतिरिक्तपदार्थो वक्तव्यः। तथा हि- सादृश्यमपि न द्रव्यादिसद्भावपदार्थेषु अन्तर्भवितुमर्हति सामान्ये (जातौ) अपि सत्त्वात्। यथा "गोत्वं नित्यं तथा अश्वत्वमपि नित्यम्" इत्यनुभवात् सादृश्यस्य सामान्ये सत्त्वं सिद्धम्। यदि सादृश्यं सामान्यरूपं भवेत् तर्हि तत् सामान्ये न तिष्ठेत्, सामान्ये सामान्यस्यावृत्तित्वाङ्गीका रात्। सामान्ये द्रव्यगुणकर्माण्यपि न तिष्ठन्तीति सामान्ये सादृश्यस्य वर्तमानात् सादृश्यं न द्रव्य-गुण-कर्म-विशेष-

समवायादिरूपमिति सिद्धं भवति। भावत्वेन प्रतीतेरभावेऽपि तस्यान्तर्भावो भवितुं नार्हतीति अतिरिक्तपदार्थ एव स वचनीय इति पूर्वपक्षस्याशयः।

सिद्धान्तमतेन समाधानम्- शक्तिपदार्थसाधिका या युक्तिर्मीमांसकैः प्रदीयते सा युक्तिरेव वस्तुतो न समीचीना, अर्थात् चन्द्रकान्तमणिसन्निधाने वह्नौ दाहकताशक्तिर्नश्यति तदभावे तु जन्यते इति यदुच्यते तत्र मीमांसकैस्तावत् प्रथमं वह्नौ दाहकतानामिका स्वतन्त्रा शक्तिः कल्पनीया, तन्नाशकचन्द्रकान्तमण्यादिषु च (मणौ, मन्त्रे, औषधौ च) पुनः शक्तिनाशकतावच्छेदिकाः शक्तयः कल्पनीयाः, पुनस्तत्रैव उत्तेजकसूर्यकान्तमणिसन्निधाने वह्निर्दाहं जनयतीति दर्शनाद् वह्नौ पुनः शक्तिरुत्पन्नेति अङ्गीकरणीया। उत्पन्ना चेत् तस्य समवायिकारणनिमित्तकारणादिकं पुनः कल्पनीयम्, उत्पत्तेः प्राक् तत्प्रागभाव इत्यादिकं च सर्वं तत्र कल्पनीयं भवतीति मीमांसकमतेन तत्प्रदर्शितयुक्त्या अतिरिक्तशक्तिकल्पने महद् गौरवं भवति। अतस्तदपेक्षया दाहकार्यं प्रति मणेः प्रतिबन्धकतास्वीकारेण प्रतिबन्धकाभावस्य च कार्यसामान्यं प्रति कारणताभ्युपगमाद् मण्यभावविशिष्टस्य वह्नेरेव दाहं प्रति कारणत्वेन मणिसत्त्वे वह्निना दाहाजननं कारणाभावादेवास्ति इत्युक्त्वैव सामञ्जस्ये तत्र तया प्रक्रियया अतिरिक्तशक्तिकल्पनं नोचितमिति।

अयं भावः- प्रतिबन्धकसत्त्वे कारणेन कार्यजननादर्शनात् कार्यसामान्यं प्रति प्रतिबन्धकाभावस्य कारणत्वमवश्यमभ्युपेयम्।' यथोक्तमुदयनाचार्यैः- 'भावो यथा तथाभावः कारणं कार्यवन्मतः' इति। वह्निर्दाहं जनयति। दाहो हि वह्नेः कार्यम्। यथा दण्डेन घटजनने घटः कार्यम्, तस्य कारणं च दण्डः। वृष्टिसत्त्वे च दण्डो घटजनने समर्थो न भवतीति वृष्टेस्तत्र प्रतिबन्धकत्वं सिद्धम्। तदभावे दण्डेन कार्यजननात् प्रतिबन्धकाभावविशिष्टस्य दण्डस्यैव घटं प्रति यथा कारणत्वमङ्गीक्रियते, तद्वद् मणिमन्त्रौषधीनां सत्त्वे वह्निना दाहाकरणात् तदभावे तु करणात् तेषां दाहकार्यं प्रति प्रतिबन्धकत्वं सिद्धम्। तथा च तदभावस्य तत्र कारणत्वमायातं भवतीति प्रतिबन्धकाभावविशिष्टस्य वह्नेरेव दाहकारणत्वेन तदभावादेव मणिसन्निधानदशायां वह्निर्दाहकार्यजननेऽसमर्थोऽभूद् इत्येवंप्रकारेण समाधानसम्भवे तादृशस्थले अतिरिक्तशक्तिकल्पने महद्गौरवमिति भावः।

वस्तुतः शक्तिपदार्थो हि नातिरिक्तः, अपि तु स च कारणतावच्छेदकधर्मरूपः, अर्थात् कारणगता स्वरूपयोग्यता एव शक्तिः। लोकदृष्ट्या साधनानां समीचीनता एव सा इति वक्तुं शक्यम्। निशितः खड्गश्छेदने शक्तः। अनिशितश्च न शक्तः किल दृश्यते। अतः कारणानां सामीचीन्यमेव शक्तिपदार्थो नातिरिक्त इति नैयायिकानामाशयः।

**मुक्तावली- सादृश्यमपि न पदार्थान्तरम्, किन्तुं तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यमिति ।**

**व्याख्या-** एवं सादृश्यमपि नातिरिक्तपदार्थः। सादृश्यं नाम तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। तच्च 'इव' इत्यव्ययद्योत्यं भवति। अयमनेन सदृश इत्युच्यमाने द्वे वस्तुनी यन्मूलतया तोलयति लोकस्तदेव सादृश्यम्। तच्च उभयवस्तुगतासाधारणः समानो धर्म एव। स च बुद्धिविशेषविषयत्वरूपो नातिरिक्तः।

## द्रव्यविभागप्रकरणम्

द्रव्याणि विभजते-

**कारिका-** **क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः। द्रव्याणि-**

**अन्वयः-** क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनः मनः द्रव्याणि।

**कारिकार्थः–** क्षितिः = पृथिवी, अप् = जलम्, तेजः = अग्निः, वायुः = पवनः, व्योम = आकाशः, कालः = समयः, दिक् = दिशा, देही = आत्मा, मनः = चित्तम् एतानि नव द्रव्याणि भवन्तीत्यर्थः।

द्रव्यभेदनिदर्शनपूर्वकं द्रव्यत्वजातिसाधकानुमानं प्रस्तौति -

**मुक्तावली- द्रव्याणि विभजते- क्षित्यबित्यादि। क्षितिः पृथिवी, आपो जलानि, तेजो वह्निः, वायुर्मरुत्, व्योम आकाशः, कालः समयः, दिग् आशा, देही आत्मा, मन एतानि नव द्रव्याणीत्यर्थः। ननु द्रव्यत्वजातौ किं मानम् ? न हि तत्र प्रत्यक्षं प्रमाणम्, घृतजतुप्रभृतिषु द्रव्यत्वाग्रहादिति चेद् न, कार्यसमवायिकारणतावच्छेदकतया, संयोगस्य, विभागस्य वा समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धेरिति।**

**व्याख्या-** द्रव्याणि न्यायवैशेषिकशास्त्रे नवसङ्ख्याकानि उक्तानि। नवसु द्रव्येषु द्रव्यत्वं सामान्यधर्मो वर्तते। स च धर्मो जातिरूपः, परं तस्य सिद्धिश्च प्रत्यक्षेण प्रमाणेन भवितुं न शक्नोतीति प्रमाणान्तरेण = अनुमानेन तस्य सिद्धिः कार्या। नवद्रव्येषु विद्यमानस्य द्रव्यत्वस्य कुतो न प्रत्यक्षत्वमिति चेत् ? नवसु अपि द्रव्येषु न हि जनानां द्रव्यबुद्धिर्भवति, अतो द्रव्यत्वस्य प्रत्यक्षत्वं न वक्तुं शक्यम्। यदि द्रव्यत्वं प्रत्यक्षसिद्धं भवेत् तर्हि नवस्वपि द्रव्येषु आपामरान्तजनानां द्रव्यबुद्धिर्भवेत्, न च भवतीति द्रव्यत्वं प्रत्यक्षसिद्धमिति वक्तुं न शक्यम्, अतोऽनुमानेनैव तस्य सिद्धिः कार्या। तदेव च अनुमानप्रमाणं सन्दर्शयन् मूले लिखति ग्रन्थकारः- "कार्यसमवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिः" इति। कार्यस्य यत् समवायिकारणं भवति, तस्यावच्छेदकरूपेण द्रव्यत्वजातेः सिद्धिर्भवतीत्यर्थः।

अयं भावः- कार्यसामान्यं प्रति द्रव्यमेव समवायिकारणं भवति। 'समवायिकारणं द्रव्यस्यैवेति विज्ञेयम्' इति हि विश्वनाथः। कार्याणि पृथिवी-जल-तेजोवायूनां द्व्यणुकादयः, अनित्या गुणाः, कर्माणि च, सर्वाण्येतानि समवायसम्बन्धेन द्रव्येष्वेव जायन्ते। द्रव्यं च तादात्म्यसम्बन्धेन तान् प्रति कारणं भवति। कार्यकारणयोः सामानाधिकरण्यसम्पादनार्थं कारणतावच्छेदकसम्बन्धोऽत्र तादात्म्यं वर्तते इति बोद्धव्यम्। तथा च समवायसम्बन्धेन कार्यं प्रति तादात्म्यसम्बन्धेन द्रव्यं कारणमिति आयातम्। येन सम्बन्धेन कार्यं स्वकारणे तिष्ठति स सम्बन्धः कार्यनिष्ठकार्यताया अवच्छेदकः। प्रकृते च समवायसम्बन्धेन कार्याणां द्रव्यगुणकर्मादीनां स्वकारणे द्रव्ये वर्तमानत्वात् कार्यताया अवच्छेदकसम्बन्धो जातः समवायः। यः सम्बन्धो यस्यावच्छेदको भवति स तेन सम्बन्धेनावच्छिन्नो

भवतीति नियमाद् अत्र समवायसम्बन्धावच्छिन्ना कार्यता जाता। एवं कारणं स्वस्मिन्नेव तादात्म्येन विद्यमानं सत् कार्यं प्रति कारणं भवतीति कारणनिष्ठकारणताया अवच्छेदकसम्बन्धस्तादात्म्यसम्बन्धो जातः। यः सम्बन्धो यस्यावच्छेदको भवति स तेन सम्बन्धेनावच्छिन्नो भवतीति नियमानुरोधेन कारणता च तादात्म्यसम्बन्धावच्छिन्ना जाता। कार्यताकारणताधर्मयोः परस्परं निरूप्यनिरूपकभावसम्बन्धात् समवायसम्बन्धावच्छिन्नकार्यतानिरूपिता तादात्म्यसम्बन्धावच्छिन्ना द्रव्यनिष्ठा कारणता इति लब्धम्। सा च कारणता केनचिद्धर्मेणावच्छिन्ना भवति, निरवच्छिन्ना कारणता न भवति "या या कारणता सा सा किञ्चिद्धर्मावच्छिन्ना" इति नियमात्। तथा च द्रव्यनिष्ठा सा कारणता येन धर्मेणावच्छिन्ना भवति स एवावच्छेदको धर्मो द्रव्यत्वम्। अवच्छेदकधर्मस्यान्यूनानतिरिक्तवृत्तित्व नियमेन द्रव्यत्वस्यैवात्र कारणतावच्छेदकत्वमङ्गीकरणीयमिति कार्यसमवायिकारणतावच्छेदकतया द्रव्यत्वजातेः सिद्धिरिति ग्रन्थकर्तुराशयः। अनेनानुमानेन कारणतात्वहेतुना कार्यसमवायिकारणात्मके पक्षे किञ्चिद्धर्मावच्छिन्नत्वं साध्यते।

अनुमानप्रयोगश्चेत्थम्- कार्यसमवायिकारणता किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्, घटनिरूपितदण्डकारणतावत्। अत्र यः किञ्चिद्धर्मत्वेन गृहीतो वर्तते स एवान्यूनानतिरिक्तवृत्तिधर्मो द्रव्यत्वजातिरूपः। अवच्छेदकधर्मस्य अन्यूनानतिरिक्तवृतित्वनियमेन तादृशो धर्मो द्रव्यत्वरूपधर्म एव भवितुमर्हति नान्य इति कार्यसमवायिकारणतावच्छेदकत्वेन द्रव्यवृत्तिरन्यूनानतिरिक्तवृत्तिधर्मो द्रव्यत्वमिति सिद्धं भवति।

संयोगश्चतुर्विंशतिगुणेष्वन्यतमः, स च नवसु द्रव्येषु तिष्ठति। स नित्यानित्यवृत्तिः, सर्वत्रानित्यश्च। तस्य समवायिकारणं भवति द्रव्यम्। एवं च संयोगत्वावच्छिन्नं कार्यं प्रति द्रव्यस्यैव समवायिकारणत्वेन संयोगसमवायिकारणतावच्छेदकतयाऽपि द्रव्यत्वजातेः सिद्धिर्भवितुमर्हतीति द्रव्यत्वजातिसाधकं प्रकल्पान्तरं ग्रन्थकारः सन्दर्शितवान् संयोगस्य, विभागस्य वेत्यादिना।

विभुद्वयसंयोगाङ्गीकर्तृमते विभुद्वयसंयोगस्य नित्यत्वेन संयोगत्वधर्मस्य नित्यसंयोगेऽपि सत्त्वेन तस्य च कार्यतावच्छेदकत्वासम्भवाद् ग्रन्थकारस्तन्मतानुरोधेन विभागपर्यन्तमनुधावनं करोति- "विभागसमवायिकारणतावच्छेदकतया वा द्रव्यत्वजातिसिद्धिः" इत्यादिना। सिद्धिप्रक्रिया च पूर्ववद् बोद्धव्या।

तमसो दशमद्रव्यत्वमाशङ्क्य निराकरोति--

**मुक्तावली- ननु दशमं द्रव्यं तमः कुतो नोक्तम् ? तद्धि प्रत्यक्षेण गृह्यते। तस्य च रूपवत्त्वात् कर्मवत्त्वाच्च द्रव्यत्वम्। तद्धि गन्धशून्यत्वान्न पृथिवी। नीलरूपवत्त्वाच्च न जलादिकम्। तत्प्रत्यक्षे चाऽलोकनिरपेक्षं चक्षुः कारणमिति चेद् न, आवश्यकतेजोऽभावेनैवोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात्। रूपवत्ताप्रतीतिस्तु भ्रमरूपा। कर्मवत्ताप्रतीतिरप्यालोकापस**

**रणौपाधिकी भ्रान्तिरेव। तमसोऽतिरिक्तद्रव्यत्वे अनन्तावयवादिकल्पनागौरवं च स्यात्। सुवर्णस्य यथा तेजस्यन्तर्भावस्तथाऽग्रे वक्ष्यते।**

**व्याख्या-** ननु तमः (अन्धकारः) अपि एकं द्रव्यमस्ति। तच्च प्रकृतनवद्रव्येषु कुत्रापि नान्तर्भवतीति तस्य दशमद्रव्यत्वेन कथनं किमर्थं न्यायवैशेषिकशास्त्रे न कृतम् ? कुतो नवैव द्रव्याणि ? दशमस्यापि सत्त्वादिति प्रश्नाशयः।

तमसो द्रव्यत्वे प्रमाणं च वक्तुं शक्यते- 'क्रियावत्त्वं गुणवत्त्वं वा द्रव्यसामान्यस्य लक्षणम्' इति। तच्च लक्षणं तमसि वर्तते एव। "नीलं तमश्चलति" इति प्रतीतिसत्त्वात् तमसो रूपवत्त्वेन, 'तमश्चलति' इति प्रतीत्या च तस्य क्रियावत्त्वेन द्रव्यत्वं सिद्धं भवति। तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः कारणम्। द्रव्यत्वेन सिद्धं च तमो न नवसु द्रव्येषु अन्तर्भवतीति तस्यातिरिक्तपदार्थत्वमेव सिद्धं भवति।

नवसु द्रव्येषु अनन्तर्भावप्रकारश्चेत्थम्- नीलगुणाश्रयत्वेन क्रियाश्रयत्वेन च सिद्धं तमो न पृथिवीरूपं वक्तुं शक्यम्, तस्य निर्गन्धित्वात्, नीलरूपवत्त्वाच्च न तद् जलरूपं तेजोरूपं वा, रूपवत्त्वादेव वाय्वादिकमपि भवितुं न शक्नोति। तथा च तमो दशमं द्रव्यं सिद्धम्।

समाधानम्- लोके नीलरूपवत्त्वेन क्रियावत्त्वेन च प्रतीयमानं तमो वस्तुतो न द्रव्यम्, अपि तु तत् तेजोऽभावरूपम्। यत्र तेजोऽभावो भवति तत्रैव तम इति व्यवहारः, अतस्तमस्तेजसोऽभावरूपमेव। तमसोऽतिरिक्तद्रव्यकल्पने प्रमाणमेव नास्ति। यदपि प्रत्यक्षप्रमाणेन "नीलं तमश्चलति" इत्यादिकं तत्साधकप्रमाणमुच्यते, तद् वस्तुतो भ्रमरूपं न तु वास्तवम्।

न हि तमसि किञ्चन रूपं भवति न वा काचन क्रिया। यथा "नीलं नभः" इति प्रतीतेः नीलत्वाभाववति नभसि नीलत्वप्रकारकज्ञानत्वेन भ्रमरूपत्वम्, तद्वदत्रापि नीलरूपाभाववति तेजोऽभावरूपपदार्थे नीलत्वप्रकारकज्ञानत्वेन भ्रमरूपत्वमेव। एवं क्रियाप्रतीतिरपि भ्रान्तिरूपैव। "नीलं तमश्चलति" इति प्रतीतेरालोकापसरणक्रियोपाधिकृतत्वेन आलोकगतक्रियाया एव तत्र भानात् क्रियावत्त्वप्रतीतिस्तस्य। वस्तुतः क्रिया च न तस्य (तमसः) अपि तु आलोकस्य अस्तीति तात्पर्यम्।

शङ्का- ननु तमसस्तेजोऽभावरूपत्वेनैव उपपत्तेस्तमसोऽतिरिक्तद्रव्यत्वकल्पना नावश्यकीति उच्यते चेत्, तेज एव तमसोऽभावरूपं भवतु। एवं वैपरीत्येन कुतो वक्तुं न शक्यते ? न हि अत्र काचन विनिगमना वर्तते इति शङ्कायामुच्यते-

समाधानम्- भवदुक्तरीत्या वैपरीत्यं तु न वक्तुं शक्यते। अत्र विनिगमनायाः सत्त्वात्। अत्र तमसो द्रव्यत्वमङ्गीकृत्य तेजसस्तमोऽभावरूपत्वाङ्गीकारे प्रत्यक्षसिद्धस्य उष्णस्पर्शगुणस्य आश्रयद्रव्यत्वेन पुनर्द्रव्यान्तरं कल्पनीयमेव भवति। न हि प्रसिद्धानि पृथिव्यादिद्रव्याणि उष्णस्पर्शस्य आश्रयभूतानि भवितुमर्हन्ति। तथा च पुनरुष्णस्पर्शाश्रयत्वेन

द्रव्यान्तरं कल्पनीयमेव भवतीति तत्कल्पने गौरवमेव समायातम्। तमसस्तेजोऽभावरूपत्वे च न किञ्चित् कल्पनीयमिति तेजसो द्रव्यरूपत्वाङ्गीकर्तृमते एव विनिगमनायाः सत्त्वेन तमसस्तेजोऽभावरूपत्वकल्पनेन लाघवं भवति। किं च सुवर्णं तेजोद्रव्यमिति अग्रे वक्ष्यमाणमस्ति। एवं च भावरूपत्वेन प्रत्यक्षसिद्धस्य तेजोरूपसुवर्णाख्यद्रव्यस्य सत्त्वे कथं तेजसस्तमसोऽभावरूपत्वं वक्तुं शक्येत। कथमपि तन्न सम्भवतीति तमसस्तावदालोकाभाववत्त्वमङ्गीक्रियते।

## *पदानामर्थपरिचयः*

| | | |
|---|---|---|
| **भावत्वम्** | = | भावरूपेण प्रतीतिविषयत्वम् |
| **समवायिकारणम्** | = | यस्मिन् कार्यं समवायेन उत्पद्यते तत् (यथा तन्तवः पटस्य) |
| **कारणतावच्छेदकम्** | = | कारणताया नियामको धर्मः (यथा दण्डत्वं दण्डनिष्ठकारणताया अवच्छेदकम्) |
| **तादात्म्यसम्बन्धः** | = | अभेदसम्बन्धः |
| **औपाधिकी** | = | उपाधिना जायमाना प्रतीतिः |
| **कार्यसमवायिकारणतावच्छेदकम्** | = | समवायिकारणताया नियामको धर्मः |
| **गौरवम्** | = | अनावश्यककल्पनाबाहुल्यम् |
| **प्रतिबन्धकता** | = | कार्योत्पत्तौ विरोधित्वम् (यथा- दाहं प्रति मणेः प्रतिबन्धकत्वम्) |
| **प्रकल्पान्तरम्** | = | एकस्य विषयस्य सिद्धये दत्तो द्वितीयः प्रकारः |
| **उपपत्तिः** | = | निर्वाहः |
| **कार्यकारणभावः** | = | कार्यत्वम्, कारणत्वम् |
| **जतु** | = | लाक्षा |
| **ग्रहः** | = | ज्ञानम् |

## अभ्यासः

### १. रिक्तस्थानानि पूरयत

(क) द्रव्याणि न्यायवैशेषिकमतानुसारेण _________ सङ्ख्याकानि सन्ति।

(ख) _________ इति गुणः कार्यत्वात् समवायिकारणतया द्रव्यत्वं साधयति।

(ग) तमो वस्तुतो द्रव्यं न, अपि तु _________ रूपम् अस्ति।

(घ) _________ स्पर्शवत्त्वात् तेजसो द्रव्यत्वं सिद्धम्।

(ङ) नित्यसंयोगाङ्गीकर्तृमते _________ समवायिकारणतया द्रव्यत्वजातिसिद्धिर्भवति।

### २. लघूत्तराणि देयानि

(क) नवद्रव्येषु द्रव्यत्वजातेः प्रत्यक्षं किमर्थं न भवति ?

(ख) 'कार्यसमवायिकारणं द्रव्यस्यैवेति' नियमः कस्य ग्रन्थकारस्य ?

(ग) विभागस्य समवायिकारणत्वेन द्रव्यत्वसिद्धिः किमर्थं न्याय्या ?

(घ) मीमांसकमते तमसो दशमद्रव्यत्वे कारणद्वयं किम् ?

(ङ) नैयायिकास्तमसि नीलरूपं किमर्थं न मन्वते ?

### ३. परस्परं मेलयत

| | |
|---|---|
| मङ्गलस्य द्वारं प्राचीनमते | उष्णस्पर्शवत्त्वम् |
| तमसः स्वरूपम् | जगतो निमित्तकारणम् |
| तेजसो लक्षणम् | तेजोऽभावरूपवत्वम् |
| ईश्वरः | विघ्नध्वंसः |
| द्रव्यत्वजातिसिद्धिः | कार्यसमवायिकारणतावच्छेदकतया |

४. व्याख्यानं कुरुत

(क) तमसोऽतिरिक्तद्रव्यत्वशङ्कां निवारयत।

(ख) द्रव्यत्वजातिसाधनप्रकारं निदर्शयत।

(ग) "नीलं तमश्चलति" इति प्रतीतेर्नैयायिकाः कथं समाधानं कुर्वन्ति ? निदर्शयत।

(घ) विनिगमनायाः साहाय्येन 'तेजस्तमोऽभावरूपम्' इति पूर्वपक्षं खण्डयित्वा 'तमस्तेजोऽभावरूपम्' इति सिद्धान्तं स्थापयत।

५. अधोलिखितसाध्यपक्षहेतून् संयोज्य पञ्चावयववाक्यैः पूर्णमनुमानं शिक्षकसहायेन रचयत।

(पक्षः- क्षित्यङ्कुरादिकम्, साध्यम्- कर्तृजन्यत्वम्, हेतुः- कार्यत्वम्, उदाहरणम्- घटवत्)

६. द्वयोश्छात्रयोः संवादं रचयत, यत्र एको मीमांसकः शक्तिपदार्थं साधयति, अपरश्च नैयायिकः सन् प्रतिबन्धकाभावेन तस्य खण्डनं करोति।

७. 'प्रतिबन्धकता', 'उत्तेजकत्वम्' इत्यनयोर्द्वे उदाहरणे अन्विष्य लिखत।

(यथा- वृष्टिर्गमनं प्रति प्रतिबन्धिका, छत्रं च तत्रोत्तेजकम्)।

८. आलोकापसरणौपाधिकीं भ्रान्तिं सरलोदाहरणेन स्पष्टं कुरुत।

## *परियोजनाकार्यम्-*

"तमः द्रव्यमभावो वा ?" इति विषये पूर्वपक्षसिद्धान्तपक्षयोराधारेण चर्चां विधाय तन्निष्कर्षं कक्षायां प्रस्तुत।

चतुर्थः पाठः

# गुणकर्मविभागप्रकरणम्

अथ गुणकर्मविभाजकानि पद्यानि प्रस्तौति ग्रन्थकारः-

**कारिका-** **अथ गुणा रूपं रसो गन्धस्ततः परम् ॥ ३ ॥**
**स्पर्शः सङ्ख्या परिमितिः पृथक्त्वं च ततः परम् ।**
**संयोगश्च विभागश्च परत्वं चापरत्वकम् ॥४ ॥**
**बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम् ।**
**द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥ ५ ॥**

**अन्वयः-** अथ गुणाः रूपम्, रसः, गन्धः, स्पर्शः, सङ्ख्या, परिमाणम् , पृथक्त्वम् च, ततः परम् संयोगः च, विभागः, च, परत्वं च अपरत्वकम्, बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, यत्नः, गुरुत्वकम्, द्रवत्वम्, स्नेहः, संस्कारः, अदृष्टम्, शब्द एव च ।

**कारिकार्थः-** रूपम्, रसः, गन्धः, स्पर्शः, सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, यत्नः, गुरुत्वम्, द्रवत्वम्, स्नेहः, संस्कारः, अदृष्टम् (धर्माधर्मौ), शब्द एते चतुर्विंशतिर्गुणा भवन्तीत्यर्थः ।

**मुक्तावली- अथ गुणा इति। एते गुणाश्चतुर्विंशतिसङ्ख्याकाः कणादेन कण्ठतः, चशब्देन च दर्शिताः । तत्र गुणत्वजातिसिद्धिरग्रे वक्ष्यते ।**

**व्याख्या**— एतेषां चतुर्विंशतिसङ्ख्याकानां रूपरसादीनां गुणत्वं च महर्षिकणादेन वैशेषिकसूत्रे कण्ठतः 'च' शब्देन च दर्शितं वर्तते । तथाहि सूत्रम्- "रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः" (वै.सू. १/१/६) । अत्र सप्तदशगुणाः कण्ठतः सूत्रकारेण उक्ताः, अवशिष्टाः 'प्रयत्नाश्च' इत्यत्र पठितेन 'च' शब्देन निर्दिश्यन्ते । अत्र गुरुत्व-द्रवत्व-स्नेह-संस्कार-धर्म-अधर्म-शब्दाश्च 'च' शब्देन समुच्चीयन्ते । अवशिष्टा गुणाः सप्तैव कुतः ? कुतो न ततोऽधिका न्यूना वेति तु नाशङ्कनीयम् । सूत्रे सङ्कीर्तितेभ्यः सप्तदशगुणेभ्योऽतिरिच्य एतेषां गुरुत्व-द्रवत्व-स्नेह-संस्कार-धर्माधर्म-शब्दानामपि 'च' शब्देन समुच्चयो विधेय इति प्रशस्तपादाचार्येण भाष्ये तथैवोक्तत्वात् तानपि क्रोडीकृत्य आहत्य चतुर्विंशतिसङ्ख्याका गुणा उच्यन्ते । एतेषु चतुर्विंशतिगुणेषु गुणत्वनामिका जातिर्भवति ।

**कारिका-** **उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा।**

**प्रसारणं च गमनं कर्माण्येतानि पञ्च च ॥ ६ ॥**

**भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च।**

**तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥ ७ ॥**

**अन्वयः-** उत्क्षेपणं ततः अपक्षेपणम्, तथा आकुञ्चनम् प्रसारणं च गमनं च एतानि पञ्च कर्माणि। भ्रमणं रेचनं स्यन्दनोर्ध्वज्ज्वलनम् एव च तिर्यग्गमनम् अपि अत्र गमनादेव लभ्यते।

**कारिकार्थः**– उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनम्, प्रसारणम्, गमनम् इत्येतानि पञ्चविधानि कर्माणि भवन्ति। भ्रमणरेचनस्यन्दनोर्ध्वज्वनतिर्यग्गमनेत्यादिकानि यानि कर्माणि प्रसिद्धानि सन्ति तानि तु गमने एवान्तर्भवन्तीत्यर्थः।

**मुक्तावली- कर्माणि विभजते- उत्क्षेपणमिति। कर्मत्वजातिस्तु प्रत्यक्षसिद्धा। एवमुत्क्षेपणत्वादिकमपि ॥ ६ ॥ ननु भ्रमणादिकमपि पृथक्कर्म अधिकतया कुतो नोक्तमत आह- भ्रमणमिति ॥ ७ ॥**

**व्याख्या**– एतेषु पञ्चस्वपि कर्मसु विद्यमाना कर्मत्वजातिस्तु प्रत्यक्षसिद्धा अङ्गीक्रियते। द्रव्यत्वजातिसिद्धौ इव तदर्थमनुमानप्रमाणस्य आवश्यकता नास्ति। पञ्चस्वपि कर्मसु कर्मेति व्यवहारस्य सत्त्वेन तद्गता जातिः प्रत्यक्षा भवतीत्यभिप्रायः। यद्वस्तु येनेन्द्रियेण गृह्यते तद्गता जातिस्तदभावश्च तेनैवेन्द्रियेण गृह्यते इति नियमात्। यथा कर्मत्वजातिः प्रत्यक्षसिद्धा तद्वद् एकैकश उत्क्षेपणत्वम् अपक्षेपणत्वम् इत्यादिजातयोऽपि प्रत्यक्षसिद्धा भवन्ति।

## सामान्यविशेषसमवायप्रकरणम्

सामान्यं निरूपयति ग्रन्थकारः-

**कारिका-** **सामान्यं द्विविधं प्रोक्तं परं चापरमेव च।**

**द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥ ८ ॥**

**परभिन्ना तु या जातिः सैवापरतयोच्यते।**

**द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥ ९ ॥**

**व्यापकत्वात् पराऽपि स्याद् व्याप्यत्वादपराऽपि च।**

**अन्वयः-** सामान्यं द्विविधं प्रोक्तं परम् च अपरम् एव च द्रव्यादित्रिकवृत्तिः तु सत्ता परतया उच्यते। द्रव्यत्वादिकजातिः तु परापरतया उच्यते। व्यापकत्वात् परा अपि स्याद् व्याप्यत्वाद् अपरा अपि।

**कारिकार्थः-** सामान्यं (जातिः) परापरभेदेन द्विविधं प्रोक्तमस्ति वैशेषिकशास्त्रे। द्रव्यगुणकर्मसु त्रिषु विद्यमानं सामान्यं परसामान्यमुच्यते। तस्यैवापरं नाम सत्ता अस्ति। परभिन्नं च अपरसामान्यम् (अपरा जातिः) उच्यते। द्रव्यत्वगुणत्वादिकं सामान्यं तु परमपि अपरमपि भवति। घटत्व-रूपत्वादिकापेक्षया द्रव्यत्वगुणत्वादीनां परत्वात् (व्यापकत्वात्) परसामान्यम्। सत्तापेक्षया अपरत्वात् (व्याप्यत्वात्) अपरसामान्यं तद्भवति।

**मुक्तावली- सामान्यं निरूपयति- सामान्यमिति। तल्लक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वम्। अनेकसमवेतत्वं संयोगादीनामप्यस्तीत्यत उक्तं- नित्यत्वे सतीति। नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्तीत्यत उक्तमनेकेति। नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावेऽप्यस्ति, अतो वृत्तित्वसामान्यं विहाय समवेतत्वमित्युक्तम्।**

एकव्यक्तिमात्रवृत्तिस्तु न जातिः। तथा चोक्तम्-

**व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।**
**रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः॥**

**परत्वम्-अधिकदेशवृत्तित्वम्, अपरत्वम्-अल्पदेशवृत्तित्वम्। सकलजात्यपेक्षया सत्ताया अधिकदेशवृत्तित्वात् परत्वम्, तदपेक्षया चान्यासां जातीनामपरत्वम्। पृथिवीत्वाद्यपेक्षया द्रव्यत्वस्याधिकदेशवृत्तित्वाद् व्यापकत्वात् परत्वम्, सत्तापेक्षयाऽल्पदेशवृत्तित्वादव्याप्यत्वादपरत्वम् ॥**

**व्याख्या**— नित्यत्वे सति अनेकसमवेतत्वं सामान्यस्य लक्षणम्। यन्नित्यं सद् अनेकेषु समवायसम्बन्धेन वर्तते तत् सामान्यमस्तीत्यर्थः। यथा सत्ता-द्रव्यत्व-घटत्वादिजातयो नित्याः सत्योऽनेकेषु समवायसम्बन्धेन वर्तन्ते (सत्ता– द्रव्यगुणकर्मसु त्रिषु, द्रव्यत्वं नवद्रव्येषु, घटत्वं सकलघटेषु) इति नित्यत्वे सति अनेकसमवेतत्वलक्षणं सत्ताद्रव्यत्वघटत्वादिषु गतमिति लक्षणसमन्वयः। उक्तलक्षणे च नित्यत्वे सतीति सत्यन्तदलं विशेषणमस्ति चेद् अनेकसमवेतत्वदलं विशेष्यमस्ति। अत्रानेकसमवेतत्वमात्रोक्तौ अनेकसमवेतत्वस्य संयोगादिगुणेष्वपि सत्त्वेन तत्रेदं लक्षणमतिव्याप्तं भवेदिति नित्यत्वे सतीति विशेषणदलं देयम्। तथा च संयोगस्य नित्यत्वाभावादतिव्याप्तिर्न भवति। एवं विशेषणदलमात्रस्य सामान्यलक्षणत्वे आकाशादौ इदं लक्षणमतिव्याप्तं स्यादतोऽनेकसमवेतत्वदलं देयम्। आकाशादिनित्यद्रव्याणां कुत्रापि समवेतत्वाभावाद् नातिव्याप्तिः। नित्यत्वे सति समवेतत्वम् एतावन्मात्रस्य सामान्यलक्षणत्वे आकाशपरिमाणादिषु पुनरतिव्याप्तिर्भवतीति अनेकेति पदमपि तत्र योजनीयम्। अनेकेति पददाने आकाशपरिमाणादीनामनेकत्वाभावेन तत्र नातिव्याप्तिः।

समवेतपदस्य स्थाने वृत्तित्वपददाने अर्थाद् नित्यत्वे सति अनेकवृत्तित्वं सामान्यस्य लक्षणमित्येवमुच्यमाने यद्यपि पूर्वोक्तस्थलेषु कुत्रापि लक्षणस्य नातिव्याप्तिस्तथापि अत्यन्ताभावस्यापि नित्यत्वेन अनेकेषु स्वरूपसम्बन्धेन

वृत्तित्वाच्च तत्र लक्षणस्य पुनरतिव्याप्तिः स्यादिति तद्वारणाय 'समवेत' इत्येव पदं तत्र योजनीयम्। तथा च अभावस्य कुत्रापि समवेतत्वाभावेन न दोषः। एवं नित्यत्वे सति अनेकसमवेतत्वं सामान्यम् इदं सामान्यस्य समीचीनं लक्षणमिति स्थितम्।

अत्रेदं ध्येयम्- एकव्यक्तिवृत्तिस्तु जातिर्न भवति। यथा आकाशत्वं कालत्वमित्यादिकम्। अत्र न्यायवैशेषिकशास्त्रे षड्विधानि स्थलानि जातिबाधकरूपेण परिगणितानि सन्ति। तेषु षट्सु स्थलेषु जातिर्नाङ्गीक्रियते। यत्र व्यक्तिषु अभेदो वर्तते, यत्र तुल्यता अस्ति, यत्र साङ्कर्यमस्ति, यत्र अनवस्था भवति, यत्र स्वरूपहानिर्भवति, यत्र च कश्चन सम्बन्ध एव न भवति। तथा हि उक्तम्–

**व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।**

**रूपहानिरसम्बद्धो जातिबाधकसङ्ग्रहः॥**

अत्र प्रथमस्योदाहरणं भवति आकाशत्वकालत्वादिकम्। अत्र आकाशकालादिव्यक्तीनामेकत्वेन (अनेकत्वाभावेन) आकाशत्वकालत्वादीनाम् एकव्यक्तिमात्रवृत्तित्वात् तेषां न जातित्वमङ्गीक्रियते।

द्वितीयस्योदाहरणं भवति घटत्वं कलशत्वं च। अत्र घटत्वकलशत्वयोस्तुल्यव्यक्तिवृत्तित्वेन पृथक् पृथग् जातिरूपत्वं नाङ्गीक्रियते। तुल्यत्वं च जातिभेदे बाधकं न तु जातिबाधकमिति बोद्धव्यम्।

तृतीयस्योदाहरणं भवति भूतत्वं मूर्तत्वं च। परस्परविरोधिभूतयोर्भूतत्वमूर्तत्वयोर्धर्मयोः पृथिवीजलतेजोवायुषु एकत्र साङ्कर्याद् जातित्वं नाङ्गीक्रियते।

चतुर्थस्योदाहरणं भवति सामान्यत्वम्। सामान्यं नाम जातिः। सा च द्रव्यगुणकर्मसु वर्तते इति पूर्वमुक्तम्। सामान्ये सामान्यमङ्गीकरणीयं वा न वेति प्रश्ने सामान्येऽपि सामान्यस्य स्वीकारे अर्थाज्जातौ पुनर्जातिस्वीकारे अनवस्था भवतीति अनवस्थाभयेन जातौ (सामान्ये) जातिर्नाङ्गीक्रियते।

पञ्चमस्योदाहरणं भवति विशेषत्वम्। यथा सकलघटेषु घटत्वं जातिरङ्गीक्रियते तद्वद् विशेषपदार्थेषु विशेषत्वनामिका जातिर्नाङ्गीक्रियते। तस्य स्वतो व्यावर्तकत्वरूपस्वरूपस्य हानिभयात्।

षष्ठस्योदाहरणं भवति अभावत्वम्। अभावे अभावत्वनामिका जातिर्नाङ्गीक्रियते। अभावस्य कुत्रापि (समवायसम्बन्धेन) असम्बन्धात्।

विशेषं निरूपयति ग्रन्थकारः-

**कारिका- अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः॥ १०॥**

**अन्वयः-** अन्त्यः नित्यद्रव्यवृत्तिः विशेष: परिकीर्तित: ।

**कारिकार्थः-** अन्ते भवः अन्त्यः, सर्वान्तिमे विद्यमान इत्यर्थः । अथ च नित्यद्रव्येषु वर्तमानो यः स विशेषपदार्थरूपेण वैशेषिकशास्त्रे परिकीर्तितो वर्तत इत्यर्थः ।

**मुक्तावली- विशेषं निरूपयति- अन्त्य इति। अन्तेऽवसाने वर्तत इत्यन्त्यः, यदपेक्षया विशेषो नास्तीत्यर्थः। घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात् परस्परं भेदः, परमाणूनां परस्परं भेदसाधको विशेष एव, स तु स्वत एव व्यावृत्तः। तेन तत्र विशेषान्तरापेक्षा नास्तीत्यर्थः ।।**

**व्याख्या-** अन्ते अर्थात् पदार्थानामवयवधाराया यत्र विश्रान्तिः (परमाणुषु) तत्र वर्तमान इति अन्त्यः। तस्य च विशेषस्याकाशादिषु नित्यद्रव्येषु वर्तमानाद् नित्यद्रव्यवृत्तित्वम्। स्वतो व्यावर्तकत्वविशेषाच्च विशेषः। यस्य च भेदकोऽन्यो नास्तीत्यभिप्रायः। स च वैशेषिकशास्त्रे पञ्चमपदार्थरूपेण अङ्गीकृतो वर्तते।

घटादीनां सावयवपदार्थानां परस्परं भेदका हि तेषां तेषां स्वीयाः स्वीया अवयवा भवन्ति, परन्तु अवयवधाराया यत्र परमाणुषु विश्रान्तिः तेषां परमाणूनां परस्परं भेदकस्याभावेन तेषां परस्परं भेदकरूपेण विशेषपदार्थस्य अवश्यमङ्गीकर्तव्यत्वेन अन्ते सर्वावसाने वर्तमानत्वात् तेषाम् अन्त्य इति नाम। इतरेभ्यो व्यावर्तकत्वात् स्वात्मानमितरेभ्यो व्यावृत्तत्वाच्च विशेष इति तदीयं नाम परिकल्पितमस्ति महर्षिकणादेन।

समवायं निरूपयति ग्रन्थकारः-

**कारिका-** **घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः।**
**तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ।। १३ ।।**

**अन्वयः-** कपालादौ घटादीनाम्, गुणकर्मणोः द्रव्येषु, तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः।

**कारिकार्थः** घटपटादीनां पदार्थानां स्वस्वावयवेषु कपाल-तन्तु-आदिषु यः सम्बन्धः, द्रव्येषु गुणकर्मणोश्च यः सम्बन्धः, द्रव्यगुणकर्मसु च जातेर्यः सम्बन्धः, सः समवायनाम्ना वैशेषिकशास्त्रे परिकीर्तितो वर्तते।

**मुक्तावली- समवायं दर्शयति- घटादीनामिति। अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः। समवायत्वं नित्यसम्बन्धत्वम्। तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वाद् दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानेन संयोगादिबाधात् समवायसिद्धिः। न च स्वरूपसम्बन्धेन सिद्धसाधनम्, अर्थान्तरं वा। अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवात्, लाघवादेकसमवायसिद्धिः। न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसङ्गः, तत्र रूपसमवायसत्त्वेऽपि रूपाभावात्। न चैवमभावस्याऽपि वैशिष्ट्यं सम्बन्धान्तरं सिद्ध्येदिति**

**वाच्यम्। तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात्, घटाभावस्य तत्र सत्त्वात्, तस्य च नित्यत्वात्, अन्यथा देशान्तरेऽपि घटाभावप्रतीतिर्न स्यात्, वैशिष्ट्यस्य च तत्र सत्त्वात्। मम तु घटे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः। वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तवैव गौरवम्। एवं च तत्तत्कालीनं तत्तद्भूतलादिकमेव तत्तदभावानां सम्बन्धः ॥**

**व्याख्या-** अवयवावयविनोः, जातिव्यक्त्योः, गुणगुणिनोः, क्रियाक्रियावतोः, नित्यद्रव्यविशेषद्रव्ययोश्च मध्ये यः सम्बन्धो भवति स सम्बन्धः समवायाख्यः। समवायसम्बन्धो हि नित्यो भवति, अतो नित्यसम्बन्धत्वं समवायत्वमिति तल्लक्षणं फलितं भवति। अयं समवायसम्बन्धो हि प्रत्यक्षगोचरो न भवतीति वैशेषिकदर्शने उच्यते, तस्य सिद्धिश्च अनुमानप्रमाणेन भवति। तथा च समवायस्य सम्बन्धत्वेन सिद्धिरनुमानप्रमाणेन वक्तव्येति फलितम्।

तत्र अनुमानप्रयोगश्च इत्थम्- "गुणक्रियादिविशिष्टा बुद्धिः विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वाद् दण्डी पुरुष इति विशिष्टबुद्धिवत्"। या या विशिष्टा बुद्धिः सा सा विशेषणविशेष्यसम्बन्धावगाहिनी, यथा दण्डी पुरुष इति विशिष्टबुद्धिरिति दृष्टान्तेन गुणक्रियादिविशिष्टा बुद्धिरपि नूनं विशेष्यविशेषणसम्बन्धविषयत्वेन भवितव्येति तत्र प्रदर्शितायां व्याप्तौ अव्यभिचरितत्वग्रहाद् गुणक्रियादिविशिष्टबुद्ध्यापि विशेषणविशेष्यसम्बन्धावगाहित्वेन नूनं भाव्यमिति सिद्ध्यति। अनेनानुमानेन विशेष्यविशेषणयोर्मध्ये यः सम्बन्धः सिद्ध्यति तत्र संयोगसम्बन्धस्य बाधेन स सम्बन्धः समवायः सिद्ध्यति।

अयं भावः- द्रव्ययोरेव संयोग इति नियमाद् द्रव्यगुणयोः, क्रियाद्रव्ययोः, जातिव्यक्त्योरादिषु संयोगसम्बन्धस्य बाधेन तद्विलक्षणस्य सम्बन्धस्य सिद्धिर्भवति। स च समवायाख्यः सम्बन्धो भवतीत्यर्थः।

प्रश्नः- अत्र संयोगस्य सम्बन्धत्वबाधेऽपि तद्विलक्षणसम्बन्धेन स्वरूपतादात्म्यादिसम्बन्धानां सिद्धिर्भवतु, अलं समवायाख्यसम्बन्धकल्पनेन, तथा च सिद्धसाधनम्, अर्थान्तरं वा दोषः स्यात् ।

उत्तरम्- अत्रोच्यते, अत्र मीमांसकमते सिद्धेन स्वरूपसम्बन्धेन सिद्धस्यैव साधनं जातमिति कृत्वा सिद्धसाधनमिति यो दोषः, अथ च न्यायमतेन समवायसम्बन्धातिरिक्तस्य स्वरूपसम्बन्धस्यार्थान्तरभूतस्य साधनं वा जातमिति कृत्वा यो दोषः प्रदत्तो वर्तते उभयमप्यत्र नास्ति। यतो गुणक्रियादिविशिष्टबुद्धिस्थले स्वरूपसम्बन्धस्य कल्पने स्वरूपसम्बन्धस्य तत्तद्व्यक्त्यनतिरिक्तत्वेन व्यक्तीनां चाऽनन्त्येन स्वरूपसम्बन्धस्यापि आनन्त्याद् गौरवं भवति, अतो लाघवानुरोधेन एकस्य समवायसम्बन्धस्यैव तत्र कल्पनमुचितं भवति।

जिज्ञासा- ननु गुणक्रियादिषु सिद्धस्य सम्बन्धस्य एकत्वे घटे नीलरूपस्य सः सम्बन्धः समवायः, स एव सम्बन्धो वायौ विद्यमानस्य स्पर्शगुणस्यापि, स्पर्शस्य वायौ समवायसम्बन्धेन विद्यमानत्वात्। एवं च वायौ विद्यमानस्य समवायसम्बन्धस्य रूपसमवायानतिरेकेण वायौ अपि रूपवत्ताप्रतीतिः स्यात् ।

समाधानम्- सत्यम्, य एव वायौ स्पर्शसमवायः स एव घटे विद्यमानो रूपसमवायोऽपि। तत्र समवायस्य एकत्वेऽपि वायौ प्रतियोगिनो रूपस्यासत्त्वेन न तत्र रूपवत्ताप्रतीतिरापादयितुं शक्या। विषयप्रत्यक्षं प्रति विषयस्यापि प्रतियोगिविधया कारणत्वाद्। वायौ रूपप्रत्यक्षे च रूपस्य प्रतियोगिनः सत्त्वापेक्षणात्, तदभावेन न तत्र रूपप्रतीतिरिति।

जिज्ञासा- गुणगुणिस्थलेषु यथा समवायसम्बन्धस्य सिद्धिः क्रियते, न तत्स्थाने स्वरूपादिसम्बन्धेन तस्य गतार्थत्वमङ्गीक्रियते तद्वद् अभावस्यापि स्वरूपसम्बन्धातिरिक्तसम्बन्धस्य कल्पना भवतु, का हानिः?

समाधानम्- अत्र तु तथा कल्पयितुं न शक्यते। यदि तथा कल्पना क्रियते चेत् स च स्वरूपसम्बन्धातिरिक्तः सम्बन्धः नित्यो वा अनित्यो वेति वक्तव्यं भवति। समवायसम्बन्ध इव लाघवाद् नित्य इष्यते तर्हि भूतले विद्यमानस्य घटपटाद्यभावस्यापि नित्यत्वेन (अत्यन्ताभावस्य नित्यत्वाङ्गीकारात्) भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गः स्यात्, अतोऽभावस्य सम्बन्धो नित्यो भवतीति अङ्गीकर्तुं न शक्यते। अनित्यश्चेत् तर्हि अनन्तसम्बन्धकल्पनेन गौरवमिति सम्बन्धान्तरं परिकल्प्य उक्तसम्बन्धस्यानित्यत्वकल्पनापेक्षया स्वरूपसम्बन्धकल्पना एव उचिता।

अयं भावः- अत्यन्ताभावो हि नित्योऽङ्गीक्रियते न्यायवैशेषिकसम्प्रदाये। य एव घटाभावोऽत्र वर्तते स एव घटाभावोऽन्यत्रापि वर्तते इत्यनुभवस्य सिद्धत्वेन घटप्रदेशमतिरिच्य सर्वत्र विद्यमानो घटाभाव एक एव। अभावभूतलयोर्मध्ये विद्यमानस्वरूपसम्बन्धः कीदृश इति प्रश्ने तु तत्तत्कालीनत्वविशिष्टतत्तद्भूतलादिकमेव स इति घटानयनकाले तथाविधस्वरूपसम्बन्धस्याभावेन न भूतले घटाभाववत्ताप्रतीतिरिति।

## पदानामर्थपरिचयः

**कण्ठतः** = सूत्रे साक्षाद् नामग्रहणेन

**समुच्चयः** = इतरस्यापि सङ्ग्रहः

**समवेतत्वम्** = समवायसम्बन्धेन विद्यमानत्वम्

**स्वतो व्यावर्तकत्वम्** = स्वभेदकाभाववत्वम्

**विशिष्टबुद्धिः** = विशेषण-विशेष्यसम्बन्धविषयिणी बुद्धिः (यथा—'रक्तो घटः')

**वैशिष्ट्यम्** = सम्बन्धः

**अन्त्यः** = परमाणुषु वर्तमानोऽन्तिमो भेदकः पदार्थः

**सिद्धसाधनम्** = ज्ञातस्यैव पुनः साधनम्

## अभ्यासः

### १. परस्परं मेलयत

| | |
|---|---|
| सामान्यम् (जातिः) | अन्त्यः |
| विशेषः | नित्यसम्बन्धः |
| समवायः | परसामान्यम् |
| कर्म | नित्यत्वे सत्यनेकसमवेतम् |
| सत्ता | पञ्चविधम् (उत्क्षेपणादि) |

### २. अधोनिर्दिष्टप्रश्नानां लघूत्तरं लिखत

(क) 'अन्त्यः' इति कस्य नाम ?

(ख) समवायस्य सम्बन्धत्वे प्रमाणं किम् ?

(ग) समवायस्य एकत्वे वायौ रूपवत्ताप्रतीतिः किमर्थं न जायते ?

(घ) अभावस्य सम्बन्धः 'समवायः' किमर्थं नाङ्गीक्रियते ?

### ३. अधोनिर्दिष्टप्रश्नानां व्याख्यानं कुरुत

(क) चतुर्विंशतिगुणानां विभागं प्रदर्श्य कणादसूत्रे 'च' शब्देन केषां गुणानां सङ्ग्रहो भवति ? लिखत।

(ख) "नित्यत्वे सति अनेकसमवेतत्वं सामान्यम्" इति लक्षणे 'नित्यानेकपदयोः प्रयोजनं स्पष्टयत।

(ग) 'जातिबाधकसंग्रहः' इति कारिकां व्याख्याय 'सङ्करानवस्थयोरुदाहरणं प्रदर्शयत।

### ४. गुण-कर्म-सामान्य-विशेष-समवायानां प्रत्येकम् एकैकं मौलिकम् उदाहरणं स्ववाक्ये प्रयुज्य लिखत।

### ५. द्वयोश्छात्रयोर्मध्ये संवादं रचयत, यत्र एकः 'भ्रमण-रेचनादीनां' पृथक् कर्मत्वं वाञ्छति, अपरश्च तेषां 'गमने' अन्तर्भावं साधयति।

### ६. उचितोत्तरे ( ✓ ) चिह्नेन अनुचितोत्तरे ( X ) इति चिह्नेन सङ्केतयत

(क) गमनं पञ्चविधकर्मसु अन्यतमं वर्तते। (________)

(ख) आकाशत्वं एका जातिरस्ति। (________)

(ग) समवायः प्रत्यक्षप्रमाणेन सिध्यति। (________)

(घ) विशेषपदार्थः केवलं सावयवद्रव्येषु (यथा घटः) तिष्ठति। (________)

(ङ) अत्यन्ताभावः नित्योऽङ्गीक्रियते। (________)

### *परियोजनाकार्यम्–*

सामान्यं कथं परापरभेदेन भिद्यते ? तद्विषयकं रेखाचित्रं निर्माय दर्शयत।

पञ्चमः पाठः

# अभावपदार्थनिरूपणम्

अभावं निरूपयति ग्रन्थकारः-

**कारिका-** **अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः।**

**प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥ १२ ॥**

**एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते।**

**अन्वयः-** अभावस्तु द्विधा, संसर्गान्योन्याभावभेदतः, प्रागभावः तथा ध्वंसः, अपि अत्यन्ताभाव एव त्रैविध्यमापन्नः संसर्गाभाव इष्यते।

**कारिकार्थः-** संसर्गाभावान्योन्याभावभेदेन अभावो द्विविधो भवति। तत्र संसर्गाभावः प्रागभावप्रध्वंसाभावात्यन्ताभावभेदेन त्रिविधो भवति।

**मुक्तावली- अभावं विभजते- अभावस्त्विति। अभावत्वम्- द्रव्यादिषट्कान्योन्याभाववत्त्वम्। संसर्गेति। संसर्गाभावान्योन्याभावभेदादित्यर्थः। अन्योन्याभावस्यैकविधत्वात् तद्विभागाभावात्**

संसर्गाभावं विभजते- प्रागभाव इति। संसर्गाभावत्वमन्योन्याभावभिन्नाभावत्वम्। अन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम्। विनाश्यभावत्वम् प्रागभावत्वम्। जन्याभावत्वं ध्वंसत्वम्। नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम्। यत्र तु भूतलादौ घटादिकमपसारितं च, पुनरानीतं च, तत्र घटकालस्य सम्बन्धाघटकत्वादत्यन्ताभावस्य नित्यत्वेऽपि घटकाले न घटात्यन्ताभावबुद्धिः। तत्रोत्पादविनाशशाली चतुर्थोऽयमभाव इति केचित्। अत्र ध्वंसप्रागभावयोरधिकरणे नाऽत्यन्ताभाव इति प्राचां मतम्, श्यामघटे रक्तो नास्ति, रक्तघटे श्यामो नाऽस्तीति धीश्च प्रागभावं ध्वंसंचाऽवगाहते, न तु तदत्यन्ताभावम्, तयोर्विरोधात्, नव्यास्तु- तत्र विरोधे मानाभावाद् ध्वंसादिकालावच्छेदेनाऽप्यत्यन्ताभावो वर्तत इत्याहुः।

अभावभेदं प्रदर्श्य तत्स्वरूपं प्रदर्शयितुमपक्रमते ग्रन्थकारः-

**व्याख्या-** अभावत्वं नाम द्रव्यादिषट्कान्योन्याभावत्वम्। द्रव्यादीनां षट्का ये अन्योन्याभावाः (द्रव्यादिषड्रूपा द्रव्यं न, गुणो न, कर्म न, इत्यादिकाः परस्परं विद्यमाना भेदाः (अन्योन्याभावाः) तद्वत्त्वम्। द्रव्यत्वावच्छिन्नप्रतियोगिता

कभेदषट्कवत्त्वमिति तदर्थः। भावभिन्नत्वमभावत्वमिति तु नव्याः। स च अभावः संसर्गाभाव-अन्योन्याभावभेदेन द्विविध इष्टः। अन्योन्याभावस्य एकत्वेन तस्य विभागो नास्ति। संसर्गाभावस्तु प्रागभावप्रध्वंसाभावात्यन्ताभावभेदेन त्रिविधो भवति। तत्र संसर्गाभावत्वं नाम अन्योन्याभावभिन्नाभावत्वम्। अन्योन्याभावत्वं तु तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम्।

संसर्गाभावस्त्रिविधो भवतीत्युक्तम्। तत्र प्रथमः प्रागभावः। यश्च उत्पत्तेः प्राग् भवति। यथा घटोत्पत्तेः प्राग् घटस्य योऽभावो भवति स घटप्रागभाव उच्यते। तस्य लक्षणं तु- विनाश्यभावत्वं प्रागभावत्वम्, अर्थाद् विनाशशीलोऽभाव इत्यर्थः। एवं द्वितीयो वर्तते प्रध्वंसाभावः। स च कार्यस्य नाशानन्तरं भवति। यथा उत्पन्नस्य घटस्य दण्डप्रहारेण यो ध्वंसो जायते सः प्रध्वंसाभावः। तस्य लक्षणं तु- जन्याभावत्वं ध्वंसत्वम् अर्थाद् उत्पन्नशीलोऽभाव इत्यर्थः। एवं तृतीयोऽत्यन्ताभावः। स च सर्वदा भवति। अत एवायं नित्यो भवति। तस्य लक्षणं तु नित्यसंसर्गाभावत्वम्, अर्थाद् नित्यत्वे सति संसर्गावच्छिन्नप्रतियोगिताकाभावत्वम्।

प्रश्नः- ननु भूतले विद्यमानो घटात्यन्ताभावो यदि नित्यस्तर्हि यत्र भूतले घटादिकमपसारितं पुनश्चानीतं तदा भूतले घटाभाववत्ताप्रतीतिः कुतो न जायते ?

उत्तरम्- यद्यपि घटस्यापसारणानन्तरं तस्य पुनरानयनेऽपि तत्र घटात्यन्ताभावो विद्यते तस्य नित्यत्वात्, तथापि तत्प्रतीतिः कुतो न जायते इति चेत् ? तत्र यो घटकालो वर्तते तस्य घटाभावस्य सम्बन्धाघटकत्वेन अर्थाद् घटकालस्य घटाभावसम्बन्धरूपत्वाभावेन तत्र भूतले घटाभावस्य सत्त्वेऽपि न घटाभाववत्ताप्रतीतिः।

अत्र केचन नैयायिकैकदेशिनस्तु- भूतले विद्यमानस्य घटाभावस्य नित्यत्वे प्रमाणाभावेन तस्य उत्पादविनाशशालित्वस्य च प्रत्यक्षप्रमाणसिद्धत्वेन उत्पादविनाशशाली अयमभावो वक्तव्य इति वदन्ति। तस्य नाम च भवति सामयिकाभावः। एवं चात्र संसर्गाभाव एव द्विविधो वक्तव्यः- अत्यन्ताभावसामयिकाभावभेदेन। वायौ रूपाभावः- अत्यन्ताभावः। भूतले घटाभावश्च सामयिकाभावः (समयविशेषे एव विद्यमानोऽभावः)।

अत्र अत्यन्ताभावस्य नित्यत्वे प्रागभावस्याधिकरणे अथ च प्रध्वंसाभावस्याधिकरणे तस्य स्थितिरङ्गीकार्या न वेति प्रश्ने प्राचीननैयायिका वदन्ति यद्- ध्वंसप्रागभावयोरधिकरणे अत्यन्ताभावो भवितुं न शक्नोति, तयोर्विरोधात्। अत एव 'श्यामघटे रक्तो नास्तीति' बुद्धिः श्यामघटे रक्तरूपस्य प्रागभावं विषयीकरोति न तस्यात्यन्ताभावम्।

अत्र नव्यनैयायिकास्तु- प्रागभावध्वंसाभ्यां सह अत्यन्ताभावस्य विरोधे मानाभावेन ध्वंसादिकालावच्छेदेनापि अत्यन्ताभावो वर्तत इति वदन्ति। यो घटः पूर्वं रक्तो वर्तते, पश्चात् श्यामो जातः, ततः पुना रक्तो जातः ततश्च पुनः श्यामः, तादृशे घटे पूर्वतनरक्तस्य ध्वंसः, अन्तिमरक्तस्य प्रागभावः, रक्तान्तरस्य चात्यन्ताभावो वर्तते इति प्रागभावध्वंशयोरधिकरणेऽत्यन्ताभावस्य सत्त्वे विरोधाभाव इति तात्पर्यम्।

अभावस्याधिकरणात्मकत्वमिति यद् मीमांसकानां मतं तन्निराकरोति ग्रन्थकारः-

**मुक्तावली- नन्वस्त्वभावानामधिकरणात्मकत्वम्, लाघवादिति चेन्न, अनन्ताधिकरणात्मकत्वकल्पनापेक्षयाऽतिरिक्तत्वकल्पनाया एव लघीयस्त्वात्। एवं चाऽधाराधेयभावोऽप्युपपद्यते, एवं च तत्तच्छब्दरसगन्धाद्यभावानां प्रत्यक्षत्वमप्युपपद्यते। अन्यथा तत्तदधिकरणानां तत्तदिन्द्रियाग्राह्यत्वात् प्रत्यक्षत्वं न स्यात्। एतेन ज्ञानविशेष- कालविशेषाद्यात्मकत्वमत्यन्ताभावस्येति प्रत्युक्तम्, अप्रत्यक्षत्वापत्तेः।**

**व्याख्या-** अभावोऽतिरिक्तपदार्थो मास्तु, तस्याधिकरणात्मकत्वस्वीकारे एव लाघवादिति मीमांसका वदन्ति। अत्र नैयायिकास्तु तन्निषेधेन वदन्ति- अधिकरणानामानन्त्येन अनन्ताधिकरणात्मकत्वकल्पनापेक्षया अतिरिक्तस्याभावपदार्थस्यैव स्वीकारे लाघवमस्तीति अभावोऽतिरिक्तपदार्थ एव।

यदि अभावोऽधिकरणस्वरूपः स्यात् तर्हि "भूतले घटो नास्तीति" प्रतीतिसिद्ध आधाराधेयभावश्च नोपपद्येत, अर्थात् तत्र भूतलघटाभावयोः सर्वानुभूतस्याधाराधेयभावस्य या प्रतीतिः सा नोपपद्येत, अतश्च अभावस्य अतिरिक्तपदार्थत्वमङ्गीकार्यम्। किञ्च- यदि अभावोऽधिकरणस्वरूपः स्यात् तर्हि जले विद्यमानस्य गन्धाभावस्य जलरूपत्वेन जलस्य च चाक्षुषप्रत्यक्षत्वाद् गन्धाभावोऽपि चाक्षुषप्रत्यक्षः स्यात्। एवं घटे रसाभावस्य घटरूपतया तस्य च चाक्षुषप्रत्यक्षत्वं स्यात्। एवं जले गन्धाभावस्य जलरूपत्वेन जलस्य च घ्राणेन्द्रियाग्राह्यत्वेन गन्धाभावो घ्राणेन्द्रियग्राह्यो न स्याच्च। एवं घटे रसाभावस्य घटरूपतया घटस्य च रासनप्रत्यक्षत्वायोग्यत्वेन रसनेन्द्रियेण रसाभावस्य प्रत्यक्षमेव न स्यात्, अतोऽभावपदार्थोतिरिक्तोऽङ्गीकार्य एव। एतेन अभावस्य ज्ञानविशेषरूपत्वं कालविशेषरूपत्वं वा ये (बौद्धाः) वदन्ति तेषामपि मतमनेनैव खण्डितमिति वेदितव्यम्।

## *पदानामर्थपरिचयः*

**द्रव्यादिषट्कान्योन्याभाववत्त्वम्** = द्रव्यगुणकर्मसामान्यविशेषसमवायानां यः परस्परं भेदः, तद्वत्त्वम्

**अन्योन्याभावः** = भेदः

**मानाभावः** = प्रमाणाभावः

**प्रत्युक्तम्** = खण्डितम्

**अनादिः सान्तश्च** = यस्यारम्भो नास्ति किन्तु अन्तोऽस्ति

**सादिः अनन्तश्च** = यस्य आरम्भोऽस्ति किन्तु अन्तो नास्ति

**आधाराधेयभावः** = आधेयत्वम्, आधारत्वञ्च

**सामयिकाभावः** = समयविशेषे विद्यमानो विनाशशीलोऽभावः

## अभ्यासः

### १. परस्परं मेलयत

| | |
|---|---|
| प्रागभावः | नित्यसंसर्गावच्छिन्नप्रतियोगिताकाभावः |
| प्रध्वंसाभावः | तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावः |
| अत्यन्ताभावः | विनाश्यभावः |
| अन्योन्याभावः | जन्याभावः |
| सामयिकाभावः | उत्पादविनाशशाली संसर्गाभावः |

### २. व्याख्यात्मकमुत्तरं लिखत

(क) अभावस्य भेदद्वयं (संसर्गाभाव-अन्योन्याभावौ) सोदाहरणं स्पष्टीकृत्य संसर्गाभावस्य त्रैविध्यं वर्णयत।

(ख) "विनाश्यभावः प्रागभावः" तथा "जन्याभावः ध्वंसः" इत्यनयोर्लक्षणयोः सार्थकतां प्रतिपादयत।

(ग) अभावः 'अधिकरणस्वरूपः' किमर्थं भवितुं न शक्नोति ? इत्यत्र नैयायिकोक्तहेतुं दर्शयत।

(घ) "घटवति भूतले घटात्यन्ताभावो वर्तते" इति नैयायिकसिद्धान्तस्तर्हि तत्र 'घटाभावः' किमर्थं न दृश्यते ? समाधानं कुरुत।

(ङ) इन्द्रियव्यवस्थाया आधारेण अभावस्यातिरिक्तत्वं कथं सिध्यति ? स्पष्टयत।

(च) प्रागभाव-प्रध्वंसाभावयोरधिकरणे अत्यन्ताभावस्य स्थितिर्भवति वा न वा ? प्राचीननव्यनैयायिकानां मतभेदं स्पष्टयत।

(छ) सामयिकाभावः कः ? सः च अत्यन्ताभावात् कथं भिन्नः ? लिखत।

### ३. नैयायिकमीमांसकयोः संवादं रचयत, यत्र मीमांसकोऽभावस्य अधिकरणरूपत्वं साधयति, नैयायिकश्च तस्य खण्डनं करोति।

४. यदि कश्चन मनुष्यः 'श्यामघटे रक्तरूपस्य' अभावं पश्यति, तर्हि सोऽभावः प्रागभावोस्ति वा अत्यन्ताभावः ? प्राचीननैयायिकमतानुसारं स्वकीयं तर्कमुपस्थापयत ।

५. उचितोत्तरे ( ✓ ) चिह्नेन अनुचितोत्तरे ( X ) इति चिह्नेन सङ्केतयत

(क) अत्यन्ताभावो नित्योऽङ्गीक्रियते । (________)

(ख) अन्योन्याभावस्तादात्म्यसम्बन्धं निषेधति । (________)

(ग) अभावस्याधिकरणरूपत्वे लाघवमस्ति इति नैयायिका मन्वते । (________)

(घ) प्रध्वंसाभावो जन्योऽस्ति परं विनाशशीलो नास्ति । (________)

(ङ) अभावो ज्ञानविशेषरूप इति बौद्धानां मतमस्ति । (________)

*परियोजनाकार्यम्-*

चतुर्विधानामभावानामेकां सारिणीं रचयत ।

# साधर्म्यवैधर्म्यप्रकरणम्

इदानीं पदार्थानां साधर्म्यं वैधर्म्यं च निरूपयितुमुपक्रमते ग्रन्थकारः-

**कारिका-** **सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ।। १३ ।।**

**अन्वयः-** सप्तानाम् अपि साधर्म्यम् ज्ञेयत्वादिकम् उच्यते ।

**कारिकार्थः-** द्रव्यम्, गुणः, कर्म, सामान्यम्, विशेषः, समवायः, अभाव एतेषां सप्तपदार्थानां ज्ञेयत्वम्, अभिधेयत्वम्, प्रमेयत्वं च साधर्म्यं भवति ।

**मुक्तावली- इदानीं पदार्थानां साधर्म्यं वैधर्म्यञ्च वक्तुं प्रक्रमते- सप्तानामिति । समानो धर्मो येषां ते सधर्माणः, तेषां भावः साधर्म्यम्, समानो धर्म इति फलितोऽर्थः । एवं विरुद्धो धर्मो येषां ते विधर्माणः, तेषां भावो वैधर्म्यम्, विरुद्धो धर्म इति फलितोऽर्थः । ज्ञेयत्वं ज्ञानविषयता, सा च सर्वत्रैवाऽस्ति, ईश्वरज्ञानविषयतायाः केवलान्वयित्वात् । एवमभिधेयत्वप्रमेयत्वादिकं बोध्यम् ।।**

**व्याख्या-** समानो धर्म एषां भवति ते सधर्माणः, तेषां भावः साधर्म्यम् । फलतः समानो धर्म इत्यर्थः समागतो भवति । एवं विरुद्धो धर्मो येषां ते विधर्माणः, तेषां भावो वैधर्म्यम्, विरुद्धो धर्म इति यावत् । एवं च द्रव्यादिसप्तपदार्थानां ज्ञेयत्वम्, अभिधेयत्वम्, प्रमेयत्वं च साधर्म्यं ज्ञेयम् ।

ज्ञेयत्वं नाम ज्ञानविषयता, सा च सप्तसु पदार्थेषु वर्तते। तदेवोक्तं मुक्तावल्यां- 'ज्ञेयत्वं ज्ञानविषयता, सा च सर्वत्रैवास्ति । अस्मदीयज्ञानविषयतायाः सप्तसु पदार्थेषु क्वचिदेकत्राभावप्रदर्शनसम्भवेऽपि ईश्वरीयज्ञानविषयतायाः सर्वत्र सत्त्वेन सप्तानां ज्ञेयत्वं साधर्म्यमिति सूपपन्नम्। ईश्वरीयज्ञानविषयतायाः केवलान्वयित्वात्। यस्य न कुत्राप्यभावः सः केवलान्वयी उच्यते ।

अभिधेयत्वं नाम अभिधाविषयत्वम् । अभिधा नाम सङ्केतः, ईश्वरेच्छा, शक्तिर्वा । सा च विषयतासम्बन्धेन सप्तसु पदार्थेषु वर्तते । प्रमेयत्वं नाम प्रमाविषयत्वम् । तदपि सप्तसु पदार्थेषु वर्तते ।

**कारिका-** **द्रव्यादयः पञ्च भावा अनेके समवायिनः ।**
**सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ।। १४ ।।**

**अन्वयः-** द्रव्यादयः पञ्च भावाः अनेके समवायिनः। आद्याः त्रयस्तु सत्तावन्तः। गुणादिः निर्गुणक्रियः।

**कारिकार्थः-** द्रव्यम्, गुणः, कर्म, सामान्यम्, विशेष एते पञ्च पदार्था भावाः, अनेके, समवायिनश्च भवन्ति। एवं आद्यास्त्रयः (द्रव्यगुणकर्माणि) सत्तावन्तो भवन्ति। द्रव्यमतिरिच्यान्ये गुणकर्मादयस्तु पुनर्निर्गुणा निष्क्रियाश्च भवन्तीत्यर्थः।

**मुक्तावली-** **द्रव्यादय इति। द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यमनेकत्वं समवायित्वं च। यद्यप्यनेकत्वमभावेऽप्यस्ति तथाऽप्यनेकत्वे सति भावत्वं पञ्चानां साधर्म्यम्। तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितोऽर्थः, तेन प्रत्येकं घटादावाकाशादौ च नाव्याप्तिः। समवायित्वं च समवायसम्बन्धेन सम्बन्धित्वम्, न तु समवायवत्त्वम्, सामान्यादावभावात्। सत्तावन्त इति। द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः। गुणादिरिति। यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तम्, क्रियाशून्यत्वञ्च गगनादावतिव्याप्तम्, तथाऽपि गुणवदवृत्तिधर्मवत्त्वं कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वञ्च तदर्थः। न हि घटत्वादिकं द्रव्यत्वादिकं वा गुणवदवृत्ति कर्मवदवृत्ति वा, किन्तु गुणत्वादिकं तथा, आकाशत्वादिकन्तु न पदार्थविभाजकोपाधिः॥**

**व्याख्या-** द्रव्यादिपञ्चानामनेकत्वे सति भावत्वं समवायित्वं च साधर्म्यं भवति। अत्र समवायित्वपदेन समवायसम्बन्धेन सम्बन्धित्वमात्रमित्यर्थो विवक्षितः, अन्यथा समवाये विशेषे च कस्यापि समवेतत्वाभावेन (समवायसम्बन्धेन अवर्तमानत्वेन) इदं साधर्म्यकथनमनुपपन्नं भवेत्। अतः समवायसम्बन्धेन सम्बन्धित्वमात्रमत्र समवायित्वपदेन विवक्षणीयम्।

अयं भावः- द्रव्ये गुणे कर्मणि च समवायसम्बन्धेन पदार्थानां सत्त्वात् ते समवायिनः। समवाये विशेषे च समवायसम्बन्धेन कस्याप्यसत्त्वात् तावुभौ कथं समवायिनौ स्यातामिति प्रश्नस्योत्तरदानाय समवायित्वपदार्थं विवृणोति ग्रन्थकारः। तत्र अनुयोगिताप्रतियोगिता-अन्यतरसम्बन्धेन समवायवत्त्वस्य विवक्षासत्त्वेन समवायविशेषयोः समवायित्वमिति।

येन सम्बन्धेन यो यत्र तिष्ठति स (आधारभूतपदार्थः) उक्तसम्बन्धस्य 'अनुयोगी' उच्यते। येन सम्बन्धेन यः तिष्ठति स (आधेयभूतपदार्थः) उक्तसम्बन्धस्य 'प्रतियोगी' उच्यते। समवायसम्बन्धेन द्रव्ये गुणादयः तिष्ठन्ति, अतः समवायानुयोगि द्रव्यम्, प्रतियोगिनश्च गुणादयः। समवाये विशेषे च समवायसम्बन्धेन कस्यापि वृत्तित्वाभावेऽपि तयोस्समवायसम्बन्धेन द्रव्यादिषु सत्त्वेन उक्तसमवायसम्बन्धस्य एतौ द्वौ प्रतियोगिभूतौ। एवं च प्रतियोगितासम्बन्धेन समवायित्वं तयोरुपपन्नम्।

गुणादिरिति- यद्यपि गुणक्रियाशून्यत्वम् आद्यक्षणावच्छिन्नेषु घटादिद्रव्येष्वपि वर्तते। आद्यक्षणावच्छिन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियं च तिष्ठति इति नियमात्। एवमेव क्रियाशून्यत्वं गगनद्रव्यस्यापि वर्तते इति गुणादीनामुक्तसाधर्म्यलक्षणम्

आद्यक्षणावच्छिन्नघटपटादिद्रव्येषु गगनादिषु च गतमिति अतिव्याप्तिरिति शङ्कोदेति तथापि निर्गुणत्वलक्षणस्य 'गुणवदवृत्तिधर्मवत्त्वम्' इत्यर्थविवक्षणेन, एवं निष्क्रियत्वलक्षणस्यापि 'कर्मवदवृत्तिपदार्थविभागजोपाधिमत्त्व'-अर्थविवक्षणेन आद्यक्षणावच्छिन्नघटपटादिद्रव्येषु गगने चोक्तसाधर्म्यलक्षणस्य नातिव्याप्तिरिति।

अयं भावः-१. गुणवत् = द्वितीयादिक्षणावच्छिन्नं द्रव्यम्। तत्र अवृत्तिर्यो धर्मः = गुणत्व-कर्मत्व-सामान्य-विशेष-समवायाभावत्वादिः। तद्वत्त्वस्य गुणकर्मादिषु षट्सु सत्त्वेन लक्षणसमन्वयः। गुणवदवृत्तिधर्मपदेन घटत्वस्य द्रव्यत्वस्य वा ग्रहणासम्भवेन आद्यक्षणावच्छिन्ने द्रव्ये नातिव्याप्तिश्च।

२. कर्मवत् = घटादिद्रव्यम्। तत्र अवृत्तिर्यः पदार्थविभाजकोपाधिः = गुणत्वकर्मत्वादिरूपः, तद्वत्त्वस्य गुणकर्मादिषु सत्त्वेन लक्षणसमन्वयः। कर्मवदवृत्ति यद्यपि गगनत्वादीनामप्यस्ति, तथापि गगनत्वकालत्वादीनां पदार्थविभागकधर्मत्वाभावाद् आद्यक्षणावच्छिन्नघटादिषु निष्कर्मकगगनादौ चोक्तपरिष्कृतलक्षणस्य नातिव्याप्तिश्च।

**कारिका-** **सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः।**
**पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥ १५॥**

**अन्वयः-** सर्वे जात्यादयस्तु सामान्यपरिहीना मताः पारिमाण्डल्यभिन्नानां कारणत्वम् उदाहृतम्।

**कारिकार्थः-** सामान्यविशेषसमवायाभावानां सामान्यरहितत्वं साधर्म्यं भवति। अणुपरिमाणभिन्नानां कारणत्वं साधर्म्यं भवति।

**मुक्तावली-** **सामान्येति। सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः। पारिमाण्डल्येति। परिमाण्डल्यमणुपरिमाणम्, कारणत्वं तद्भिन्नानामित्यर्थः। अणुपरिमाणं तु न कस्याऽपि कारणम्। तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत्। तच्च न सम्भवति। परिमाणस्य स्वसमानजातीयस्वोत्कृष्टपरिमाणजनकत्वनियमात्, महदारब्धस्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसङ्गात्। एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च बोध्याः। इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वम्, ज्ञायमानं सामान्यं न प्रत्यासत्तिः ज्ञायमानं लिङ्गं नानुमितिकरणमित्यभिप्रायेणोक्तम्। आत्ममानसप्रत्यक्षे आत्मपरममहत्त्वस्य कारणत्वात् परममहत्परिमाणमाकाशादेर्बोध्यम्। तस्यापि न कारणत्वमित्याचार्याणामाशय इत्यन्ये। तन्न, ज्ञानातिरिक्तं प्रत्येवाकारणताया आचार्यैरुक्तत्वात्॥**

**व्याख्या-** अत्र सामान्यपरिहीनत्वं सामान्यानधिकरणत्वं न तु सामान्यरहितत्वम्, एकार्थसमवायसम्बन्धेन जात्यादीनामपि सामान्यवत्त्वात्। पारिमाण्डल्यं नाम अणुपरिमाणम्। अणुपरिमाणं च न कस्यापि कारणं भवितुं शक्नोतीति तद्भिन्नानां कारणत्वं साधर्म्यमित्युक्तम्। अणुपरिमाणं कुतः कस्यापि कारणं न भवतीति प्रश्ने

कार्यद्रव्यगतपरिमाणं प्रति कारणद्रव्यगतपरिमाणस्य कारणदर्शनात् परिमाणस्य हि स्वसमानजातीयस्वोत्कृष्टपरि माणजनकत्वनियमेन कारणगतपरिमाणं स्वापेक्षया उत्कृष्टपरिमाणं जनयतीति अणुपरिमाणं यदि कस्यापि जनकं भवेत् तर्हि अणुपरिमाणाश्रये परमाणौ आरब्धद्वयणुकद्रव्यस्य यत्परिमाणं तं प्रति परमाणुगतपरिमाणस्य कारणत्वस्य वक्तव्यत्वेन तस्य च परमाणुपरिमाणापेक्षया उत्कृष्टत्वेन भवितव्यमिति अणुपरिमाणं स्वापेक्षया उत्कृष्टमणुतरपरिमाणं द्व्यणुके जनयतीति वक्तव्यं भवति। तथा च द्वयणुकपरिमाणस्य अणुतरपरिमाणत्वापत्तिः, तच्च नेष्टम्। एवं द्व्यणुकपरिमाणमपि यदि त्र्यणुकगतपरिमाणं प्रति कारणं अङ्गीक्रियते तर्हि त्र्यणुकगतपरिमाणमपि तदपेक्षया उत्कृष्टम् अर्थाद् अणुतरं भवेदिति तदपि नेष्टम्। अतोऽणुपरिमाणं कस्यापि कारणं न भवतीति अङ्गीकार्यमिति तात्पर्यम्।

(त्र्यणुकादारभ्यैव प्रत्यक्षस्य सत्त्वेन प्रत्यक्षं प्रति च महत्परिमाणस्य कारणत्वेन त्र्यणुके विद्यमानं परिमाणं महत्परिमाणमुच्यते। उक्तमहत्परिमाणं प्रति च द्व्यणुकगतमणुपरिमाणं कारणं न भवतीति चेत् तर्हि किं कारणं भवति ? एवं द्व्यणुकपरिमाणं प्रत्यपि परमाणुपरिमाणं न कारणं चेत् कारणान्तरं किं स्यादिति प्रश्ने तु तत्र न्यायसिद्धान्ते परमाणुगतद्वित्वसङ्ख्या एव द्व्यणुकपरिमाणस्य कारणम् एवं द्व्यणुकगतत्रित्वसङ्ख्या एव त्र्यणुकगतमहत्परिमाणस्य कारणमङ्गीक्रियते। तथा हि विश्वनाथः– द्व्यणुकादौ तु सङ्ख्याजन्यमुदाहृतम् (का. १११)। अधिकं तत्रैव।)

यथा अणुपरिमाणं न कस्यापि कारणं तद्वत् परममहत्परिमाणमपि न कस्यापि कारणं भवति। अतीन्द्रियपदार्थे विद्यमानं सामान्यं विशेषपदार्थाश्च न कस्यापि कारणानि भवन्तीति।

प्रश्नः– योगिभिः स्वयोगरूपतपोबलेन अर्थाद् योगजसन्निकर्षेण अतीन्द्रियपदार्थानां प्रत्यक्षे प्रत्यक्षं प्रति विषयस्य कारणत्वेन कथम् अणुपरिमाणम्, परममहत्परिमाणम्, अतीन्द्रियसामान्यम्, विशेषाश्च कारणानि न भवन्तीत्युक्तम् ?

उत्तरम्– इदं च योगिप्रत्यक्षे विषयस्य कारणत्वं न इत्यभिप्रायेणोक्तमस्तीति वेदितव्यम्। योगिप्रत्यक्षे विषयस्य कारणत्वाङ्गीकारे अतीतभविष्यत्कालीनविषयाणां योगिप्रत्यक्षं न स्यात्, अतीतभविष्यत्कालीनविषयाणां तदानीमभावात्, अतो योगिप्रत्यक्षे विषयस्य कारणत्वं नास्तीत्यभिप्रायेण तथोक्तम्।

प्रश्नः- ननु ज्ञायमानसामान्यस्य अलौकिकप्रत्यक्षप्रयोजकप्रत्यासत्तित्वमते परमाणुत्वेन सकलपरमाणुबोधे अतीन्द्रियस्यापि तस्य परमाणुसामान्यस्य परमाणुसामान्यलक्षणया कारणत्वादतीन्द्रियसामान्यं न कारणं कथमुच्यते ?

उत्तरम्- इदमपि ज्ञायमानं सामान्यं न प्रत्यासत्तिरित्यभिप्रायेण उक्तम्। सामान्यज्ञानस्य तत्र प्रत्यासत्तित्वेन अतीन्द्रियसामान्यस्य तत्रापि कारणत्वं नास्त्येवेति।

एवं नित्यद्रव्यं विशेषवदिति ज्ञानोत्तरं सर्वाणि नित्यद्रव्याणि विशेषवन्ति इत्यलौकिकं विशेषविषयकम् अलौकिकप्रत्यक्षं सामान्यलक्षणया जायते, तथा च परमाणुः, इतरभिन्नः, विशेषादित्यत्र अलौकिकसम्बन्धेन विशेषपदार्थस्य कारणत्वमस्तीति कथं तस्याप्यकारणत्वमुक्तमिति प्रश्ने- अस्यापि तदेवोत्तरं यज्ज्ञायमानं लिङ्गं नानुमितिकरणमिति मतेन तथोक्तिरिति। तथा च तत्रापि लिङ्गज्ञानस्यैव कारणत्वाल्लिङ्गस्य चाकरणत्वाद् विशेषस्याकारणत्वं सूपपन्नम्।

अत्र परममहत्परिमाणस्याकारणत्वं यदुक्तं तच्च गगनकालादिगतपरममहत्परिमाणस्य कृते अस्ति। आत्ममानसप्रत्यक्षे च आत्मनः परममहत्परिमाणस्य कारणत्वाङ्गीकारात्। आत्मनो मानसप्रत्यक्षे तद्गतपरममहत्परिमाणं कारणं भवतीति उदयनाचार्यैरुक्तत्वात्।

अत्र केचन आत्ममानसप्रत्यक्षे आत्मगतपरममहत्परिमाणस्य कारणत्वमाचार्याणामप्यभिप्रेतं नास्तीति वदन्ति। तच्च न शोभनम्, यतो ज्ञानातिरिक्तं प्रत्येव तस्याकारणत्वस्य आचार्यैः प्रतिपादनाद् ज्ञानं प्रति तस्य कारणत्वमाचार्याणामपि अभिप्रेतमेव। 'कारणत्वं च ज्ञातृधर्मेतरकार्यापेक्षया' इति प्रशस्तपादीयवचनं तमेवार्थं बोधयति। तद्विरुद्धतया उदयनाचार्यस्य गमनासम्भवादित्याशयेन ग्रन्थकार एवं व्याख्याति।

## *पदानामर्थपरिचयः*

| | | |
|---|---|---|
| **साधर्म्यम्** | = | समानो धर्मः |
| **वैधर्म्यम्** | = | विरुद्धो धर्मः |
| **केवलान्वयी** | = | यस्यात्यन्ताभावः कुत्रापि न भवति (यथा–ज्ञेयत्वम्) |
| **अभिधेयत्वम्** | = | अभिधाविषयत्वम्, ईश्वरसङ्केतविषयत्वम् |
| **प्रमेयत्वम्** | = | प्रमाविषयत्वम् |
| **समवायित्वम्** | = | समवायसम्बन्धेन सम्बन्धित्वम् |
| **आद्यक्षणावच्छिन्नद्रव्यम्** | = | उत्पत्तिक्षणकालीनं द्रव्यम् |
| **पदार्थविभाजकोपाधिः** | = | पदार्थानां परस्परं भेदको धर्मः (यथा गुणत्वकर्मत्वादयः) |
| **योगजसन्निकर्षः** | = | योगाभ्यासजन्योऽलौकिक इन्द्रियसम्बन्धः |

## अभ्यासः

### १. परस्परं मेलयत

| | |
|---|---|
| प्रमेयत्वम् | अकारणत्वम् (न कस्यापि जनकम्) |
| पञ्चभावाः (द्रव्यादयः) | निर्गुणा निष्क्रियाश्च |
| सत्तावत्त्वम् | अनेकत्वं समवायित्वं च साधर्म्यम् |
| पारिमाण्डल्यम् | द्रव्य-गुण-कर्मणां साधर्म्यम् |
| गुणादयः | सप्तानां पदार्थानां साधर्म्यम् |

### २. व्याख्यात्मकमुत्तरं लिखत

(क) सप्तानां पदार्थानां सामान्यसाधर्म्यं निरूपयत।

(ख) "समवायित्वं न तु समवायवत्त्वम्" इति मुक्तावलीकारस्य किं तात्पर्यम् स्पष्टयत।

(ग) निर्गुणत्वनिष्क्रियत्वलक्षणयोः परिष्कारः किमर्थम् आवश्यकः ? स्पष्टयत।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) "पारिमाण्डल्यं न कस्यापि कारणम्" इति सिद्धान्तं साधयत।

(ख) योगिप्रत्यक्षेऽतीन्द्रियविषयाणां 'कारणत्वं' किमर्थं नेष्यते ? तद्विवेचयत।

(ग) सामान्यविशेषयोरकारणत्वविषये 'ज्ञायमानं लिङ्गं न करणम्' इति सिद्धान्तं विवेचयत।

### ४. लघुटिप्पणीं लिखत

(क) अभिधेयत्वम् , पदार्थविभाजकोपाधिः, केवलान्वयी।

५. **संवादं रचयत- द्वयोः छात्रयोः संवादं रचयन्तु यत्र एक आद्यक्षणवर्तिद्रव्ये निर्गुणत्वलक्षणस्यातिव्याप्तिं वदति, अपरश्च 'गुणवदवृत्तिधर्मवत्त्वयुक्त्या तस्य समाधानं करोति।**

६. **यदि अणुपरिमाणं (पारिमाण्डल्यं) स्वोत्कृष्टं परिमाणं जनयेत्, तर्हि द्व्यणुकस्य परिमाणं कीदृशं स्यात् ? तल्लिखत।**

### *परियोजनाकार्यम्-*

परमाणुः (द्वित्वसङ्ख्या) $\longrightarrow$ द्व्यणुकम् (त्रित्वसङ्ख्या) $\longrightarrow$ त्र्यणुकम् (महत्परिमाणम्)। अत्र सङ्ख्यायाः कारणत्वं परिमाणस्य अकारणत्वं च रेखाचित्रमाध्यमेन दर्शयत।

सप्तमः पाठः

# कारणनिरूपणप्रकरणम्

सभेदं कारणस्वरूपं प्रतिपादयति ग्रन्थकारः-

**कारिका-** **अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता।**
**कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् ॥ १६ ॥**
**समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्।**
**एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥ १७ ॥**
**यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत्।**
**तत्राऽसन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥ १८ ॥**

**अन्वयः-** अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता कारणत्वं भवेत्, तस्य त्रैविध्यं परिकीर्तितम्, समवायिकारणत्वं ज्ञेयम्, अथ असमवायिहेतुत्वम् अपि, एवं न्यायनयज्ञैः तृतीयं निमित्तहेतुत्वम् उक्तम्। यत्समवेतं कार्यं भवति तत्तु समवायिजनकं ज्ञेयम्, तत्र आसन्नं जनकं द्वितीयम्, आभ्यां परं तृतीयं स्यात्।

**कारिकार्थः**–अन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वं भवति। उक्तकारणत्वं च समवायिकारणत्व-असमवायिकारणत्व-निमित्तकारणत्वभेदेन त्रैविध्यं परिकीर्तितमस्ति। यत्र समवायसम्बन्धेन सम्बद्धं सत् कार्यमुत्पद्यते तत् समवायिकारणं भवति। तत्रैव समवायिकारणे प्रत्यासन्नं यत्कारणं भवति तदसमवायिकारणमुच्यते। ताभ्यां भिन्नं च यत्कारणं तत् तृतीयं निमित्तकारणं भवति।

**मुक्तावली-** **ननु कारणत्वं किमत आह अन्यथासिद्धीति। तत्रेति। समवायिकारणे प्रत्यासन्नं कारणं द्वितीयम् असमवायिकारणमित्यर्थः। अत्र यद्यपि तुरीतन्तुसंयोगे पटासमवायिकारणत्वं स्यात्, वेगादीनामभिघाताद्यसमवायिकारणत्वं स्यात्, एवं ज्ञानादीनामपीच्छाद्यसमवायिकारण त्वं स्यात्, तथाऽपि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयम्। तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव। एवं वेगादिकमपि वेगस्पन्दाद्यसमवायिकारणम् भवत्येवेति तत्तत्कार्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयम्। आत्मविशेषगुणानां तु कुत्राऽप्यसमवायिकारणत्वं नास्ति। तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव। अत्र समवायिकारणे**

**प्रत्यासन्नं द्विविधं, कार्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च। आद्यं यथा- घटादिकं प्रति कपालप्रयोगादिकमसमवायिकारणम्। तत्र कार्येण घटेन सह कारणस्य संयोगस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति। द्वितीयं यथा-घटरूपं प्रति कपालरूपमसमवायिकारणम्। स्वगतरूपादिकं प्रति समवायिकारणं घटस्तेन सह कपालरूपस्यैकस्मिन् कपाले प्रत्यासत्तिरस्ति। तथा च क्वचित् समवायसम्बन्धेन, क्वचित् स्वसमवायिसमवेतत्वसम्बन्धेनेति फलितोऽर्थः, इत्थं च कार्यैकार्थ-कारणैकार्थान्यतरप्रत्यासत्या समवायिकारणे प्रत्यासन्नं कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्यवसितम्। आभ्याम्- समवायिकारणासमवायिकारणाभ्याम्, परम्- भिन्नं कारणम्, तृतीयम्-निमित्तकारणमित्यर्थः ।। १८ ।।**

**व्याख्या–** अन्यथासिद्धिशून्यस्य= अन्यथासिद्धिरहितस्य, नियता= निश्चिता, पूर्ववर्तिता= कार्याव्यवहितपूर्वक्षणवृत्तिता कारणत्वं भवति। उक्तकारणत्वस्य च त्रिविधो भेदो वर्तते। अन्यच्च मूले स्पष्टम्। समवायिकारणे आसन्नं कारणं द्वितीयमसमवायिकारणं भवतीति पूर्वमुक्तम्, तथा सति पटस्य समवायिकारणे तन्तुषु प्रत्यासन्नं सत् कारणं तु तुरीतन्तुसंयोगोऽपि भवतीति तस्यापि असमवायिकारणत्वं स्यात्, एवं वेगादीनामपि अभिघाताख्यसंयोगं प्रति असमवायिकारणत्वं स्यात्।

(अभिघाताख्यसंयोगस्य समवायिकारणं पाषाणः, तत्र पाषाणे विद्यमाना क्रिया च तस्य असमवायिकारणं भवति परन्तु तत्रैव पाषाणे क्रियया जायमानो वेगोऽपि वर्तते यश्च निमित्तं भवति तदपि समवायिकारणे पाषाणे प्रत्यासन्नः सन् कारणं चेति असमवायिकारणलक्षणं तत्रापि गतमित्याशयः)

एवं ज्ञानादीनापीच्छाद्यसमवायिकारणत्वं स्यात्। यत्रात्मनि इच्छा तत्रैव ज्ञानमपि वर्तते। ज्ञानं च इच्छां प्रति कारणमस्तीति असमवायिकारणलक्षणं तत्रापि गतमिति भावः।

समाधानम्- तत्रोक्तातिव्याप्तिवारणाय तत्तदसमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयम्, अर्थात् पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयम्। अभिघातासमवायिकारणलक्षणे वेगभिन्नत्वं देयम्। तथा च तुरीतन्तुसंयोगभिन्नत्वे सति पटसमवायिकारणे प्रत्यासन्नं कारणं पटस्यासमवायिकारणमिति फलितम्। तथैवान्यत्रापि।

असमवायिकारणसामान्यलक्षणे एव तत्तद्भिन्नत्वनिवेशनं तु न सम्भवति, यतस्तुरीतन्तुसंयोगस्य पटं प्रति असवायिकारणत्वाभावेऽपि तुरीपटसंयोगं प्रति तस्यासमवायिकारणत्वेन तत्तद्विशेषलक्षणे एव तत्तद्भिन्नत्वं देयं भवति। वेगस्य अभिघाताख्यसंयोगं प्रति असमवायिकारणत्वाभावेऽपि तत्रैव पाषाणे वेगेन उत्पन्ना या क्रिया (स्पन्दनात्मिका) तां प्रति तस्यासमवायिकारणत्वमस्त्येव।

ज्ञानादीनां तु कुत्रापि असमवायिकारणत्वाभावेन असमवायिकारणसामान्यलक्षणे एव ज्ञानादिभिन्नत्वं देयम्।

समवायिकारणे असमवायिकारणस्य प्रत्यासत्तिर्द्वेधा भवति– कार्यैकार्थप्रत्यासत्या कारणैकार्थप्रत्यासत्या च। तत्र घटं प्रति कपालसंयोगस्यासमवायिकारणत्वे घटसमवायिकारणे कपाले कपालसंयोगस्य प्रत्यासत्तिः (सम्बन्धः) कार्यैकार्थप्रत्यासत्तिः। घटरूपं प्रति कपालरूपस्यासमवायिकारणत्वे घटरूपसमवायिकारणे कपाले कपालरूपासमवायिकारणस्य प्रत्यासत्तिः (सम्बन्धः) कारणैकार्थप्रत्यासत्तिः। प्रथमे घटरूपकार्यस्य समवायसम्बन्धेन अधिकरणे = कपालद्वये तत्रैव कपालसंयोगस्यापि समवायेन वृत्तिरिति कार्यैकार्थप्रत्यासत्तिरुक्ता। द्वितीये घटरूपस्य समवायिकारणीभूतघटस्याधिकरणे कपालद्वये कपालरूपस्य समवायसम्बन्धेन स्थितिरिति कारणैकार्थप्रत्यासत्तिः। शब्दार्थस्तु- कार्याधिकरणे कारणस्य आसत्तिः कार्यैकार्थप्रत्यासत्तिः। कारणाधिकरणे कारणस्य आसत्तिः कारणैकार्थप्रत्यासत्तिः।

घटं प्रति कपालसंयोगस्यासवायिकारणत्वे कार्यतावच्छेदकसम्बन्धः समवायः, कारणतावच्छेदकसम्बन्धोऽपि समवायः। घटरूपं प्रति कपालरूपस्यासवायिकारणत्वे कार्यतावच्छेदकसम्बन्धः समवायः, कारणतावच्छेदकसम्बन्धस्तु स्वसमवायिसमवेतत्वरूपः। (स्वम्- कपालरूपम्, तस्य समवायि- कपालद्वयम्, तत्र समेवतो घट इति स्वसमवायिसमवेतत्वसम्बन्धेन कपालरूपं घटे वर्तते, तत्रैव घटकार्यमपि समवायेन वर्तते इति कार्यकारणयोः सामानाधिकरण्यम्। कार्यकारणयोः समानाधिकरणत्वनियमाद् द्वितीये कारणावच्छेदकसम्बन्धस्य स्वसमवायिसमवेतत्वरूपकल्पनम्।

इत्थं च कार्यैकार्थकारणैकार्थ-एतदन्यन्तरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं ज्ञानादिभिन्नं कारणमसमवायिकारणमिति लक्षणं पर्यवसितं भवति।

आभ्याम् = समवायि–असमवायिकारणाभ्यां भिन्नं कारणं निमित्तकारणं भवति।

अन्यथासिद्धिभेदं प्रतिपादयितुमुपक्रमते ग्रन्थकारः-

**कारिकावली-** **येन सह पूर्वभावः, कारणमादाय वा यस्य।**
**अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् ॥ १९ ॥**
**जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते।**
**अतिरिक्तमथाऽपि यद्भवेन्नियतावश्यकपूर्वभाविनः ॥ २० ॥**
**एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम्।**
**घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥ २१ ॥**
**तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः।**
**पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ॥ २२ ॥**

**अन्वयः-** येन सह पूर्वभावः, यस्य कारणमादाय वा, अन्यं प्रति पूर्वभावे ज्ञाते पूर्वभावविज्ञानम्, यस्य जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न गृह्यते, अथ यदपि नियतावश्यकपूर्वभाविनोऽतिरिक्तं भवेत्, एते पञ्च अन्यथासिद्धाः, दण्डत्वादिकम् आदिमम्, घटादौ दण्डरूपादि द्वितीयम् अपि दर्शितम्, तृतीयं व्योम भवेत्, अपरः कुलालजनकः, पञ्चमो रासभादिः स्यात्, एतेषु असौ तु आवश्यकः ।

**कारिकार्थः-** येन रूपेण सह कारणस्य पूर्वभावः गृह्यते, यस्य वा कारणमादाय पूर्वभावो गृह्यते, अन्यं प्रति पूर्वत्वे ज्ञाते एव यस्य पूर्वभावविज्ञानं भवति, कार्यजनकं प्रति पूर्ववृत्तितामपरिज्ञाय यस्य पूर्ववर्तित्वं न गृह्यते, अथ च नियतावश्यकपूर्वभाविनोऽतिरिक्तं यद् भवति- एते पञ्च 'अन्यथासिद्धाः' कथ्यन्ते। यथा- दण्डत्वादिकं प्रथमम्, दण्डरूपादि द्वितीयम्, आकाशं तृतीयम्, कुलालपिता चतुर्थः, रासभादिश्च पञ्चमः। एतेषु असौ पञ्चमस्तु आवश्यकोऽस्ति।

**मुक्तावली- इदानीमन्यथासिद्धत्वमेव किमायातमत आह- येनेति। यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः। यथा- घटं प्रति दण्डत्वमिति। द्वितीयमन्यथासिद्धमाह- कारणमिति। यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः किन्तु कारणमादायैवान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धम्। यथा- दण्डरूपम्। तृतीयमाह- अन्यं प्रतीति। अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम्। यथा- घटादिकं प्रत्यकाशस्य। तस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेनैव स्यात्, तद्धि शब्दसमवायिकारणत्वम्, एवं च तस्य शब्दं प्रति कारणत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धम्। ननु शब्दाश्रयत्वेन तस्य कारणत्वे काऽन्यथासिद्धिरिति चेत्, पञ्चमीति गृहाण। नन्वाकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चेत्, कत्वादिकं विशेषपदार्थो वेति ॥**

**चतुर्थमन्यथासिद्धमाह- जनकं प्रतीति। यत्कार्यजनकं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम्। यथा कुलालपितुर्घटं प्रति। तस्य हि कुलालपितृत्वेन घटं प्रति जनकत्वेऽन्यथासिद्धिः, कुलालत्वेन रूपेण जनकत्वेत्विष्टापत्तिः, कुलालमात्रस्य घटं प्रति जनकत्वात्। पञ्चमान्यथासिद्धमाह- अतिरिक्तमिति। अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तद्भिन्नमन्यथासिद्धमित्यर्थः। अत एव प्रत्यक्षे महत्त्वं कारणम्, अनेकद्रव्यत्वमन्यथासिद्धम्, तत्र हि महत्त्वमवश्यक्लृप्तम्, तेनानेकद्रव्यत्वमन्यथासिद्धम्। न च वैपरीत्ये किं विनिगमकमिति वाच्यम्, महत्त्वत्वजातेः कारणतावच्छेकत्वे लाघवात्। रासभदिरिति। यद्यपि यत्किञ्चिद्घटव्यक्तिं प्रति रासभस्य नियतपूर्ववृत्तित्वमस्ति तथाऽपि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव तद्व्यक्तेरपि सम्भवे रासभोऽन्यथासिद्ध इति भावः।**

**एतेषु- पञ्चस्वन्यथासिद्धेषु मध्ये, पञ्चमोऽन्यथासिद्ध आवश्यकस्तेनैव परेषां चरितार्थत्वात्। तथा हि- दण्डादिभिरवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसम्भवे दण्डत्वादिकमन्यथासिद्धम्। न च वैपरीत्ये किं विनिगमकमिति वाच्यम्। दण्डत्वस्य कारणत्वे दण्डघटिताया: परम्पराया: सम्बन्धत्वकल्पने गौरवात्। एवमन्येषामप्यनेनैव चरितार्थत्वं सम्भवति ।।**

**व्याख्या-** कारणं तदेव भवति यद् 'अनन्यथासिद्धत्वे सति कार्यनियतपूर्ववृत्ति' भवेत्। अत्र पञ्चविधा अन्यथासिद्धाः प्रदर्शिताः सन्ति-

१. **प्रथमः (येन सह पूर्वभावः)** यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते तद्रूपमन्यथासिद्धम्। यथा- घटं प्रति दण्डस्य पूर्ववृत्तिता दण्डत्वरूपेणास्तीति तद्रूपं= दण्डत्वं घटं प्रति अन्यथासिद्धं भवति।

२. **द्वितीयः (कारणमादाय यस्य)** यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः किन्तु कारणमाश्रित्यैव स्तः। यथा दण्डरूपस्य दण्डमादायैवान्यवव्यतिरेकौ सम्भवतो न स्वातन्त्रेणेति घटं प्रति दण्डरूपमन्यथासिद्धं भवति।

३. **तृतीयः (अन्यं प्रति पूर्वत्वे विज्ञाते यस्य यत्कार्यं प्रति पूर्ववृत्तित्वम्)** यस्य यत्कार्यं प्रति पूर्ववृत्तित्वमन्यं प्रति पूर्ववृत्तित्वं ज्ञात्वैव गृह्यते। यथा- आकाशस्य घटादिकं प्रति पूर्ववृत्तित्वं शब्दं प्रति कारणत्वं ज्ञात्वैव गृह्यते अतो घटादिकं प्रति आकाशमन्यथासिद्धम्।

४. **चतुर्थः (जनकं प्रति पूर्ववृत्तितामपरिज्ञाय यस्य न गृह्यते)** यत्कार्यजनकं प्रति पूर्ववृत्तित्वं ज्ञात्वैव यस्य कार्यं प्रति पूर्ववृत्तित्वं गृह्यते। यथा- कुलालपिता कुलालजनकत्वेनैव घटं प्रति पूर्ववर्ती भासते इति घटं प्रति सोऽन्यथासिद्धो भवति।

५. **पञ्चमः (अवश्यक्लृप्तनियतपूर्ववर्तिभिरतिरिक्तं यद्भवेत्)** अवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसम्भवे यद् अतिरिक्तं भवति। यथा- अवश्यक्लृप्तनियतपूर्ववर्तिभिर्दण्डादिभिरावश्यककारणैरेव घटनिष्पत्तिसम्भवे रासभो घटोत्पत्तेः पूर्वं नियमेन दृश्यते चेदपि घटं प्रति रासभोऽन्यथासिद्धो भवति।

## *पदानामर्थपरिचयः*

| | | |
|---|---|---|
| **अनन्यथासिद्धत्वम्** | = | **अन्यथासिद्धिशून्यत्वम्** (कारणताया अनिवार्यं विशेषणम्) |
| **नियतपूर्ववृत्तिता** | = | कार्योत्पत्तेः पूर्वं नियमतो विद्यमानत्वम् |
| **समवायिकारणम्** | = | यस्मिन् समवायेन कार्यमुत्पद्यते तत् (यथा- पटं प्रति तन्तवः) |
| **प्रत्यासत्तिः** | = | सम्बन्धः |
| **कार्यैकार्थप्रत्यासत्तिः** | = | कार्याधिकरणे कारणस्य सम्बन्धः |
| **कारणैकार्थप्रत्यासत्तिः** | = | कारणाधिकरणे कारणस्य सम्बन्धः |
| **अवश्यक्लृप्तः** | = | पूर्वमेव निश्चितम् |

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) कारणस्य सामान्यलक्षणं किम् ?

(ख) समवायिकारणं कतिविधं भवति ?

(ग) असमवायिकारणस्य द्वे प्रत्यासत्ती के ?

(घ) कुलालपिता अन्यथासिद्धोऽस्तिर्न वा ?

(ङ) पञ्चमान्यथासिद्धस्योदाहरणं किम् ?

### २. व्याख्यात्मकमनुच्छेदं लिखत

(क) असमवायिकारणस्य परिष्कृतलक्षणम् -

(ख) अन्यथासिद्धे पञ्चमस्य महत्त्वम् -

### ३. परस्परं मेलयत

| | |
|---|---|
| समवायिकारणम् | दण्डरूपम् |
| द्वितीयोऽन्यथासिद्धः | द्रव्यमेव |
| आकाशम् | तृतीयोऽन्यथासिद्धः |
| निमित्तकारणम् | कार्याधिकरणे कारणस्य प्रत्यासत्तिः |
| कार्यैकार्थप्रत्यासत्तिः | ईश्वरेच्छा |

### ४. विवेचनात्ममुत्तरं देयम्

(क) असमवायिकारणस्य द्विविधां प्रत्यासत्तिं सोदाहरणं विवृणुत।

(ख) पञ्चान्यथासिद्धानां सोदाहरणं विवेचनं कुरुत।

(ग) ज्ञानादिभिन्नत्वे सति समवायिकारणे प्रत्यासन्नं कारणमसमवायिकारणम्" इति लक्षणस्य घटकपदानि विमृश्य लिखत ।

५. कुलालपितुर्घटं प्रति कारणत्वं वर्तते वा न वा ? यदि नास्ति तर्हि कतमेनान्यथासिद्धेन तस्य निरासः क्रियते ?

६. स्वसमवायिसमवेतत्वसम्बन्धस्य समन्वयो दृष्टान्तप्रदर्शनेन सम्यग्रीत्या क्रियताम् ।

# द्रव्यगुणकर्मादीनां साधर्म्यवैधर्म्यनिरूपणम्

द्रव्यगुणकर्मादीनां क्रमशः साधर्म्यवैधर्म्ये व्याख्यातुमुपक्रमते ग्रन्थकारः-

**कारिका-** **समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् ।**
**गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् ।। २३ ।।**

**अन्वयः-** द्रव्यस्यैव समवायिकारणत्वं विज्ञेयम् । अथ ज्ञेयं गुणकर्ममात्रवृत्ति असमवायिहेतुत्वमपि ।

**कारिकार्थः-** समवायिकारणता च द्रव्यस्यैव भवति नान्यस्य । असमवायिकारणत्वं च गुणकर्ममात्रवृत्ति भवति ।

**मुक्तावली-** **समवायीति । स्पष्टम् । गुणेति । असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यम्, न तु गुणकर्मणोः साधर्म्यमित्यत्र तात्पर्यम् । अथ वाऽसमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः । तेन ज्ञानादीनामसमवायिकारणत्वविरहेऽपि नाव्याप्तिः ।।**

**व्याख्या-** समवायिकारणं द्रव्यमेव भवतीति पृथिव्यादीनां नवद्रव्याणां समवायिकारणत्वं साधर्म्यं बोद्धव्यम् । असमवायिकारणं गुणकर्ममात्रवृत्ति भवतीत्युक्ते गुणकर्मणोरसमवायिकारणत्वं साधर्म्यमिति कथने तात्पर्यं नास्ति, यतः सर्वे गुणा असमवायिकारणानि भवन्त्येवेति स्थितिर्नास्ति । अतोऽसमवायिकारणत्वं चेद् गुणानां कर्मणां वेति व्यवस्थासम्पादनार्थमिति बोद्धव्यम्, न त्वेतत् साधर्म्यप्रदर्शनपरम् । अथवा गुणकर्मभिन्नानामसमवायित्वं वैधर्म्यं भवतीति तात्पर्येणोक्तकारिकार्थो बोद्धव्यः ।

यदि सम्भवति साधर्म्यवर्णने वैधर्म्यकथनमनुचितमित्युच्यते तदा तु- 'असमवायिकारणवृत्तिसत्ताभिन्नजाति मत्त्वं तदर्थः परिष्करणीयः । असमवायिकारणानि यानि गुणक्रियादीनि भवन्ति तद्वृत्तिर्या सत्ताभिन्ना जातिः (गुणत्वकर्मत्वरूपा जातिः) तद्वत्त्वस्य सकलगुणकर्मसु सत्त्वेन न दोषः । तथा च ज्ञानादीनामसमवायिकारणत्वविरहेऽपि न क्षतिः ।

**कारिका-** **अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते ।**
**क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता ।। २४ ।।**

**अन्वयः-** नित्यद्रव्येभ्यः अन्यत्र आश्रितत्वम् इह उच्यते । क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता ।

**कारिकार्थः-** नित्यद्रव्यभिन्नानामश्रितत्वं साधर्म्यं ज्ञेयम्। पृथिव्यादिनवानां द्रव्याणां तु द्रव्यत्वं गुणयोगित्वं वा साधर्म्यं ज्ञेयम्।

**मुक्तावली- अन्यत्रेति। नित्यद्रव्याणि- परमाण्वाकाशादीनि विहायाऽश्रितत्वं साधर्मम्यमित्यर्थः। आश्रितत्वं तु समवायादिसम्बन्धेन वृत्तिमत्त्वम्, विशेषणतया नित्यानामपि कालादौ वृत्तेः। इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमारभते- क्षित्यादीनामिति स्पष्टम्॥**

**व्याख्या–** नित्यद्रव्यभिन्नानामित्युक्ते परमाण्वाकाशादीनि विहायान्येषामित्यर्थः। तथा च परमाण्वाकाशादीन् विहाय अन्येषां कार्यद्रव्याणामाश्रितत्वं साधर्म्यं भवतीति फलितम्। आश्रितत्वं नाम समवायसम्बन्धेन वृत्तिमत्त्वमत्र विवक्षितम्। तेन नित्यानां परमाण्वाकाशादीनामपि कालिकविशेषणतया कालादौ सत्त्वेऽपि न दोषः। क्षित्यादीनामिति- पृथिव्यादीनां नवद्रव्याणां द्रव्यत्ववत्त्वम् (नवसु द्रव्यत्वस्य सत्त्वात्) गुणयोगित्वं (गुणयोगः) च साधर्म्यं विज्ञेयमित्यर्थः।

**कारिका- क्षितिर्जलं तथा तेजः पवनो मन एव च।**
**परापरत्वमूर्तत्व क्रियावेगाश्रया अमी॥ २६॥**

**अन्वयः-** क्षितिः जलं तथा तेजः पवनः मन एव च इति अमी परापरत्वमूर्तत्वक्रियावेगाश्रयाः।

**कारिकार्थः-** पृथ्वीजलतेजोवायुमनांसि अमी पञ्च परत्वापरत्वयोराश्रयाः, मूर्तत्वाश्रयाः, क्रियाश्रयाः, वेगाश्रयाश्च भवन्ति।

**मुक्तावली- क्षितिरिति। पृथिव्यप्तेजोवायुमनसां परत्वापरत्ववत्त्वं मूर्तत्वम्, वेगवत्त्वम्, कर्मवत्त्वं च साधर्म्यम्। न च यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यम्। परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। मूर्तत्वम्-अपकृष्टपरिमाणवत्त्वम्, तच्चैषामेव, गगनादिपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात्। पूर्ववत् कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम्, वेगवत्त्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं च बोध्यम्॥**

**व्याख्या-** पृथिवीजलतेजोवायुमनसां परत्वापरत्ववत्त्वम्, मूर्तत्ववत्त्वम्, क्रियावत्त्वम्, वेगवत्त्वं च साधर्म्यं भवतीत्यर्थः। यत्र घटपटादौ परत्वमपरत्वं क्रिया वेगश्च नोत्पन्नास्तत्र साधर्म्यलक्षणस्याव्याप्तिरिति शङ्का तु न कर्तव्या, 'परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य' विवक्षितत्वात्। अर्थाद् यत्र परत्वम् अपरत्वं वा उत्पन्नमस्ति, तादृशपरत्वापरत्वाद्यधिकरणीभूतघटपटादिद्रव्येषु विद्यमाना या द्रव्यत्वव्याप्या जातिः पृथिवीत्व-जलत्व-तेजस्त्व-वायुत्व-मनस्त्वजातयस्तद्वत्त्वस्य परत्वापरत्वानुत्पन्नघटपटादिद्रव्येष्वपि सत्त्वेन नाव्याप्तिरित्यर्थः। एवं क्रियावत्त्वसाधर्म्यलक्षणस्यापि तात्पर्यं 'कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम्'।

वेगवत्त्वसाधर्म्यलक्षणस्यापि 'वेगवदवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वम्' बोद्धव्यम्। तथा च यत्र क्रिया नोत्पन्ना, वेगश्च नोत्पन्नस्तादृशं क्षितिजलादिकमादाय नाव्याप्तिरिति च।

अत्रेदं ध्येयं यद् वस्तुतोऽत्र पृथिवीजलतेजोवायुमनसां परत्वापरत्ववत्त्वम्, मूर्तत्ववत्त्वम्, क्रियावत्त्वम्, वेगवत्त्वं च साधर्म्यं यदुच्यते तस्य तात्पर्यमस्ति- परत्वापरत्वयोराश्रयश्चेत् अमी पञ्च एव। एवं क्रियावत्त्वम्, वेगवत्त्वमित्यादिकमपि अमीषामेव नान्येषामिति ज्ञापनाय वर्तते। व्यवस्थार्थमिदमुच्यते न तु सर्वेषां तथात्वं भवितव्यमेवेति नियमार्थं तद्वचनम्। उक्तसाधर्म्यस्य लक्षणत्वे वक्तव्ये तु- लक्षणस्यान्यूनानतिरिक्तवृत्तित्वस्यावश्यकत्वेन दोषवारणाय जातिघटितलक्षणपरिष्कार आवश्यक एव। तद्दृष्ट्यैव ग्रन्थकारः सर्वत्र एवंरूपेण जातिघटितलक्षणं परिष्करोतीति अन्यत्रापीति एषा रीतिर्ज्ञेया।

**कारिका-** **कालखात्मदिशां सर्वगतत्वं परमं महत्।**
**क्षित्यादि पञ्च भूतानि चत्वारि स्पर्शवन्ति हि॥ २६॥**

**अन्वयः-** कालखात्मदिशां सर्वगतत्वम्, परमं महत्, क्षित्यादि पञ्च भूतानि, चत्वारि हि स्पर्शवन्ति।

**कारिकार्थः-** कालः, आकाशः, आत्मा, दिग् इत्येतेषां द्रव्याणां सर्वगतत्वं परममहत्परिमाणवत्त्वं च साधर्म्यं भवति। क्षित्यादिपञ्चानां (पृथिव्यप्तेजोवाय्वाकाशानाम्) भूतत्वं साधर्म्यं भवति। आकाशं विहाय पूर्वचतुर्णां (पृथिव्यप्तेजोवायूनां) च स्पर्शवत्त्वं साधर्म्यं भवति।

**मुक्तावली- कालेति। कालाकाशात्मदिशां सर्वगतत्वम्। सर्वगतत्वं सर्वमूर्तसंयोगित्वम्, परममहत्त्वं च। परममहत्त्वत्वं जातिविशेषः, अपकर्षानाश्रयपरिमाणवत्त्वं वा। क्षित्यादीति। पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वम्। तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्। चत्वारीति। पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम्॥**

**व्याख्या-** कालाकाशात्मदिशां सर्वगतत्वम्, परममहत्परिमाणवत्त्वं च साधर्म्यं विज्ञेयम्। सर्वगतत्वं नाम- सर्वमूर्तद्रव्यसंयोगित्वम्। भवन्ति च आकाशकालादिविभुपदार्थाः सर्वमूर्तद्रव्यसंयोगिनः। **परममहत्त्वत्वमिति-** अत्र परममहत्वं परममहत्परिमाणम्, तद्वृत्ति परममहत्त्वं च जातिविशेषोऽस्ति। अयं परममहान् इति या प्रतीतिः तादृशप्रतीतिविषयतावच्छेदकं परममहत्त्वम्, तच्च परममहत्परिमाणे वर्तते। अथवा अपकर्षानाश्रयपरिमाणत्वं तद्बोद्ध्यम्। अपकर्षो जातिविशेष एव। तदनाश्रयीभूतं यत् परममहत्परिमाणं तत्त्वम्- अपकर्षानाश्रयपरिमाणत्वम्।

**भूतत्वं नाम- बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्।** बहिरिन्द्रियाणि पञ्च- चक्षुर्घ्राणरसनत्वक्श्रोत्राणि, तद्ग्राह्या विशेषगुणाः- गन्धादयः पञ्च (रूप-रस-गन्ध-स्पर्श-शब्दाः), तद्वत्त्वं तेषु पञ्चसु (पृथिवीजलतेजोवाय्वाकाशेषु) वर्तत इति लक्षणसमन्वयः। षोडश विशेषगुणा न्यायवैशेषिकशास्त्रे प्रसिद्धाः सन्ति। तद्यथा- 'बुद्ध्यादिषड्कं

स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः । अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः' अर्थाद् बुद्धि, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, रूपरसगन्धस्पर्शाः, स्नेहः, सांसिद्धिकद्रवत्वम्, अदृष्टं भावनाख्यसंस्कारः शब्दश्च एते विशेषगुणा भवन्ति।

**कारिका-** **द्रव्यारम्भश्चतुर्षु स्यादथाऽकाशशरीरिणाम्।**
**अव्याप्यवृत्तिक्षणिको विशेषगुण इष्यते ।। २७ ।।**

**अन्वयः-** चतुर्षु द्रव्यारम्भः स्यात्, अथ आकाशशरीरिणाम् अव्याप्यवृत्तिक्षणिको विशेषगुण इष्यते।

**कारिकार्थः-** पृथ्वीजलतेजोवायुषु द्रव्यारम्भो भवति। आकाशे आत्मसु चाव्याप्यवृत्तिः क्षणिको विशेषगुणस्तिष्ठतीति न्यायशास्त्रे इष्यते।

**मुक्तावली- द्रव्यारम्भ इति। पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वम्। न च द्रव्यानारम्भके घटादावव्याप्तिः। द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। अथाऽकाशेति। आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं साधर्म्यमित्यर्थः। आकाशस्य विशेषगुणः शब्दः। स चाव्याप्यवृत्तिः, यदा किञ्चिदवच्छेदेन शब्द उत्पद्यते, तदाऽन्यावच्छेदेन तदभावस्याऽपि सत्त्वात्। क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्। योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिविशेषगुणनाश्यत्वात् प्रथमशब्दस्य द्वितीयशब्देन नाशः। एवं ज्ञानादीनामपि। ज्ञानादिकं यदाऽऽत्मनि विभौ शरीरावच्छेदेनोत्पद्यते तदा घटाद्यवच्छेदेन तदभावोऽस्त्येव। एवं ज्ञानादिकमपि क्षणद्वयावस्थायि। इत्थं चाव्याप्यवृत्तिविशेषगुणवत्त्वम्, क्षणिकविशेषगुणवत्त्वं चार्थः ।।**

**व्याख्या-** द्रव्यारम्भकाः= पृथिवी-जल-तेजोवायवः, अतो द्रव्यारम्भकत्वमेतेषां चतुर्णां साधर्म्यमिति कारिकार्थः। न च द्रव्यानारम्भके घटपटादौ द्रव्यारम्भकत्वसाधर्म्यलक्षणस्याव्याप्तिरिति वाच्यम् ? उक्तलक्षणस्य द्रव्यसमवायि कारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वार्थकतया विवक्षितत्वान्न दोषः।

द्रव्यस्य समवायिकारणीभूता द्रव्यारम्भका ये ये कपालतन्तु-आदिपदार्थाः, तेषु वृत्तिर्या द्रव्यत्वव्याप्या जातयः- पृथिवीत्वजलत्वतेजस्त्ववायुत्वजातयः, तद्वत्त्वस्य पृथिवीजलतेजोवायुषु सत्त्वान्न द्रव्यानारम्भकघटादिकमादाय अव्याप्तिः। आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं साधर्म्यमस्ति। आकाशे विद्यमानः शब्दाख्यो विशेषगुणोऽव्याप्यवृत्तिः क्षणिकश्चास्ति। योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वनियमेन प्रथमशब्दस्य द्वितीयशब्देन नाशात् शब्दज्ञानादिगुणानां क्षणिकत्वम्।

क्षणिकत्वं नाम तृतीयक्षणध्वंसप्रतियोगित्वम्। अत्र क्षणिकत्वं बौद्धानामिव द्वितीयक्षणध्वंसप्रतियोगित्वरूपं न स्वीक्रियते। क्षणिकश्चेदपि पदार्थस्तस्य द्वितीयक्षणपर्यन्तं स्थितिरवश्यमङ्गीकार्या। प्रथमक्षण उत्पत्तिक्षणो भवति,

तदनन्तरं तस्य स्थितिर्वक्तव्या, तदनन्तरमेव विनाशो वक्तव्यः। अतः क्षणिकपदार्थो न्यूनतमं द्वितीयक्षणपर्यन्तं स्थायी वक्तव्य इति तृतीयक्षणध्वंसप्रतियोगित्वं क्षणिकत्वलक्षणं नैयायिकैः कृतम्।

एवं जीवात्मनि विद्यमाना योग्या ज्ञानादिविशेषगुणा अपि अव्याप्यवृत्तयः क्षणिकाश्च। यदा शरीरावच्छेदेनात्मनि ज्ञानमुत्पद्यते तदा घटाद्यवच्छेदेनात्मनि ज्ञानं नोत्पद्यते इति ज्ञानमव्याप्यवृत्तिर्भवति। 'योग्य' इति विशेषणं तु आत्मनि विद्यमानविशेषगुणयोर्धर्माधर्मयोर्व्यावृत्त्यर्थमस्ति। तयोश्चिरकालस्थायित्वेन (फलप्राप्तिपर्यन्तम्) क्षणिकत्वानङ्गीकारात्। योग्यविभुविशेषगुणानां स्वोत्तरवर्तिविशेषगुणनाश्यत्वनियमात् प्रथमोत्पन्नज्ञानस्य द्वितीयज्ञानेन नाशः।

**कारिका-** **रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः।**

**गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः॥ २८॥**

**अन्वयः-** प्रथमास्त्रयः रूपद्रवत्वप्रत्यक्षयोगिनः, द्वे गुरुणी रसवती, द्वयोर्नैमित्तिको द्रवः।

**कारिकार्थः-** प्रथमास्त्रयः = पृथिव्यप्तेजांसि रूपद्रवत्वप्रत्यक्षयोगिनो भवन्ति। द्वे = पृथ्वीजले च गुरूणी = गुरूत्ववती रसवती च भवतः। द्वयोः = पृथ्वीतेजसोः, नैमित्तिकद्रवत्वं साधर्म्यं भवति।

**मुक्तावली- रूपद्रवत्वेति। पृथिव्यप्तेजसां रूपवत्त्वं, द्रवत्ववत्त्वं, प्रत्यक्षविषयत्वं चेत्यर्थः। न च चक्षुरादीनां भर्जनकपालस्थवह्नेरुष्मणश्च रूपवत्त्वे किं मानमिति वाच्यम्। तत्रापि तेजस्त्वेन रूपानुमानात्। एवं वाय्वानीतपृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यम्। न च घटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्ववत्त्वमव्याप्तमिति वाच्यम्। द्रवत्ववद्वृत्तिद्रव्यत्व व्याप्यजातिमत्त्वस्य विवक्षितत्वात्। घृतजतुप्रभृतिषु पृथिवीषु जलेषु द्रुतसुवर्णादौ तेजसि च द्रवत्वसत्त्वात्तत्र च पृथिवीत्वादिसत्त्वात्तदादाय सर्वत्र लक्षणसमन्वयः। न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तम्, अतिव्याप्तञ्च रूपादाविति वाच्यम्, चाक्षुषलौकिकप्रत्यक्षविषयवृत्तिद्र व्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति। गुरुणी इति। गुरुत्ववत्त्वं रसवत्त्वं च पृथिवीजलयोरित्यर्थः। न च घ्राणेन्द्रियादीनां वाय्वानीतपृथिव्यादिभागानां च रसादिमत्त्वे किं मानमिति वाच्यम्? तत्रापि पृथिवीत्वादिना तदनुमानात्। द्वयोरिति- पृथिवीतेजसोरित्यर्थः। न च नैमित्तिकद्रवत्वं घटादौ वह्न्यादौ चाव्याप्तमिति वाच्यम्, नैमित्तिकद्र वत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्।**

**व्याख्या-** पृथिव्यप्तेजसां रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वं च साधर्म्यं भवतीत्यर्थः। भर्जनकपालस्थतेजसि (अत्युष्णखर्परस्थवह्नौ) अपि रूपं वर्तते, तत्र रूपादर्शनं तु तस्यानुद्भूतत्त्वाद् अस्ति। यतस्तदपि तेजःपदार्थः,

तेजस्त्वादिना तत्रापि रूपस्यानुमानं कर्तव्यं भवति। एवं वायुनाऽनीतानां पृथिवीजलतेजोंऽशानामपि पृथिवीत्वादिनैव रूपानुमानं कर्तव्यमिति तत्र तत्र नाव्याप्तिशङ्का करणीया। एवं घटपटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्वाभावादव्याप्तिरित्यपि नाशङ्कनीयम्, अत्रापि पूर्ववद् जातिघटितलक्षणपरिष्कारेण अर्थाद् द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षणेन न दोषः।

एवमतीन्द्रियपरमाणूनां प्रत्यक्षविषयत्वाभावात् प्रत्यक्षविषयत्वलक्षणस्याव्याप्तिरित्यपि न शङ्कनीया, तस्यापि चाक्षुषलौकिकप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वार्थस्य तात्पर्यात्। यतो हि त्र्यणुकादयश्चक्षुषा दृश्यन्ते, तेषु च पृथिवीत्वादिजातयः सन्ति, ताश्च जातयः परमाणुष्वपि वर्तन्ते इति चाक्षुषलौकिकप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य तत्र सत्त्वात् परमाणुषु नाव्याप्तिः।

एवं पृथिवीजलयोर्गुरुत्ववत्त्वं रसवत्त्वं च साधर्म्यं ज्ञेयम्। अत्र घ्राणेन्द्रियरसनेन्द्रिययोः, वायुनाऽनीतपार्थिवजलीयांशानां च गुरुत्ववत्त्वे रसवत्त्वे च किं प्रमाणम्? येन तत्राव्याप्तिर्वारिता स्यादिति प्रश्ने तु- तत्रापि पृथिवीत्वजलत्वादिधर्मवत्त्वेन तेषां तत्तद्धर्मवत्त्वमनुमितं भवतीति उच्यते। पृथिवीतेजसोश्च नैमित्तिकद्रवत्ववत्त्वं साधर्म्यं ज्ञेयम्। यत्र घटादिपृथिवीद्रव्यादौ वह्न्यादौ च नैमित्तिकद्रवत्वाभावेनाव्याप्तिरिति शङ्क्यते तत्र जातिघटितलक्षणपरिष्कारेण तद्वारणीयम्। अर्थाद् नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वार्थस्य विवक्षणेन दोषः परिहर्तव्यः। लक्षणसमन्वयप्रक्रिया च पूर्ववत् बोद्धव्या।

**कारिका-** **आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः।**
**यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत्॥ २९॥**

**अन्वयः-** आत्मानः भूतवर्गाः च विशेषगुणयोगिनः, यस्य यद् उक्तं साधर्म्यम् इतरस्य तद् वैधर्म्यम्।

**कारिकार्थः-** आत्मनो भूतपदार्थाश्च विशेषगुणवन्तो भवन्ति। एतावता येषां येषां यद्यत् साधर्म्यमुक्तं तत्तत् तदितराणां वैधर्म्यं भवतीति।

**मुक्तावली- पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः। यदुक्तमिति। ज्ञेयत्वादिकं विहायेति बोध्यम्। तत्तु न कस्याऽपि वैधर्म्यम्। केवलान्वयित्वात्॥ २९॥**

**व्याख्या-** पृथिव्प्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वं साधर्म्यं भवतीत्यर्थः। एतावता यद् यत् साधर्म्यं येषां येषां कथितं, तत् तदितरेषां वैधर्म्यं भवतीति। परन्तु अत्र ज्ञेयत्वप्रमेयत्वाभिधेयत्वादयः केवलान्वयिधर्मा वर्जनीयाः, एते केवलान्वयिधर्मा कस्यापि वैधर्म्या न सम्भवन्ति, यतो हि ज्ञेयत्वप्रमेयत्वादयः सर्वेषु ज्ञेयप्रमेयपदार्थेषु वर्तन्तेऽतो ज्ञेयत्वादीनां सर्वत्र विद्यमानत्वात् तेषां केवलान्वयित्वमुच्यते।

केवलान्वयित्वं नाम अत्यन्ताभावाप्रतियोगित्वम्। यस्यात्यन्ताभावो न कुत्रापि वर्तते, सः केवलान्वयी भवति। ज्ञेयत्वप्रमेयत्वादीनां कुत्रापि अभावो वक्तुं न शक्यतेऽतस्ते धर्माः केवलान्वयिनो भवन्ति। केवलान्वयिधर्मस्य सर्वत्र सत्त्वेन सः कस्यापि वैधर्म्यं (व्यावर्तकः धर्मः) भवितुं नार्हति, अतस्तद्विहायेत्युक्तम्।

## पदानामर्थपरिचयः

**आश्रितत्वम्** = समवायसम्बन्धेन वृत्तिमत्त्वम्

**मूर्तत्वम्** = अपकृष्टपरिमाणवत्त्वम् (परिच्छिन्नपरिमाणवत्त्वम्)

**सर्वगतत्वम्** = सर्वमूर्तद्रव्यसंयोगित्वम्

**भूतत्वम्** = बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्

**अव्याप्यवृत्तित्वम्** = एकदेशवृत्तित्वम्

**क्षणिकत्वम्** = तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्

**नैमित्तिकद्रवत्वम्** = निमित्तवशाद् (अग्निसंयोगात्) जातं द्रवत्वम्

**केवलान्वयित्वम्** = अत्यन्ताभावाप्रतियोगित्वम् (सर्वत्र वर्तमानत्वम्)

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) समवायिकारणत्वं कस्य साधर्म्यं वर्तते ?

(ख) मूर्तद्रव्याणि कति सन्ति ? तेषां नामानि लिखत।

(ग) आकाशात्मनोः को विशेषगुणः साधर्म्यत्वेन स्वीकृतः ?

(घ) भूतत्वं कतिषु द्रव्येषु वर्तते ?

(ङ) केवलान्वयिधर्माणां नामद्वयं लिखत।

### २. व्याख्यात्मकमुत्तरं लिखत

(क) "समवायिकारणत्वं द्रव्यस्यैव" इत्यस्य परिष्कारं प्रदर्शयत।

(ख) "अन्यत्र नित्यद्रव्येभ्य आश्रितत्वम्" इति कारिकाया आशयः कः ?

(ग) परत्वापरत्वक्रियावेगादीनां साधर्म्यं पृथिव्यादिपञ्चसु कथं घटते ? तद्दर्शयत।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) क्षणिकत्वं नाम तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वमिति मुक्तावलीकारस्य मतं बौद्धमतात् कथं भिद्यते ? इति निरूप्य शब्दस्योदाहरणं दत्त्वा क्षणत्रयप्रक्रियां स्पष्टयत।

(ख) परमाणूनामतीन्द्रियत्वेऽपि तेषु प्रत्यक्षविषयत्वं कथं साधर्म्यत्वेनाङ्गीक्रियते ? निरूपयत।

(ग) पृथिवी-तेजसोर्नैमित्तिकद्रवत्वं साधर्म्यमिति दर्शयन् वह्न्यादावव्याप्तिनिवारणाय जातिघटितलक्षणं विवृणुत।

४. **परस्परं मेलयत**

| | |
|---|---|
| सर्वगतत्वम् | पृथिवीजलतेजोवायूनाम् |
| द्रव्यारम्भकत्वम् | बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् |
| भूतत्वम् | आकाशकालदिगात्मनाम् |
| रसवत्त्व-गुरुत्ववत्त्वे | पृथिवीतेजसी |
| नैमित्तिकद्रवत्वम् | पृथिवीजले |

५. **यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तदिति नियमं केवलान्वयिधर्माणां सन्दर्भे सोदाहरणं विवृणुत।**

६. **आकाशात्मनां विशेषगुणानाम् "अव्याप्यवृत्तित्वं" किमर्थं प्रोक्तम् ? विमृश्य लिखत।**

नवमः पाठः

# द्रव्येषु गुणस्थितिनिदर्शनम्

**कारिका-**

**स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः ।**
**स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ।। ३० ।।**
**स्पर्शादयोऽष्टौ वेगश्च गुरुत्वञ्च द्रवत्वकम् ।**
**रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ।। ३१ ।।**
**स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश ।**
**बुद्ध्यादिषट्कं सङ्ख्यादिपञ्चकं भावना तथा ।। ३२ ।।**
**धर्माधर्मौ गुणा एते ह्यात्मनः स्युश्चतुर्दश ।**
**सङ्ख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ।। ३३ ।।**
**सङ्ख्यादिपञ्चकं बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।**
**परापरत्वे सङ्ख्याद्याः पञ्च वेगश्च मानसे ।। ३४ ।।**

**अन्वयः-** स्पर्शादयः अष्टौ, वेगाख्यः संस्कारः, मरूतो गुणाः । स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः । स्पर्शादय अष्टौ, वेगश्च, गुरूत्वं च, द्रवत्वकम्, रूपम्, रसः, तथा स्नेहः एते चतुर्दश वारिणि । स्नेहहीनाः गन्धयुता एते चतुर्दश क्षितौ । बुद्ध्यादिषट्कम्, सङ्ख्यादिपञ्चकम्, भावना, तथा धर्माधर्मौ एते हि चतुर्दश गुणाः आत्मनः स्युः । सङ्ख्यादि पञ्चकं कालदिशोः, ते च शब्दश्च खे, सङ्ख्यादयः पञ्च, बुद्धिः, इच्छा, यत्नः, अपि च ईश्वरे, परापरत्वे, सङ्ख्याद्याः पञ्च, वेगश्च मानसे ।

**कारिकार्थः-** वायुद्रव्ये अष्टौ गुणा विद्यन्ते- स्पर्शः, सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम् इति 'स्पर्शादयोऽष्टौ', तथा च 'वेगाख्यः संस्कारः' एते वायोर्गुणास्सन्ति । आहत्य वायौ नव गुणाः सन्ति ।

तेजसि अपि वायोरिव 'स्पर्शादयोऽष्टौ' (स्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानि) गुणाः, एतदतिरिच्य रूपम्, वेगः, तथा नैमित्तिकं द्रवत्वम्, एते गुणाः सन्ति । एवमाहत्य तेजसः ११ गुणा भवन्ति ।

स्पर्शादयोऽष्टौ (पूर्वोक्ताः) वेगः, गुरुत्वम्, द्रवत्वम्, (सांसिद्धिकम्) रूपम्, रसः तथा स्नेहश्च वारिणि = जले सन्ति । आहत्य जलेऽपि चतुर्दश (१४) गुणा भवन्ति ।

क्षितौ= पृथिव्यां स्नेहहीना एते एव चतुर्दश गुणा भवन्ति। अर्थाद् जलवदेवात्रापि अष्टौ स्पर्शादयः, वेगगुरुत्वद्रवत्वरूपरसाः सन्ति, स्नेहस्थाने अत्र गन्धोऽस्ति। आहत्य पृथिव्यामपि १४ गुणाः सन्ति।

बुद्ध्यादिषट्कम् (बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः), सङ्ख्यादिपञ्चकम् (सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः), भावना (संस्कारः) तथा च धर्माधर्मौ (अदृष्टम्) एते आत्मनः= जीवात्मनश्चतुर्दश (१४) गुणास्सन्ति।

कालस्य दिशश्च 'सङ्ख्यादिपञ्चकम्' (सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः) एव गुणा भवन्ति। द्वयोः पञ्च पञ्च गुणाः सन्तीत्यर्थः।

खे- आकाशे 'ते च' (सङ्ख्यादिपञ्चकम्) एवं 'शब्दः' गुणोऽस्ति। आहत्य आकाशस्य ६ गुणा भवन्ति।

ईश्वरे 'सङ्ख्यादिपञ्चकम्' (सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः) तथा च 'बुद्धिः, इच्छा, प्रयत्नः' च गुणाः भवन्ति। आहत्य ईश्वरस्य ८ गुणा भवन्ति। (ईश्वरस्य ज्ञानेच्छाप्रयत्ना नित्या भवन्ति)।

परापरत्वे (परत्वम्, अपरत्वम्), सङ्ख्यादिपञ्चकम् (सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः) एवं वेग एते मनसो गुणा भवन्ति। संक्षेपेण तावदेकस्मिन्नेव श्लोके केनचित् संगृहीतम्-

**वायोर्नवैकादश तेजसो गुणाः, जलक्षितिप्राणभृतां चतुर्दश।**

**दिक्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैव च॥**

**मुक्तावली- स्पर्शादय इति॥ ते च पञ्च सङ्ख्यादयः। खे- आकाशे॥**

**व्याख्या-** कारिकार्थक्रमे ह्येवार्थः स्पष्टः।

### *पदानामर्थपरिचयः*

| | | |
|---|---|---|
| **मरुत्** | = | वायुद्रव्यम् |
| **वारि** | = | जलम् |
| **वेगाख्यः संस्कारः** | = | वेगनामकः संस्कारविशेषः |
| **सङ्ख्यादिपञ्चकम्** | = | सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभाग इति पञ्च गुणाः |
| **बुद्ध्यादिषट्कम्** | = | बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः |
| **भावना** | = | अनुभवजन्या स्मृतिहेतुः संस्कारविशेषः, य आत्मन्येव तिष्ठति |
| **स्नेहहीनत्वम्** | = | स्नेहगुणरहितत्वम् |

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) वायोः कति गुणाः सन्ति ?

(ख) 'बुद्ध्यादिषट्कम्' इति कस्य गुणाः ?

(ग) आकाशे सङ्ख्यादिपञ्चकमतिरिच्य को विशेषगुणो वर्तते ?

(घ) ईश्वरे त्रयो विशेषगुणाः के सन्ति ?

(ङ) मनसि कति गुणाः कारिकानुसारं प्रोक्ताः ?

### २. व्याख्यात्मकमुत्तरं लिखत

(क) "स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश" इति कारिकांशं विवृणुत।

(ख) जल-पृथिव्योः गुणानां सादृश्यं वैसादृश्यं च स्पष्टयत।

(ग) जीवात्मनः चतुर्दशगुणाः सन्ति, परम् ईश्वरे केवलम् अष्टौ गुणाः। आत्मनः के गुणा ईश्वरे न सन्तीति व्याख्यात।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) 'सङ्ख्यादिपञ्चकम्' सर्वेषु नवद्रव्येषु साधारणं साधर्म्यं वर्तते न वेति विविच्य कारिकानुसारेण कालदिगाकाशेश्वरादिषु एतेषां स्थितिं विश्लेषयत।

(ख) तेजसि 'नैमित्तिकं द्रवत्वम्' इति गुणः कुत्र कुत्र दृश्यते ? दर्शयत।

### ४. परस्परं मेलयत

| | |
|---|---|
| मरुत् | शब्दः सङ्ख्यादिपञ्चकं च |
| वारि | परापरत्वं सङ्ख्यादिपञ्चकं वेगश्च |
| खम् | बुद्ध्यादिषट्कं भावना धर्माधर्मौ च |
| मानसम् | स्नेहयुक्तः चतुर्दशगुणवान् |
| आत्मा | स्पर्शाद्यष्टौ वेगाख्यः संस्कारश्च |

### ५. यदि मनसि वेगो न स्यात्, तर्हीन्द्रियाणामधिष्ठातृत्वं कथं बाधितं भवेत् ? लिखत

*परियोजनाकार्यम्* –

नवद्रव्याणां नामानि विलिख्य कारिकानुसारं तेषां गुणानां सङ्ख्यां तथा विशेषगुणानां च सूचीं रचयत।

दशमः पाठः

# पृथिवीनिरूपणम्

क्रमप्राप्तं पृथ्वीस्वरूपं प्रतिपादयितुमारभते ग्रन्थकारः-

**कारिका–** तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता।
षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥ ३५ ॥

**अन्वयः-** तत्र क्षितिः गन्धहेतुः, नानारूपवती मता, तत्र रसः तु षड्विधः, गन्धः तु द्विविधः मतः।

**कारिकार्थः-** तत्र = नवद्रव्येषु मध्ये, क्षितिः = पृथिवी, गन्धहेतुः = गन्धवती (गन्धसमवायिकारणम्)। नानारूपवती = शुक्लनीलाद्यनेकवर्णवती मता = कथिता। तत्र = पृथिव्याम्, रसः तु = रसनामको गुणः, षड्विधः = मधुराम्ललवणतिक्तकटुकषायभेदात् षट्प्रकारकः, गन्धस्तु = गन्धनामको गुणस्तु, द्विविधः = द्विप्रकारको मतः = अभिहितः।

**मुक्तावली-** साधर्म्यवैधर्म्ये निरूप्य सम्प्रति प्रत्येकं पृथिव्यादिकं निरूपयति तत्रेति। गन्धहेतुरिति। गन्धसमवायिकारणमित्यर्थः। यद्यपि गन्धवत्त्वमात्रं पृथिव्या लक्षणमुचितम्, तथाऽपि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम्। तथा हि पृथिवीत्वं हि गन्धसमवायिकारणतावच्छेदकतया सिद्ध्यति, अन्यथा गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्तेः।

**व्याख्या–** तत्र क्षितिर्गन्धहेतुरिति कारिकांशस्य व्याख्याने मुक्तावलीकारः "गन्धसमवायिकारणमित्यर्थः" इति कथयन् पृथिव्याः लक्षणं परिष्करोति। यद्यपि केवलं गन्धवत्त्वमात्रं पृथिव्या लक्षणमुचितं तथाऽपि पृथिवीत्वजातौ प्रमाणोपन्यासाय अर्थात् पृथिवीत्वजातिसाधकस्यानुमानप्रमाणस्य प्रदर्शनायेति ग्रन्थकृदाशयः। अत्रायं विमर्शो यल्लक्षणं तु केवलं लक्ष्यस्यान्यस्माद् व्यावर्तकं भवति परन्तु पृथिवीत्वं नाम काचिद् जातिरस्तीति साधयितुं कार्यकारणभाव आश्रयणीयो भवति। तथा च गन्ध एकं कार्यम्, तत्र कार्यता वर्तते। तस्य कार्यत्वं च गन्धत्वधर्मेणावच्छिन्नं वर्तते। न्यायसिद्धान्तानुसारं कार्यता सदैव कारणता निरूपिता भवति, सा च कारणता कञ्चिद् धर्ममवच्छेदकतयाऽपेक्षते। गन्धनिष्ठा या कार्यता तन्निरूपिता या पृथिवीनिष्ठा समवायिकारणता तस्या अवच्छेदकत्वेन पृथिवीत्वजातिः सिद्ध्यति। यदि पृथिवीत्वं जातिरूपेण न स्वीक्रियेत तर्हि गन्धत्वावच्छिन्नं

प्रति कारणतावच्छेदकस्याभावाद् गन्धस्योत्पत्तिर्निर्हेतुकाऽर्थादाकस्मिकी स्यात्। अत्र आकस्मिकत्वं नाम नियतकारणविरहप्रयुक्तकार्यत्वम्, तच्च अन्यथा गन्धत्वावच्छिन्नस्याऽऽकस्मिकत्वापत्तेरिति पदेन दर्शितम्, अतो गन्धस्य नियतत्वानुरोधेन तदवच्छेदकत्वेन च पृथिवीत्वजातिः सिद्धा भवति। तत्परिष्कृतलक्षणं च- समवायसम्बन्धावच्छिन्नगन्धनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणताश्रयत्वं पृथिव्या लक्षणम्।

**मुक्तावली– न च पाषाणादौ गन्धाभावाद् गन्धवत्त्वमव्याप्तमिति वाच्यम्, तत्राऽपि गन्धसत्त्वाद्। अनुपलब्धिस्त्वनुत्कटत्वेनाप्युपपद्यते, कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते ? भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वं सिद्ध्यति। यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत् तदुपादानोपादेयमिति व्याप्तेः। दृष्टं चैतत् खण्डपटे महापटध्वंसजन्ये। इत्थञ्च पाषाणपरमाणोः पृथिवीत्वात् तज्जन्यपाषाणस्यापि पृथिवीत्वम्। तथा च तस्यापि गन्धवत्त्वे बाधकाभावः।**

**व्याख्या**– गन्धवत्त्वं पृथिव्या लक्षणमित्युच्यमाने कश्चन पूर्वपक्षी पाषाणादौ गन्धाभावादव्याप्तिं शङ्कयति। तन्निराकरणाय मुक्तावलीकारः स्पष्टयति यत् पाषाणादौ गन्धस्यात्यन्ताभावो नास्ति, अपि तु तत्र गन्धस्यानुत्कटत्वम् (अस्फुटत्वम्) अस्ति। घ्राणेन्द्रियेण गन्धस्य प्रत्यक्षं तदैव भवति यदा गन्ध उद्भूतः (उत्कटः) स्यात्, किन्तु पाषाणे तस्यानुद्भूतत्वाद् नोपलभ्यते। पाषाणे गन्धोऽस्तीत्यत्र ग्रन्थकारेण बलवत् प्रमाणं प्रदर्शितं यत् पाषाणस्य भस्मनि स्पष्टतया गन्ध उपलभ्यते। भस्म तावत् पाषाणस्य ध्वंसजन्यं कार्यमस्ति। अत्र व्याप्तिरित्थं वर्तते– यद् द्रव्यं यद् द्रव्यध्वंसजन्यम्, तत् तदुपादानोपादेयम्। अस्य तात्पर्यं यद् यदि ख इति द्रव्यं क इति द्रव्यस्य नाशादुत्पन्नं भवति तर्हि ख इत्यस्य घटककारणानि (परमाणवः) तान्येव भवन्ति यानि क इत्यस्यासन्। यथा कस्यचिद् महापटस्य (वस्त्रस्य) नाशे सति तज्जन्यः खण्डपटः तैरेव तन्तुभिर्निर्मितो भवति। एवं पाषाणस्य नाशे सति यद् भस्म उत्पद्यते, तत् पाषाणस्योपादानकारणैः (परमाणुभिः) एव आरब्धं भवति। इत्थञ्च पाषाणस्यारम्भकाः परमाणवो यदि गन्धवन्तः सन्ति (पृथिवीत्वात्) तर्हि तैरारब्धः पाषाणोऽपि गन्धवानेव भवितुमर्हति, यतो हि कारणगुणाः कार्यगुणान् आरभन्त इति न्यायसिद्धान्तः। यदि पाषाणे गन्धो न स्यात् तर्हि तज्जन्ये भस्मनि गन्धस्योत्पत्तिरसम्भवा, न ह्यकारणको गुणः कार्ये प्रादुर्भवति। अतः पाषाणे गन्धसत्त्वे किमपि बाधकं नास्ति, केवलं तस्यानुत्कटत्वाद् घ्राणेन न गृह्यत इत्येव तात्पर्यम्। एवं पाषाणस्य पृथिवीत्वं गन्धवत्त्वञ्च सिद्धं भवति। एतेन लक्षणस्याव्याप्तिदोषो निराकृतो भवति।

**मुक्तावली– नानेति। शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्तते न तु जलादौ, तत्र शुक्लस्यैव सत्त्वात्। पृथिव्यां त्वेकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसम्भवात्। न च यत्र नानारूपं नोत्पन्नं तत्राव्याप्तिरिति वाच्यम्, रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य रूपनाशव**

**द्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा विवक्षितत्वाद्। वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य रूपान्तरस्य च सत्त्वाद् न्यायनये घटादावपि तत्सत्त्वाल्लक्षणसमन्वयः।**

**व्याख्या–** नानेति पदेन ग्रन्थकारः पृथिव्या रूपवैविध्यं दर्शयति। पृथिव्यामेव शुक्लनीलपीतादिनानाजातीयं रूपं वर्तते न तु जलादौ, यतो जलादौ केवलमभास्वरशुक्लरूपं भवति, तेजसि च भास्वरशुक्लम्। पृथिव्या अपरं वैशिष्ट्यं पाकवशेन नानारूपसम्भव इति। अर्थाद् विलक्षणतेजःसंयोगाद् (पाकात्) एकस्मिन्नेव पृथिवीपिण्डे क्रमेण हरितपीतादिरूपाणामुत्पत्तिः सम्भवति। अत्र कश्चन शङ्कते यद् यत्र पृथिव्यां पाकवशेन रूपान्तरं न जातमथवा यत्र चित्ररूपं नास्ति तत्र नानारूपवतीति लक्षणस्याव्याप्तिः स्यादिति। तन्निराकरणाय ग्रन्थकारो लक्षणं परिष्करोति– रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं पृथिव्या लक्षणम्। अस्य परिष्कारश्चेत्थम्– नीलपीतादिरूपद्वयवति द्रव्ये वर्तमाना या द्रव्यत्वव्याप्या जातिः (पृथिवीत्वम्) सा यत्र वर्तते सा पृथिवीति। एवं च यत्रैकमेव रूपं वर्तते तत्राप्युक्तपृथिवीत्वजातेः सत्त्वाद् नाव्याप्तिः।

अथवा लक्षणान्तरं निर्दिशति- रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमिति। अत्रायं भावः– यत्र पृथिव्यामेव पाकेन पुरातनस्य रूपस्य नाशो नवीनस्य चोत्पत्तिर्भवति तादृशो रूपनाशो यत्र वर्तते (पृथिवीपरमाणौ घटादौ वा) तत्र वर्तमाना या द्रव्यत्वव्याप्या पृथिवीत्वजातिः सा सर्वत्र पृथिव्यां वर्तते इति नाव्याप्तिः। अत्र वैशेषिकनये पृथिवीपरमाणौ पाकः स्वीक्रियते (पीलुपाकवादित्वात्) अतः परमाणुषु रूपनाशरूपान्तरयोः सत्त्वात् तत्र लक्षणसमन्वयः। नैयायिकमते तु अखण्डे पिण्डेऽपि पाकः स्वीक्रियते (पिठरपाकवादित्वात्) अतो घटादावपि रूपपरिवर्तनस्य प्रत्यक्षत्वात् तत्र लक्षणं सुघटं भवति।

**मुक्तावली– षड्विध इति। मधुरादिभेदेन यः षड्विधो रसः स पृथिव्यामेव। जले मधुर एव रसः। अत्रापि पूर्ववद्रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थोऽवसेयः। द्विविध इति वस्तुस्थितिमात्रम्, न तु द्विविधगन्धवत्त्वं लक्षणम्, द्विविधत्वस्य व्यर्थत्वाद्। द्वैविध्यं च सौरभासौरभभेदेन बोध्यम्।**

**व्याख्या–** षड्विध इति प्रतीकमुपादाय ग्रन्थकारः प्रतिपादयति यद् मधुरादिभेदेन यः षड्विधो रसः प्रसिद्धः सः केवलं पृथिव्यामेव समवायसम्बन्धेन तिष्ठति न जलादौ। यतो हि जले केवलं मधुर एव रसस्तिष्ठति। अत्रापि रूपवदेवाव्याप्तिशङ्कामुत्थाप्य परिष्कारः कार्यः। यदि कश्चिद् वदेद् यद् यत्र पृथिवीपिण्डे (यथा निम्बादौ) केवलं तिक्तरस एवोपलभ्यते तत्र षड्विधरसवत्त्वलक्षणं न घटेत तर्हि पूर्ववद् अर्थाद्रूपनिरूपणवदेवात्रापि रसद्वय वद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमिति लक्षणं विवक्षणीयम्। अस्य परिष्कृतोऽर्थश्चेत्थम्– मधुराम्लादिरसद्वयाधिकरणे

पृथिवीद्रव्ये वर्तमाना या पृथिवीत्वजातिः सा जातिर्यत्रास्ति सा पृथिवी। एवं सति एकरसयुक्तायामपि पृथिव्यां पृथिवीत्वजातेः सत्त्वाल्लक्षणसमन्वयः सुकरो भवति। तदनन्तरं गन्धस्य द्वैविध्यं विवृण्वन् ग्रन्थकार आह– द्विविध इति वस्तुस्थितिमात्रम्। लक्षणे द्विविध इति पदं न निवेशनीयम्, यतो हि केवलं गन्धवत्त्वम् इत्युक्ते एव पृथिव्या लक्षणं सिद्धं भवति। लक्षणघटकपदानां व्यावृत्तिफलकत्वे एव सार्थकत्वम्, अत्र द्विविधत्वनिवेशेन न किमप्यतिव्याप्तिवारणं भवति, अतः तस्य निवेशो व्यर्थः। "द्विविध" इति कथनं तु केवलं लोकप्रसिद्धगन्धप्रकाराणां प्रदर्शनार्थं वस्तुस्थितिमात्रं वर्तते। स च गन्धः सौरभ-असौरभ (सुगन्ध-दुर्गन्ध) भेदेन द्विधा वर्तते। इत्थञ्च पृथिव्या रूपरसगन्धेषु नानात्वं पाकजत्वं च सिद्धं भवति। तथा च पृथिव्या जलतेजसादिभ्यो व्यावृत्तं निर्दुष्टं लक्षणं सिद्ध्यति।

**कारिका– स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः।**

**अन्वयः-** तस्याः स्पर्शस्तु अनुष्णाशीतपाकजः हि विज्ञेयः।

**कारिकार्थः-** तस्याः = पृथिव्याः, स्पर्शस्तु = स्पर्शनामको गुणस्तु, अनुष्णाशीतपाकजः = न उष्णो न शीतः (मध्यमः) तथा पाकजः (विलक्षणाग्निसंयोगजन्यः) हि = निश्चयेन विज्ञेयः।

**मुक्तावली– स्पर्श इति। तस्याः- पृथिव्याः। अनुष्णाशीतस्पर्शवत्त्वं वायावपि वर्तत इत्युक्तं पाकज इति। इत्थं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थं तदुक्तम्, पाकजस्पर्शवत्त्वमात्रं तु लक्षणम्, अधिकस्य वैयर्थ्याद्। यद्यपि पाकजस्पर्शः पटादौ नास्ति तथाऽपि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः।**

**व्याख्या–** अत्र मुक्तावलीकारः पृथिव्याः स्पर्शगतं वैशिष्ट्यमुपपादयति- पृथिव्याः स्पर्शोऽनुष्णाशीतो भवति, अर्थात् स न उष्णो नापि शीतलः। अत्रेयं शङ्का यद् अनुष्णाशीतस्पर्शवत्त्वं तु वायावपि वर्ततेऽतः पृथिव्या लक्षणं वायावतिव्याप्तं स्यादिति। तन्निराकरणाय मुक्तावल्यां पाकज इति पदं प्रयुक्तम्। अस्याशयोऽयम्– पृथिव्याः स्पर्शो विलक्षणतेजःसंयोगजन्यो भवति, वायोः स्पर्शस्त्वपाकजो भवति। अतः पाकजस्पर्शवत्त्वमिति लक्षणकरणेन वायोः व्यावृत्तिर्भवति। अत्रानुष्णाशीत इति पदं तु केवलं पृथिवीस्पर्शस्य वस्तुस्थितिं ज्ञापयितुं प्रदत्तम्, लक्षणे तु तस्य निवेशो नावश्यकः, यतः पाकजस्पर्शवत्त्वमित्यनेनैवातिव्याप्तिवारणे जातेऽनुष्णाशीत इति पदं व्यर्थं स्यादधिकस्य वैयर्थ्यात्।

पुनश्चात्राव्याप्तिशङ्का भवति यद्यत्र पृथिवीद्रव्ये (यथा नूतनोत्पन्ने पटादौ) अद्यापि पाकजस्पर्शो न उत्पन्नस्तत्र पाकजस्पर्शवत्त्वमिति लक्षणं कथं घटेत ? इति। तन्निराकरणाय पूर्ववदेव जातिघटितं परिष्कृतलक्षणं विवक्षणीयम्- पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमिति। अस्यायमर्थः- पाकजस्पर्शो यस्मिन् पृथिवीद्रव्ये (यथा घटे) वर्तते तत्र वर्तमाना या पृथिवीत्वजातिः सा जातिर्यत्र कुत्रचित् पटे पाषाणे वाऽस्ति सा पृथिवीति। एवं सति यत्र साक्षात्

पाकजस्पर्शो नास्ति तत्रापि पृथिवीत्वजातेः सत्त्वाल्लक्षणसमन्वयः सुकरः। तथा च पृथिव्याः स्पर्शोऽनुष्णाशीतत्वे सति पाकज इति सिद्धम्। अत्र पाकजेति विशेषणेन जलतेजोवायूनां व्यावृत्तिः, यतो हि जलस्य स्पर्शः शीतलः, तेजस उष्णः, वायोश्चानुष्णाशीतत्वेऽपि अपाकज इति विवेकः। एतावता मुक्तावलीकारेण पृथिव्याः स्पर्शं परिष्कारपुरःसरमन्यद्रव्येभ्यो विभज्यात्र दर्शितम्।

**कारिका–** **नित्याऽनित्या च सा द्वेधा नित्या स्यादणुलक्षणा ॥ ३६ ॥**

**अनित्या तु तदन्या स्यात् सैवाऽवयवयोगिनी।**

**अन्वयः**– सा नित्या अनित्या च द्वेधा, अणुलक्षणा नित्या स्यात्। तदन्या तु अनित्या स्यात्, सा एव अवयवयोगिनी।

**कारिकार्थः-** सा = पृथिवी, नित्या = परमाणुरूपा, अनित्या = कार्यरूपा, तद्भेदेन च द्वेधा = द्विप्रकारिका भवति। अनित्या तु = कार्यरूपा पृथिवी तु, तदन्या = परमाण्वतिरिक्ता। सा एव = अनित्या पृथिवी (द्व्यणुकादिब्रह्माण्डपर्यन्ता) एव, अवयवयोगिनी = अवयवसमवेता भवति।

पृथिवीभेदं प्रदर्शयति-

**मुक्तावली– नित्येति। सा पृथिवी द्विविधा- नित्यानित्या चेत्यर्थः। अणुलक्षणा- परमाणुरूपा पृथिवी नित्या। तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिरूपा सर्वाप्यनित्येत्यर्थः। सैव अनित्या पृथिव्येवावयववतीत्यर्थः ॥**

**व्याख्या–** अत्र मुक्तावलीकारः पृथिव्या द्वैविध्यं निरूपयन् तस्याः स्वरूपं प्रस्तौति। तथा च "नित्याऽनित्या च सा द्वेधा" इति कारिकांशेन पृथिव्या: प्रकार: सूचित:। तत्र नित्या स्यादणुलक्षणेत्यनेन परमाणुस्वरूपा पृथिवी नित्येति प्रतिपादितम्। नित्यत्वं नाम ध्वंसाप्रतियोगित्वे सति प्रागभावाप्रतियोगित्वम्। यस्य विनाश उत्पत्तिश्च न भवतः सा नित्या। सा च 'अणुलक्षणा' अर्थात् परमाणुरूपा। यः पृथिव्या अन्त्योऽवयवः, यस्य पुनर्विभागो न सम्भवति सः परमाणुः। अयं परमाणुर्नित्यो वर्तते। ह्यवयवाभावात् तस्य नाशो न सम्भवति (नाशस्य असमवायिकारणविनाशजन्यत्वात्)। तदनन्तरं "अनित्या तु तदन्या स्यात्" इति पदेन परमाणुभिन्ना या पृथिवी सा अनित्येति विवक्षितम्। अनित्यत्वं नाम 'विनाशप्रतियोगित्वम्'। परमाणुत आरभ्य द्व्यणुक-त्र्यणुक-घट-पटादिस्थूलपर्यन्तं या पृथिवी सा अनित्या। अस्या लक्षणं मुक्तावलीकारः "सैवाऽवयवयोगिनी" इति वदति। तथा च समवायसम्बन्धेनावयववत्त्वं कार्यपृथिव्याः लक्षणम्। यत् कार्यं द्रव्यं भवति तन्नियमेन स्वावयवैरारभ्यते। अतो या पृथिव्यवयववती सा अनित्या। अत्र परमाणौ अवयवयोगो नास्ति अतः स नित्यः। द्व्यणुकादौ त्ववयवाः सन्ति अतस्तेऽनित्याः। एवं च "सा द्वेधा" इत्यनेन परमाणुतदवयविभेदेन पृथिव्या विभागः कृतः।

## पदानामर्थपरिचयः

| | | |
|---|---|---|
| **गन्धसमवायिकारणत्वम्** | = | गन्धं प्रति समवायसम्बन्धेन कारणत्वम् |
| **अनुत्कटत्वम्** | = | विद्यमानस्यापि धर्मस्य अस्फुटत्वम् |
| **उपादानकारणम्** | = | समवायिकारणम् |
| **अवयवयोगित्वम्** | = | अवयववत्त्वम् |
| **चित्ररूपम्** | = | अवयविद्रव्ये (यथा चित्रे पटे) अवयवरूपाणां बाहुल्याज्जातं विलक्षणं रूपम् |
| **अणुलक्षणा** | = | परमाणुस्वरूपा |
| **आकस्मिकत्वम्** | = | नियतकारणरहितत्वम् |
| **उद्भूतत्वम्** | = | प्रत्यक्षयोग्यत्वम् |
| **ध्वंसप्रतियोगित्वम्** | = | विनाशशीलत्वम् |
| **पीलुपाकः** | = | परमाणुषु एव विलक्षणतेजसंयोगः |
| **पिठरपाकः** | = | अवयविद्रव्ये (अखण्डे पिण्डे) विलक्षणतेजसंयोगः |

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) पृथिव्या लक्षणं किम् ?

(ख) पाषाणे गन्धोपलब्धिः किमर्थं न भवति ?

(ग) पृथिव्यां रसः कतिविधः प्रोक्तः ?

(घ) अणुलक्षणा पृथिवी नित्या अस्ति वा अनित्या ?

### २. व्याख्यात्मकमुत्तरं लिखत

(क) "गन्धहेतुः" इत्यनेन पृथिवीत्वजातिः कथं सिद्ध्यति ? आकस्मिकत्वापत्तिं वारयन् कार्यकारणभावदृष्ट्या मुक्तावल्युक्तं विचारं विवृणुत।

(ख ) पाकप्रक्रियां विवेचयत।

(ग) पाषाणे गन्धसत्त्वे प्रमाणं दर्शयत।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) पृथिव्याः स्वरूपं निर्दिशत।

(ख) पाषाणे गन्धस्याव्याप्तिः कथं वार्यते ? भस्मनो दृष्टान्तेन "यद् द्रव्यं यद् द्रव्यध्वंसजन्यम्, तत् तदुपादानोपादेयम्" इति व्याप्तिं स्पष्टयत।

(ग) वैशेषिकनये 'पीलुपाकवादः' तथा नैयायिकनये 'पिठरपाकवादः' इत्यनयोर्मध्ये को भेदः ? स्पष्टयत।

(घ) पृथिव्याः स्पर्शः कीदृशो भवतीति विलिख्य तत्र पाकजविशेषणस्य महत्त्वं दर्शयत।

## ४. सन्धिविच्छेदं कुरुत

क्षितिर्गन्धहेतुः, चेत्थम् , द्विविधस्तु ।

## ५. अधोलिखितपदानां वाक्ये प्रयोगं कुरुत

समवायः, हेतुः, पाकः, रसः, रूपम् ।

## *परियोजनाकार्यम्-*

पृथिव्यां विद्यमानानां गुणानामुल्लेखपूर्वकं तेषामेकां सूचीं सज्जीकुरुत ।

# अवयविनिरूपणम्

बौद्धोक्तपरमाणुपुंजवादं निरस्य अवयविवादं समर्थयति मुक्तावलीकारः-

**मुक्तावली– नन्ववयविनि किं मानम् ? परमाणुपुञ्जैरेवोपपत्तेः। न च परमाणूनामतीन्द्रियत्वाद्घटादीनां प्रत्यक्षं न स्यादिति वाच्यम्, एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वाद्। यथैकस्य केशस्य दूरेऽप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वम्। न चैको घटः स्थूल इति बुद्धेरनुपपत्तिरिति वाच्यम्। एको महान् धान्यराशिरितिवदुपपत्तेः। मैवम्, परमाणोरतीन्द्रियत्वेन तत्समूहस्याऽपि प्रत्यक्षाऽयोगाद्। दूरस्थकेशस्तु नाऽतीन्द्रियः, सन्निधाने तस्यैव प्रत्यक्षत्वाद्। न च तदानीमदृश्यपरमाणुपुञ्जाद् दृश्यपरमाणुपुञ्जस्योत्पन्नत्वान्न प्रत्यक्षत्वे विरोध इति वाच्यम्, अदृश्यस्य दृश्यानुपादानत्वाद्, अन्यथा चक्षुरुष्मादिसन्ततेरपि कदाचिद् दृश्यत्वप्रसङ्गात्।**

**व्याख्या–** अत्र मुक्तावलीकारोऽवयविसिद्धये पूर्वपक्षिणः (वैनाशिकस्य) शङ्कामुत्थापयति यद् नन्ववयविनि किं मानम्? परमाणुपुञ्जैरेवोपपत्तेरिति। अस्याभिप्राय इत्थं वर्तते– यदि परमाणुपुञ्जेनैव घटोऽयमिति व्यवहारः सम्भवति तर्ह्यवयवी नाम कश्चनातिरिक्तः पदार्थः किमर्थं स्वीकरणीयः ? पूर्वपक्षी कथयति यत् परमाणूनामतीन्द्रियत्वेऽपि तत्समूहस्य प्रत्यक्षत्वं न विरुध्यते। अत्र सः केशपुञ्ज इति दृष्टान्तं निदर्शयति- यथा दूरे स्थित एकः केशो न दृश्यते परन्तु तत्समूहः (पुञ्जः) दूरादपि दृश्यते, तथैवैकैकः परमाणुरतीन्द्रियश्चेदपि तत्समूहः प्रत्यक्षगोचरो भवितुमर्हति। पुनश्च एको घटः स्थूल इति प्रतीतेरुपपादनाय स धान्यराशिदृष्टान्तं प्रस्तौति। यथा धान्यराशावनेकानि धान्यानि सन्ति तथापि एको महान् धान्यराशितिरिति व्यवहारः क्रियते।

विशेषः- अत्रावयविनिराकरणप्रसङ्गे पूर्वपक्षिणः (मुख्यतया वैभाषिकसौत्रान्तिकयोः) मतं मुक्तावलीकारेणोपस्थापितम्। बौद्धमते (पूर्वपक्षिणो मते) जगति किमप्यवयविनामकमतिरिक्तं वस्तु नास्ति। तेषां मते केवलं परमाणव एव सन्ति। यदा वयम् 'एको घटः स्थूलः' इति व्यवहारं कुर्मस्तदा वस्तुतस्तत्र बहवः परमाणवो वर्तन्ते न तु एकोऽवयवी। अत्रैकत्वं तथा महत्त्वं (स्थौल्यं) च भ्रान्तिप्रयुक्तं मन्यते। तत्र एकत्वं कथं भ्रान्तिप्रयुक्तमिति चेद् यथा दूराद् बहून् वृक्षान् दृष्ट्वा रितीति बुद्धिर्जायते तथा। वस्तुतस्तु वनं नाम वृक्षेभ्योऽतिरिक्तं किमपि नास्ति केवलं वृक्षाणामेव समूहः, तथैव परमाणूनां समूहे 'एको घटः' इति बुद्धिः 'अतस्मिंस्तद्बुद्धिः' भ्रान्तिरेव। अत्र समूहमात्रे एकत्वमारोपो भवति।

द्वितीयो विषयोऽस्ति महत्त्वस्य (स्थौल्यस्य) भ्रमः। पूर्वपक्षी वदति यद्यथा एको महान् धान्यराशिरिति व्यवहारे

धान्यकणानां बाहुल्यमेव महत्त्वरूपेण भासते। वस्तुतस्तु धान्यराशौ महत्त्वं नाम किमपि अतिरिक्तं परिमाणं नास्ति, केवलं परमाणूनां निरन्तरं सान्निध्यमेवास्ति। एतादृशं सान्निध्यमेवास्माकं चक्षुरिन्द्रियस्य मन्दत्वात् स्थौल्यरूपेण भासते। अतः पूर्वपक्षे परमाणुपुञ्ज एव सत्यः, अवयवी तु काल्पनिकः। एकत्वप्रतीतिः सङ्ख्याभ्रमः, स्थूल इति प्रतीतिश्च परिमाणभ्रमः। एषा भ्रान्तिः सांवृतिकसत्यमिति बौद्धैरुच्यते। नैयायिकैस्त्वस्य खण्डनं करिष्यते यद्यवयवी न स्यात् तर्हि अतीन्द्रियपरमाणूनां समूहानां प्रत्यक्षत्वं कदापि न सम्भवेदिति रीत्या।

"मैवम्" इति प्रतिज्ञावाक्येन ग्रन्थकारः पूर्वोक्तं परमाणुपुञ्जवादं निराकरोति। तत्र हेतुरयम्– परमाणोः स्वरूपतोऽतीन्द्रियत्वात् तत्समूहस्यापि प्रत्यक्षत्वं नोपपद्यते। अत्र व्याप्तिरस्ति– यद् यद् अतीन्द्रियसमुदायस्तत् तदतीन्द्रियमिति। पूर्वपक्षिणा यः केशपुञ्जस्य दृष्टान्तः प्रदर्शितः सोऽत्र विषमो वर्तते, यतो हि दूरे स्थित एकः केशः चक्षुषा न गृह्यते चेदपि स वस्तुतोऽतीन्द्रियो नास्ति। स तु योग्यः (प्रत्यक्षार्हः) पदार्थोस्ति, केवलं दूरत्वदोषेण तस्य प्रत्यक्षं न जायते। परमाणवस्तु सर्वथातीन्द्रियाः सन्ति अतस्तेषां समुदायस्य प्रत्यक्षत्वं कदापि न सम्भवति।

पुनश्चात्र पूर्वपक्षी नवीनं तर्कमुपस्थापयति यद्– मास्त्वतीन्द्रियपरमाणूनां प्रत्यक्षत्वम्, किन्तु यदा ते परमाणवः पुञ्जीभूय कार्यद्रव्यं जनयन्ति तदा तस्मिन् क्षणे स पुञ्जो दृश्यो भवतीति न विरोधः। अस्य निराकरणाय मुक्तावलीकारोऽदृश्यस्य दृश्यानुपादानत्वादिति नियमं प्रस्तौति। अस्यायमर्थः- यद् वस्तु स्वरूपतोऽदृश्यमस्ति तद् दृश्यमानस्य वस्तुन उपादानकारणं (घटकम्) भवितुं नार्हति। यदतीन्द्रियपदार्थानां समूहे प्रत्यक्षत्वं स्वीक्रियते तर्हि चक्षुरुष्मादि (चक्षुरिन्द्रियस्य तेजः) अपि समूहभावे सति कदाचित् प्रत्यक्षगोचरं भवेत् परन्तु चक्षुषस्तेजः कदापि प्रत्यक्षं न भवति। अतः सिद्ध्यति यत् परमाणूनां समूहमात्रेण स्थूलो घट इति प्रत्यक्षप्रतीतिर्न सम्भवति। यत् प्रत्यक्षं जायते तत् परमाणूनां समूहो नास्ति अपि तु परमाण्वारब्धः कश्चनातिरिक्तोऽवयव्यस्ति। स च अवयवी महत्त्वादिगुणयोगात् प्रत्यक्षस्य विषयो भवति। एतावताऽवयविनं विना स्थूलप्रतीतिर्नोपपद्यत इति नैयायिकानां सिद्धान्तः।

**मुक्तावली– न चाऽतितप्ततैलादौ कथमदृश्यदहनसन्ततेर्दृश्यदहनोत्पत्तिरिति वाच्यम्। तत्र तदन्तःपातिभिर्दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरुपगमात्। न चाऽदृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यम्? यतो न दृश्यत्वमदृश्यत्वं वा कस्यचित् स्वभावादाचक्ष्महे, किन्तु महत्त्वोद्भूतरूपादिकारणसमुदायवतो दृश्यत्वं तदभावे चाऽदृश्यत्वम्। तथा च त्रसरणोर्महत्त्वात् प्रत्यक्षत्वन्न तु द्व्यणुकादेस्तदभावात्। न हि त्वन्मतेऽपि सम्भवतीदम्, परमाणौ महत्त्वाभावात्।**

**व्याख्या-** अत्र मुक्तावलीकारोऽवयविसिद्धये अदृश्यस्य दृश्यानुपादानत्वादिति नियमस्योपरि सम्भावितां शङ्कां परिहरति। अत्र कश्चन शङ्कते– यद्यदृश्यं वस्तु दृश्यस्य कारणं न भवति तर्हि अतितप्ततैलादौ दृश्यमानस्याग्नेः (दहनस्य) उत्पत्तिः कथं भवेत् ? तत्र तैलस्य अन्तःस्थितोऽग्निस्तु पूर्वमदृश्य आसीत् परन्तु तैलस्यातितप्तत्वात् स दृश्यो जायते। अस्य समाधानं मुक्तावलीकारः प्रस्तौति यत् तत्रादृश्येन तेजसा दृश्यस्योत्पत्तिर्न भवति, अपि

तु तैलस्यान्तो यानि दृश्यदहनावयवाः (अग्नेः स्थूला अवयवाः) सन्ति तैरेव स्थूलदहनस्य उत्पत्तिर्जायत इति स्वीक्रियते। अतः पूर्वोक्तनियमस्य व्यभिचारो नास्ति।

पुनरपि नैयायिकमते एव विरोधं प्रदर्शयन् पूर्वपक्षी पृच्छति- अदृश्यं दृश्यस्य कारणं न भवति तर्हि युष्मन्मतेऽदृश्येन द्व्यणुकेन दृश्यमानस्य त्रसरेणोः (जालान्तर्गते सूर्यातपे दृश्यमानस्य सूक्ष्मकणस्य) उत्पत्तिः कथं भवति ? अत्र मुक्तावलीकारः समाधत्ते– कस्यचिद् वस्तुनः स्वभावतो दृश्यत्वं वा अदृश्यत्वं वा न स्वीकुर्मः प्रत्यक्षत्वं तु महत्त्व-उद्भूतरूपादिकारणसमुदायवत्त्वाज्जायते अर्थाद् यत्र द्रव्ये महत्त्वपरिमाणं भवति तथा च उद्भूतं (प्रकटं) रूपं भवति, तस्यैव प्रत्यक्षत्वं सम्भवति।

त्रसरेणुस्त्रिभिर्द्व्यणुकैर्जायते अतस्तत्र महत्त्वं वर्तते तस्मात् स दृश्यः। द्व्यणुकं तु द्वाभ्यां परमाणुभ्यां जायते, तत्र महत्त्वस्याभावात् (अणुत्वात्) तदतीन्द्रियं वर्तते। अत्र नैयायिको बौद्धं प्रति वदति यत्- न हि त्वन्मतेऽपि सम्भवतीदमिति। अयमाशयः– यदि भवान् अवयविनं न स्वीकरोति केवलं परमाणुपुञ्जमेव मन्यते तर्हि परमाणुपुञ्जे महत्त्वं कुत आयास्यति ? परमाणौ तु महत्त्वं नास्ति। यदि परमाणुषु महत्त्वं नास्ति तर्हि तत्पुञ्जेऽपि महत्त्वं न स्यात्, अतः परमाणुपुञ्जस्य प्रत्यक्षत्वं युष्मन्मते सर्वथाऽसम्भवम्। अस्माकं मते तु अवयविनः (त्रसरेणोः) महत्त्वे सङ्ख्या कारणं भवति, तथा च महत्त्वोद्भूतरूपायोस्तत्र सत्वेन तस्य प्रत्यक्षत्वं सम्भवति। एतावता महत्त्वोद्भूतरूपादीनां प्रत्यक्षकारणत्वं प्रदर्श्यावयविवादः प्रतिष्ठापितः।

**मुक्तावली– इत्थं चावयविसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षसिद्धत्वादनित्यत्वम्। तेषां चावयवावयवधाराया अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः। अतः क्वचिद्विश्रामो वाच्यः। यत्र तु विश्रामः तस्यानित्यत्वेऽसमवेतभावकार्योत्पत्तिप्रसङ्गात् तस्य नित्यत्वम्। महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्याऽपि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः। न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यम् ? त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वाद् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरववयवाः सावयवा महदारम्भकत्वात्कपालवदित्यनुमानेन तदवयवसिद्धेः। न चेदमप्रयोजकम्, अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यवत्त्वस्य प्रयोजकत्वात्। न चैवंक्रमेण तदवयवधाराऽपि सिद्ध्येदिति वाच्यम् ? अनवस्थाभयेन तदसिद्धेरिति ॥**

**व्याख्या–** अत्र मुक्तावलीकारोऽवयविसिद्धिपुरःसरं परमाणुपदार्थं युक्त्या प्रतिष्ठापयति। इत्थं चावयविनः प्रत्यक्षबलेन सिद्धा भवन्ति। तेषां चोत्पत्तिविनाशयोः प्रत्यक्षत्वम्, अतस्तेषामनित्यत्वं सुनिश्चितम्। इदानीं परमाणुसिद्धिं प्रति युक्तिं प्रदर्शयति- यदि वयमवयवावयवधारायाः क्वचिदपि विरामं न स्वीकुर्मः (अर्थाद् अनन्तविभाजनं न मन्यामहे) तर्हि मेरुसर्षपयोरपि परिमाणसाम्यं प्रसज्येत, यतो ह्यनन्तविभाजनपक्षे ह्युभयत्राप्यवयवानां सङ्ख्या समाना (अनन्ता) एव स्यात्। अतोऽस्य विभाजनस्य क्वचिदेकस्मिन् बिन्दौ

विश्रामोऽवश्यं वाच्यः। यत्र एष विश्रामो भवति तस्य नित्यत्वमप्यङ्गीकर्तव्यम्। यदि सोऽन्त्यविश्रामस्थलम् (परमाणुः) अपि अनित्यः स्यात् तर्हि असमवेतकार्योत्पत्तिः स्याद्, अर्थादाधाररहितस्य कार्यस्योत्पत्तिः प्रसज्येत यच्च न्यायसिद्धान्तविरुद्धम्।

अपरञ्च यथा महत्परिमाणस्य तारतम्यं (लघु-महद्-महत्तर-महत्तम इत्यादि) गगनादौ गत्वा विश्राम्यति तथैव अणुपरिमाणस्य (सूक्ष्मतायाः) तारतम्यमपि क्वचिदन्त्यबिन्दौ विश्राम्यति। स एव अन्त्यविश्रामः 'परमाणुः' इति कथ्यते। अत्र कश्चन शङ्कते यद् जालान्तर्गते सूर्यातपे दृश्यमानस्त्रसरेणुरेवान्त्योऽवयवोऽस्तु इति। तन्निराकरणाय ग्रन्थकारोऽनुमानं प्रस्तौति– "त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वाद् घटवत्" इति। अर्थाद् यच्चक्षुषा दृश्यते तत् सावयवं (अवयवयुक्तं) भवति। एवं त्रसरेणोरवयवत्वेन द्व्यणुकं सिद्ध्यति। पुनः द्व्यणुकस्यापि सावयवत्वं साधयितुमनुमानाकारो दर्शितः– द्व्यणुकस्यावयवा अपि सावयवा महदारम्भकत्वात् कपालवद्। अर्थाद् यन्महतः (त्रसरेणोः) आरम्भं करोति तत् सावयवं भवति।

त्रसरेणोस्सावयवत्वसाधकानुमानेऽप्रयोजकाशंकायामप्रयोजकशंकां निवारयति ग्रन्थकारः- अपकृष्टमहत्त्वं प्रतीति। अपकृष्टमहत्त्वं प्रति अनेकद्रव्यत्वस्य प्रयोजकत्वेन अर्थात् यत्र यत्र चाक्षुषद्रव्यत्वं तत्र तत्र अपकृष्टमहत्वमिति व्याप्तेः सत्त्वेन चाक्षुषद्रव्यत्वस्य व्यापकत्वादपकृष्टमहत्त्वस्य, त्रसरेणोः सावयवत्वानुमानस्याप्रयोजकत्वं नास्तीत्यर्थः। एवं तर्हि परमाणूनामपि सावयवत्वमेव स्यादिति चेद् तत्रोक्तमनवस्थाभयेनेति। यदि कश्चन वदेद्- एवं क्रमेण तदवयवानामप्यवयवाः तेषामपि अन्या इति धारा चलेत् तर्हि 'अनवस्था' दोषः प्रसज्येत, अतो धीमान् पुरुषोऽनवस्थाभयेन परमाणावेव विश्राम्यति। स च परमाणुर्निरवयवो नित्यः, अतीन्द्रियश्चेति सिद्धम्।

**कारिका –** **सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥ ३७ ॥**

**अन्वयः-** सा च त्रिधा भवेत्, देहम् , इन्द्रियम् तथा विषयः।

**कारिकार्थः-** सा च = अनित्या पृथिवी च, शरीरम् = भोगायतनम्, इन्द्रियम् = भोगसाधनम्, विषयस्तथा = भोग्यवस्तुरूपेण त्रिधा = त्रिविधा भवेत्।

**कारिका –** **योनिजादिर्भवेद्देह इन्द्रियं घ्राणलक्षणम्।**
**विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः ॥ ३८ ॥**

**अन्वयः-** देहः योनिजादिः भवेत्, इन्द्रियं घ्राणलक्षणम्, विषयः च ब्रह्माण्डान्तः द्व्यणुकादिः उदाहृतः।

**कारिकार्थः-** देहः = शरीरम्, योनिजादि = शुक्रशोणितजन्यम् (मानुषादि) अयोनिजम् (स्वेदादि) च भवेत्। इन्द्रियम् = घ्राणेन्द्रियम्, = नासाग्रवर्ति गन्धग्राहकम्। विषयः च = पार्थिवभोग्यवस्तु तु ब्रह्माण्डान्तो द्व्यणुकादि = द्व्यणुकमारभ्य, ब्रह्माण्डान्तः = ब्रह्माण्डपर्यन्त उदाहृतः = कथितः।

पृथिवीभेदं प्रदर्शयति–

**मुक्तावली– सा चेति। सा कार्यरूपापृथिवी त्रिविधा- शरीरेन्द्रियविषयभेदादित्यर्थः। तत्र देहमुदाहरति- योनिजादिरिति। योनिजमयोनिजं चेत्यर्थः। योनिजमपि द्विविधं जरायुजमण्डजं चेति। जरायुजं मानुषादीनाम्। अण्डजं सर्पादीनाम्। अयोनिजं स्वेदजोद्भिज्जादिकम्। स्वेदजाः- कृमिदंशाद्याः, उद्भिज्जाः तरुगुल्माद्याः। नारकिणां शरीरमप्ययोनिजम्।**

**व्याख्या–** सा चेति पदेन कार्यरूपाया (अनित्यायाः) पृथिव्याः परामर्शो भवति। सा त्रिविधा शरीर-इन्द्रिय-विषयभेदात्। अत्र मुक्तावलीकारः शरीरस्य विभागं दर्शयति- "योनिजादिरिति"। योनिजमयोनिजञ्चेत्यर्थः। तत्र योनिजं शरीरं द्विविधम्- जरायुजमण्डजञ्च। जरायुजं शरीरं मनुष्याणां पशूनां च भवति यद् गर्भाशयादुत्पद्यते। अण्डजं तु सर्पपक्षिप्रभृतीनां शरीरम्, यच्चाण्डाज्जायते।

तदनन्तरं मुक्तावलीकारः अयोनिजशरीरं विवेचयति। अयोनिजं नाम तच्छरीरं यच्छुक्रशोणितसम्बन्धं विना केवलं धर्माधर्मप्रभावात् पार्थिवपरमाणुभिर्निर्मितं भवति। अस्यान्ते ग्रन्थकृता स्वेदजोद्भिज्जानां संग्रहः कृतः। स्वेदजा नाम स्वेदाद् उत्पद्यमानाः कृमिदंशयूकाद्याः। उद्भिज्जा नाम भूमिं भित्त्वा जायमानास्तरुगुल्मवृक्षादयः। अत्रायं विशेषो यद् वृक्षा अपि सचेतनाश्शरीरिणश्च भवन्ति परं तेषां शरीरं योनिजकोटौ न समायाति।

एकं विशेषं तथ्यं मुक्तावलीकारो वक्ति– "नारकिणां शरीरमप्ययोनिजम्" इति। नरकेषु यानि शरीराणि दुःखभोगाय प्राप्यन्ते तानि शुक्रशोणितजन्यानि न भवन्ति, अपि तु केवलं पापकर्मणा (अधर्मेण) अयोनिजरूपेणोत्पद्यन्ते। एतावता पार्थिवशरीरस्य विपुलो विभागो मुक्तावल्यां प्रस्थापितः। अत्र 'योनिजादि' इत्यत्रादिपदेन अयोनिजस्वेदजोद्भिज्जानां ग्रहणं भवति।

**मुक्तावली– न च मानुषादिशरीराणां पार्थिवत्वे किं मानमिति वाच्यम्? गन्धादिमत्त्वस्यैव प्रमाणत्वात्। न च क्लेदोष्मादेरुपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यम्, तथा सति जलत्वपृथिवीत्वादिना सङ्करप्रसङ्गाद्। न च तर्हि जलीयत्वादिकमेवाऽस्तु न तु पार्थिवत्वमिति वाच्यम्, क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानाद्, गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः। तेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यम्। शरीरत्वं न जातिः, पृथिवीत्वादिना साङ्कर्यात् किन्तु चेष्टाश्रयत्वम्। वृक्षादीनामपि चेष्टाश्रयत्वान्नाव्याप्तिः। न च वृक्षादेः शरीरत्वे किं मानमिति वाच्यम्? आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात्। तत्रैव किं मानमिति चेत्? भग्नक्षतसंरोहणादिना तदुन्नयनाद्। यदि हस्तादौ शरीरव्यवहारो न भवति, तदाऽन्त्यावयवित्वेन विशेषणीयम्। न च यत्र शरीरे चेष्टा न जाता तत्राऽव्याप्तिरिति वाच्यम्। तादृशे प्रमाणाभावात्। अथ वा चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वम्, अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्**

**तिजातिमत्त्वं वा तत्, मानुषत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः। न च नृसिंहशरीरे कथं लक्षणसमन्वयः? तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावाद्, जलीयतैजसा शरीरवृत्तितया देवत्वस्यापि जातित्वाभावादिति वाच्यम्। कलपभैदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात्।**

**व्याख्या–** प्रकृतप्रसङ्गे मुक्तावलीकारः पार्थिवशरीरस्य सिद्धिम्, तत्र साङ्कर्यभियाऽन्यभूतानां गौणत्वम्, वृक्षाणां सचेतनत्वम्, तथा शरीरस्य लक्षणञ्च परिष्कृत्य प्रस्तौति। अत्र शङ्का भवति यद् मानुषादिशरीराणां पार्थिवत्वे किं प्रमाणम् ? तत्रोत्तरम्– "गन्धादिमत्त्वस्यैव प्रमाणत्वात्" अर्थात् शरीरे गन्धस्योपलम्भात् तस्य पार्थिवत्वं सिद्ध्यति। न च शरीरे क्लेद (जल) ऊष्म (तेज) इत्यादीनां सत्त्वात् तज्जलीयं तैजसं वा किमर्थं न स्यादिति वाच्यम् ? यदि शरीरं पञ्चभूतात्मकं स्वीक्रियते तर्हि जलत्वपृथिवीत्वादिजातीनामेकस्मिन्नधिकरणे समावेशात् 'सङ्कर' दोषः प्रसज्येत। अतश्शरीरं तु पार्थिवमेव, जलादीनि तु तत्रोपष्टम्भकाः (निमित्तकारणानि) मात्रं सन्ति। क्लेदादीनां विनाशे सत्यपि 'इदं तदेव शरीरम्' इति प्रत्यभिज्ञा जायते अतो गन्धवत्त्वात् शरीरस्य पार्थिवत्वं सुनिश्चितम्।

अत्र शरीरस्य लक्षणविमर्शः क्रियते– शरीरत्वं न जातिः पृथिवीत्वादिना साङ्कर्यादिति। शरीरत्वं जातिर्नास्ति अपि तु 'चेष्टाश्रयत्वम्' तत्। चेष्टा नाम 'हितप्राप्ति-अहितपरिहारानुकूला कृतिः'। न च वृक्षाणामचलत्वात् तत्राव्याप्तिः ? तेष्वपि आन्तरिकी चेष्टा वर्तत एव। वृक्षाणां शरीरत्वे आध्यात्मिकवायुसम्बन्धः प्रमाणम्। तस्य च प्रमाणं वृक्षाणां भग्ने सति पुनः संरोहणं वृद्धिश्च भवतः। यदि कश्चन वदेद् यद् हस्तादिष्वपि चेष्टास्ति अतस्तेषामपि शरीरत्वं स्यात्। तत्समाधानमन्त्यावयवित्वनिवेशेन हस्तस्य व्यावृत्तिर्भवतीति। हस्तो न अन्त्यावयवी।

अथवा परिष्कृतं लक्षणं इत्थं भवति- "चेष्टावदन्त्यावयविवृत्ति-द्रव्यत्वव्याप्यजातिमत्त्वम्"। अत्र मानुषत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयो भवति। अत्र नृसिंहशरीरे व्याप्तिसमन्वयार्थं शङ्का भवति यद् नृसिंहस्त्वेक एव अतो नृसिंहत्वं जातिर्न स्यात् (एकव्यक्तिवृत्तित्वात्)। तत्र समाधानं दीयते यत् कल्पभेदेन नृसिंहशरीराणां नानात्वं वर्तते अतो नृसिंहत्वं जातिरेव।

**मुक्तावली– इन्द्रियमिति। घ्राणेन्द्रियं पार्थिवमित्यर्थः। पार्थिवत्वं कथमिति चेदित्थम्- घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैवाऽभिव्यञ्जकत्वात्, कुङ्कुमगन्धाभिव्यञ्जकगोघृतवद्। न च दृष्टान्ते स्वीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यम्। परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वाद्। न च नवशरावगतगन्धव्यञ्जकजलेऽनैकान्तिकत्वमिति वाच्यम्? तस्य सक्तुरसाभिव्यञ्जकत्वात्। यद्वा परकीयेति न देयम्, वायूपनीतसुरभिभागानां दृष्टान्तत्वसम्भवाद्। न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्राभिव्यञ्जकत्वात्तत्र व्यभिचार इति वाच्यम्, द्रव्यत्वे सतीति विशेषणात्॥**

**व्याख्या–** इन्द्रियप्रकरणे "घ्राणेन्द्रियं पार्थिवम्" इति प्रतिज्ञा कृता। अत्र पार्थिवत्वसाधनाय हेतुरुक्तः– "रूपादिषु मध्ये गन्धस्यैवाऽभिव्यञ्जकत्वात्" इति। अर्थाच्चक्षुरादीनीन्द्रियाणि यथा रूपादीन् गुणान् गृह्णन्ति तथा घ्राणं केवलं गन्धमेव गृह्णाति न तु रूपादिकम्। अत्र व्याप्तिप्रदर्शनार्थं 'कुङ्कुमगन्धाभिव्यञ्जकगोघृतम्' दृष्टान्तरूपेण दत्तम्। यथा घृतं कुङ्कुमस्य गन्धं प्रकटयति तथा घ्राणमपि गन्धं प्रकटयति अतो घृतमिव घ्राणमपि पार्थिवम्। अत्र पूर्वपक्षी शङ्कते यद् घृतं तु स्वकीयं रूपमपि व्यञ्जयति (प्रकटयति) अतो गन्धमात्रव्यञ्जकत्वं घृते नास्ति येन दृष्टान्तो विकलः स्यात्। तन्निराकरणाय परकीय इति पदं निवेश्यते। अस्यायमर्थः- घ्राणं स्वकीयगुणं न गृह्णाति अपि तु अन्यस्य (परकीयस्य) गन्धस्यैव व्यञ्जकं भवति। न च जले अतिव्याप्तिर्वाच्या, यतो हि जलं नवशरावस्य (नूतनघटस्य) गन्धं प्रकटयति चेदपि तत् सक्तुरसादिकमपि प्रकटयति अतस्तत्र केवलगन्धव्यञ्जकत्वं नास्ति। अथवा परिष्कारान्तरं क्रियते यत् परकीयपदं विनापि 'वायूपनीतसुरभिभागाः' (वायुना आनीता गन्धकणाः) दृष्टान्तत्वेन स्वीकर्तुं शक्यन्ते। यदि कश्चन वदेद् यद् घ्राणेन्द्रियसन्निकर्षः (इन्द्रियविषयसम्बन्धः) अपि गन्धमात्रव्यञ्जकोऽस्ति तर्हि सन्निकर्षे (यो द्रव्यं नास्ति) अतिव्याप्तिर्वारयितुं "द्रव्यत्वे सति" इति विशेषणं देयम्। घ्राणं तु द्रव्यं वर्तते सन्निकर्षस्तु सम्बन्धः, अतो लक्षणं घ्राणे एव समन्वेति।

**मुक्तावली– विषयमाह- विषय इति। उपभोगसाधनं विषयः। सर्वमेव कार्यजातमदृष्टाधीनम्, यत् कार्यं यददृष्टाधीनं तत् तदुपभोगं साक्षात् परम्परया वा जनयत्येव। न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति। तेन द्व्यणुकादि ब्रह्माण्डान्तं सर्वमेव विषयो भवति। शरीरेन्द्रिययोविषयत्वेऽपि प्रकारान्तरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः॥**

व्याख्या– मुक्तावलीकारो विषयमाह- विषय इति प्रतीकमुपादायविषयस्य सामान्यलक्षणम् 'उपभोगसाधनं विषयः' इति प्रस्तौति। अत्र उपभोगो नाम सुखदुःखान्यतरसाक्षात्कारः। तस्य साधनं (निमित्तं) यद् भवति तद्विषयः। जगति किमपि वस्तु निष्प्रयोजनं न भवति। "न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति" इति न्यायानुसारं सर्वमेव कार्यजातं कस्यचित् पुरुषस्यादृष्टाधीनम् (कर्मफलानुसारि) भवति। यत् कार्यं येनादृष्टेन जन्यते तत् कार्यं तस्य पुरुषस्योपभोगं साक्षात् (यथा मालाचन्दनादिः) वा परम्परया (यथा द्व्यणुकादिः) वा जनयत्येव। अत एव "द्व्यणुकादि ब्रह्माण्डान्तं सर्वमेव विषयः" इति प्रोक्तम्। अत्रायमाशयो यत् परमाणोर्नित्यत्वाद् स विषयकोटौ नान्तर्भवति (यतः सः कार्यं नास्ति) परन्तु परमाणुभ्यां जातं द्व्यणुकं तदारभ्य त्रसरेणुकपालघटमृत्तिकापाषाणपर्वतादिक्रमेण ब्रह्माण्डं यावद् वर्तते तत् सर्वं कस्यचिज्जीवस्य भोगायैव निर्मितम्, अतस्तत्सर्वं विषयः। अत्रैका शङ्कोद्भवति– यद्युपभोगसाधनत्वं विषयत्वं तर्हि शरीरमिन्द्रियाण्यप्युपभोगस्य साधनान्येव, अतस्तयोः पृथगुल्लेखः किमर्थं कृतः ? मुक्तावलीकारस्समाधत्ते– शरीरेन्द्रिययोर्विषयत्वेऽपि प्रकारान्तरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थ इति। अर्थात् तत्त्वतस्तु शरीरमिन्द्रियञ्च विषय एव तथापि शिष्यस्यावबोधसौकर्याय 'शरीरम्' भोगाधिष्ठानत्वेन, 'इन्द्रियम्' भोगकरणत्वेनान्यानि च विषयत्वेन पृथगुपन्यस्तानि। एतावता कार्यरूपा पृथिवी निरूपिता।

## *पदानामर्थपरिचयः*

| | | |
|---|---|---|
| **योनिजम्** | = | शुक्रशोणितसंयोगजं शरीरम् |
| **अयोनिजम्** | = | शुक्रशोणितसम्बन्धं विना जातम् |
| **चेष्टा** | = | हितप्राप्ति-अहितपरिहारानुकूला क्रिया |
| **उपभोगः** | = | सुखदुःखान्यतरसाक्षात्कारः |
| **व्याप्यवृत्तिः** | = | यः स्वाश्रये सर्वत्र तिष्ठति |
| **अव्याप्यवृत्तिः** | = | य एकदेशे तिष्ठति सः |
| **अन्त्यावयवी** | = | यः कस्यापि अवयवो न भवति |
| **साङ्कर्यदोषः** | = | विरूद्धधर्मयोरेकत्र समावेशः |

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) पार्थिवं शरीरं कतिविधं भवति ?

(ख) गन्धग्राहकमिन्द्रियं किम् ?

(ग) वृक्षादेः शरीरत्वे किं मानम् ?

### २. व्याख्यात्मकमुत्तरं लिखत

(क) घ्राणेन्द्रियस्य पार्थिवत्वे मानं दर्शयत।

(ख) पृथिव्याः स्पर्शोऽनुष्णाशीतो भवति। अत्र 'पाकजः' इति विशेषणेन वायोर्व्यावृत्तिः कथं जायते ? स्पष्टं कुरुत।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) "परमाणुपुञ्जैरेवोपपत्तेः" इति पूर्वपक्षस्य निराकरणं मुक्तावलीकारः कथं करोति ? तद्दर्शयत।

(ख) मेरुसर्षपसाम्यप्रसङ्गं वारयन् अनवस्थाभयेन परमाणुः कथं नित्यः सिद्धः ? इति समाधत्त।

(ग) वृक्षाणां शरीरत्वम् आध्यात्मिकवायुसम्बन्धेन कथं समर्थितम् ? इति प्रोच्य नृसिंहशरीरे शरीरलक्षणस्य समन्वयं दर्शयत।

### ४. परस्परं मेलयत

| | |
|---|---|
| नित्या पृथिवी | घ्राणेन्द्रियम् |
| अयोनिजशरीरम् | परमाणुरूपा |
| पार्थिवेन्द्रियम् | स्वेदज-उद्भिज्ज-नारकीयशरीराणि |
| पार्थिवविषयः | उपभोगसाधनम् |
| विषयः | द्व्यणुकादि ब्रह्माण्डान्तः |

५. सन्धियुक्तपदच्छेदं कुरुत

शरीरेन्द्रिययोर्विषयत्वेऽपि, द्व्यणुकादिश्च, योनिजादिर्भवेद्देहः।

६. "अदृश्यस्य दृश्यानुपादानत्वाद्" इति नियमस्य त्रसरेणु-द्व्यणुकसन्दर्भे विश्लेषणं कुरुत।

## *परियोजनाकार्यम्-*

पृथिव्याः त्रिविधविभागं दर्शयन् एकं रेखाचित्रं रचयत।

द्वादशः पाठः

# जलनिरूपणम्

क्रमप्राप्तं जलस्वरूपं प्रतिपादयितुमारभते ग्रन्थकारः-

**कारिका–** **वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ।**
**स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम्॥ ३९॥**

**अन्वयः-** जले शुक्लः वर्णः, रसस्पर्शौ मधुरशीतलौ, तत्र स्नेहः द्रवत्वं तु सांसिद्धिकम् उदाहृतम्।

**कारिकार्थः-** जले = अप्सु, वर्णः = रूपम्, शुक्लः = अभास्वरशुक्लः, रसस्पर्शौ = रसः स्पर्शश्च, मधुरशीतलौ = मधुरो रसः शीतलः स्पर्शश्च भवतः। तत्र = जले, स्नेहः = स्नेहगुणः, द्रवत्वं तु = द्रवत्वगुणस्तु, सांसिद्धिकम् = स्वाभाविकम् (अग्निं विनापि स्यन्दनशीलम्) उदाहृतम्।

जलत्वजातिसिद्धिप्रक्रियां तल्लक्षणानि च दर्शयति मुक्तावलीकारः -

**मुक्तावली–** **जलं निरूपयति- वर्णः शुक्ल इति। स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिः सिद्ध्यति। यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं तथाऽपि जन्यस्नेहत्वं तथा बोध्यम्। अथ परमाणौ जलत्वं न स्यात् तत्र जन्यस्नेहाभावात्, तस्य च नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भावनियमादिति चेन्न, जन्यस्नेहजनकतावच्छेदिकाया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धेः।**

**व्याख्या–** जलं निरूपयति- वर्णः शुक्ल इति। अत्र ग्रन्थकारो जलस्य स्वरूपं स्पष्टयति। अत्र मुख्या जलत्वजातिसिद्धिः। यथा पृथिव्यां गन्धसमवायिकारणतया पृथिवीत्वं सिद्धं तथैव जले स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिः सिद्ध्यति। स्नेहो नाम स गुणो येन चूर्णादीनां पिण्डीभावो विधीयते, स च केवलं जल एव वर्तते। अतः स्नेहं प्रति जलं कारणम्। तन्निष्ठकारणताया अवच्छेदकञ्च जलत्वं वर्तते। स्नेहत्वं जातिः सा च नित्या (परमाणौ) अनित्या (कार्ये) च वर्तते, अतः केवलं स्नेहत्वं कार्यतावच्छेदकं न भवति अपि तु जन्यस्नेहत्वं कार्यतावच्छेदकं मन्तव्यम्।

अत्र कश्चन शङ्कते- यदि जन्यस्नेहकारणतावच्छेदकतया जलत्वं सिद्ध्यति तर्हि जलपरमाणौ जलत्वं न सिद्ध्येत, यतः परमाणौ तु स्नेहो नित्यो न तु जन्यः। यदि नित्यः परमाणुः स्नेहं जनयितुं स्वरूपयोग्यः स्यात् तर्हि सः कदाचित्

स्नेहं जनयेत् स्वरूपयोग्यत्वे फलावश्यम्भावनियमात्। परन्तु परमाणौ कार्योत्पत्तिर्न भवति। अस्य समाधानं मुक्तावलीकारः प्रस्तौति- प्रथमतो जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातिः सिद्ध्यति। तदनन्तरं तस्या जन्यजलत्वावच्छिन्नजनकतावच्छेदकतया जलत्वजातिर्जलपरमाणवपि सिद्ध्यति।

**मुक्तावली– शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति न तु शुक्लरूपवत्त्वं लक्षणम्। अथवा नैमित्तिकद्रवत्ववदवृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्, अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थस्तेन स्फटिकादौ नातिव्याप्तिः। रसस्पर्शाविति। जलस्य मधुर एव रसः। शीत एव स्पर्शः। तिक्तरसवद्वृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थस्तेन शर्करादौ नातिव्याप्तिः। शीतेतरस्पर्शवदवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः॥**

**व्याख्या**– वर्णः शुक्ल इति पदेन जलस्य रूपं केवलं शुक्लं भवति इति दर्शितवान् ग्रन्थकारो न तु शुक्लरूपवत्त्वं जलस्य लक्षणम्, यतः पृथिव्यामपि शुक्लरूपं वर्तते अतस्तत्रातिव्याप्तिः स्यात् तदर्थं ग्रन्थकृता लक्षणपरिष्कारो विधीयते- 'नैमित्तिकद्रवत्ववदवृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्' इति। अस्यायमर्थः– नैमित्तिकं द्रवत्वं (यथा घृतसुवर्णादिषु वह्निसंयोगजन्यं द्रवत्वं) यत्र वर्तते तत्रावर्तमाना तथा रूपवति (जले) वर्तमाना या द्रव्यत्वस्य साक्षाद्व्याप्या जातिः जलत्वम्, सा यत्रास्ति तज्जलम्। एतेन घृतसुवर्णादीनां व्यावृत्तिर्भवति। अथवा द्वितीयः परिष्कारः- 'अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्' इति विहितः। अनेन परिष्कारेण स्फटिकस्यापि व्यावृत्तिर्भवति। "रसस्पर्शाविति" पदेन जलस्य रसो मधुर एव, स्पर्शश्च शीतल एवेति नियमो दर्शितः। मुक्तावलीकारः शर्करादिषु मधुररसस्य सत्त्वात्तत्रातिव्याप्तिं वारयितुं रसघटितं परिष्कृतं लक्षणं प्रस्तुतवान्-'तिक्तरसवदवृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्' इति। अयमर्थः- तिक्तरसो यत्र (पृथिव्यां) वर्तते तत्रावर्तमाना तथा च मधुररसयुक्ते जले वर्तमाना या जातिर्जलत्वं सा यत्रास्ति तज्जलमिति। शर्करा तु पृथिव्यस्ति तत्र च मधुररसेन सह तिक्तरसस्यापि सामानाधिकरण्यं भवति अतस्तत्र जलत्वजातेरभावादतिव्याप्ति र्वारिता भवति।

अन्ते स्पर्शविषयेऽप्येवमेव परिष्कारो विधेयः– 'शीतेतरस्पर्शवदवृत्तिस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्'। अर्थात् शीतलस्पर्शभिन्नः स्पर्शो यत्र वर्तते तत्रावर्तमाना या जातिः (जलत्वं) सा यत्रास्ति तज्जलम्। एतेन तेजोवायुपृथिवीनां व्यावृत्तिर्भवति यतस्तेषु शीतलस्पर्शभिन्नः स्पर्श उपलभ्यते।

**मुक्तावली– ननु शुक्लरूपवत्त्वमेवेति कुतः ? कालिन्दीजलादौ नीलिमोपलब्धेरिति चेन्न, नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावाज्जले नीलरूपासम्भवात्, कालिन्दीजले नीलत्वप्रतीतिस्त्वाश्रयौपाधिकी। अत एव वियति विक्षेपे धवलिमोपलब्धिः।**

**व्याख्या**– ननु शुक्लरूपवत्त्वमेवेति कुतः ? इत्यनेन पूर्वपक्षी शङ्कते। तस्याशयोऽयं वर्तते- यदि जलस्य रूपं नियमेन शुक्लं भवति तर्हि कालिन्दीजलादौ (यमुनाजले) या नीलवर्णस्योपलब्धिर्भवति सा कथं सङ्गच्छते ? किञ्च यदि तत्र नीलरूपं दृश्यते तर्हि जलस्य लक्षणे शुक्लरूपवत्त्वं न व्याप्नोति। अस्य समाधानं ग्रन्थकारः कार्यकारणनियमबलेन प्रस्तौति। न्यायसिद्धान्ते नीलरूपस्य पृथिवीत्वजातिरेव कारणतावच्छेदिका वर्तते अर्थाद् नीलरूपं केवलं पृथिव्यामेवोत्पद्यते न तु जले, अतो जले नीलरूपस्योत्पत्तिः सर्वथाऽसम्भवा। यत् कालिन्दीजले नीलत्वं प्रतीयते तदाश्रयौपाधिकं वर्तते।

अयमाशयः- यमुनाजले तदधःस्थिता या नीला मृत्तिका (पृथिवी) तस्या नीलिमा जले प्रतिबिम्बितो भवति। यथा स्फटिकमणौ जपाकुसुमस्य सान्निध्याद्रक्तं प्रतीयते तथा नीलमृत्तिकासम्बन्धाज्जले नीलत्वभ्रमो जायते। अत्र प्रबलं प्रमाणं दर्शयति- अत एव वियति विक्षेपे धवलिमोपलब्धिरिति। अर्थात्तदेव कालिन्दीजलं यदा पात्रे गृहीत्वाऽकाशे विक्षिप्यते तदा तत्रौपाधिकनीलिमाया अभावात् स्वाभाविको धवलिमा (शुक्लत्वम्) एव दृश्यते। एवं सिद्धं भवति यज्जलस्य रूपं तु नियमेन शुक्लमेव, नीलिमा तु तत्र केवलं भ्रान्तिरथवा बाह्यसम्बन्धप्रयुक्तास्तीति।

**मुक्तावली–अथजलेमाधुर्येकिंमानम्?नहिप्रत्यक्षेणकोऽपिरसस्तत्राऽनुभूयते,नचनारिकेलजलादौ माधुर्यमुपलभ्यत एवेति वाच्यम्। तस्याऽश्रयौपाधिकत्वाद्, अन्यथा जम्बीररसादावम्लादिरसोपलब्धेरम्लादिमत्त्वमपि स्यादिति चेन्न, हरीतक्यादिभक्षणस्य जलरसाभिव्यञ्जकत्वात्। न च हरीतक्यामेव जलोष्मसंयोगाद्रसान्तरोत्पत्तिरिति वाच्यम्। कल्पनागौरवात्, पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जले नाम्लादिकम्। जम्बीररसादौ त्वाश्रयौपाधिकी तथा प्रतीतिः। एवं जन्यशीतस्पर्शजनकतावच्छेदकं जन्यजलत्वम्, तदवच्छिन्नजनकतावच्छेदकं जलत्वं बोध्यम्। घृष्टचन्दनादौ तु शैत्योपलब्धिश्चन्दनान्तर्वर्तिशीततरसलिलस्यैव। तेजःसंयोगाज्जले उष्णप्रतीतिरौपाधिकी स्फुटैव तत्र पाकासम्भवात्॥**

**व्याख्या**– अत्र पूर्वपक्षी शङ्कते जलस्य मधुररसे किं प्रमाणम्? इति। न ह्यस्माभिः शुद्धजले कोऽपि रसोऽनुभूयते। यदि कश्चन वदेद्यद् नारिकेलजलादौ माधुर्यमुपलभ्यत इति तर्हि तत्राश्रयौपाधिकत्वम् (पार्थिवभागसम्बन्धः) अस्ति। अन्यथा जम्बीरसादौ (निम्बूकजले) आम्लरसस्यानुभूतत्वाज्जलमाम्लरसवदपि स्यात्। एतत् समाधत्ते ग्रन्थकारः– "हरीतक्यादिभक्षणस्य जलरसाभिव्यञ्जकत्वात्" इति। हरीतकीं भक्षित्वा यदा जलं पीयते तदा जलं मधुरं प्रतीयते। अत्र यदि कश्चन वदेद्यद् हरीतक्यां जलेन सह संयोगे सति नूतनस्य मधुररसस्योत्पत्तिर्भवति तर्हि तद् न युक्तं यतस्तादृशकल्पनायां गौरवदोषो भवति। लाघवाज्जलस्य स्वाभाविको मधुररस एव हरीतक्या व्यज्यते इति स्वीकर्तव्यम्। अपि च पूर्ववदत्रापि नियमो यत् पृथिवीत्वं जातिरेव आम्लादिरसजनकतावच्छेदिकाऽस्ति, अतो जल आम्लादिरसस्योत्पत्तिस्सर्वथाऽसम्भवा। जम्बीरादौ याऽम्लत्वप्रतीतिः सा पार्थिवांशसान्निध्याद् 'औपाधिकी' एव।

तदनन्तरं स्पर्शविषये परिष्कारं कुर्वन् ग्रन्थकार आह– यथा स्नेहस्य कारणतया जलत्वं सिद्धं तथैव जन्यशीतस्पर्शजनकतावच्छेदकतया जलत्वं सिद्ध्यति। यद्यपि घृष्टचन्दनादौ (शीतलचन्दनलेपे) शीतलस्पर्शोऽनुभूयते तथापि स न चन्दनस्य गुणोऽपि तु चन्दनान्तर्वर्तिशीततरसलिलस्य (तदन्तःस्थितस्य जलस्य) एव स स्पर्शः। एवं च यत्राग्नेरातपाज्जलमुष्णं प्रतीयते तत्राप्युष्णता न जलस्य गुणोऽपि तु तेजसः सम्बन्धात् सा त्वौपाधिकी। जले पाकः (तेजःसंयोगजन्यं रूपरसपरिवर्तनम्) न सम्भवतीति न्यायसिद्धान्तः।

**मुक्तावली– स्नेहस्तत्रेति। घृतादावपि तदन्तर्वर्तिजलस्यैव स्नेहो जलस्य स्नेहसमवायिकारणत्वात्। तेन जल एव स्नेह इति मन्तव्यम्। द्रवत्वमिति। सांसिद्धिकद्रवत्वत्वं जातिविशेषः प्रत्यक्षसिद्धः तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः। तैलादावपि जलस्यैव द्रवत्वं स्नेहप्रकर्षेण च दहनानुकूल्यमिति वक्ष्यति॥**

**व्याख्या**– मुक्तावलीकार इदानीं जलस्य विशेषगुणानां स्नेहद्रवत्वयोर्विषयमित्थं विवेचयति- स्नेहस्तत्रेति प्रतीकमुपादाय ग्रन्थकारः स्नेहस्यैकमात्रमाश्रयं जलमेवेति निर्धारयति। लोके घृतादौ स्नेहः प्रतीयते परं नैयायिकमते सः स्नेहो घृतस्य न, अपि तु तदन्तर्वर्तिजलस्यैवास्ति। अस्य कारणं जलस्य स्नेहसमवायिकारणत्वादिति। अर्थात् स्नेहः केवलं जले एव समवेतो भवति। घृते यः चिक्कणतानुभवो भवति सः तत्रत्यजलभागस्यैव इति मन्तव्यम्। ततः परं "द्रवत्वमिति" पदेन द्रवत्वस्य स्वरूपं विवृणोति। जले सांसिद्धिकद्रवत्वं वर्तते। इदं द्रवत्वं कश्चन जातिविशेषोऽस्ति यः प्रत्यक्षसिद्धः। अस्य द्रवत्वस्य या जनकता तस्या अवच्छेदकं जलत्वमेव। अर्थाज्जलं विनान्यत्र कुत्रापि स्वाभाविकं द्रवत्वं न तिष्ठति।

ननु तैलादौ कथं द्रवत्वमुपलभ्यते ? तत्राह- "तैलादावपि जलस्यैव द्रवत्वम्"। तैले यद् द्रवत्वं दृश्यते तत् तत्र मिश्रितस्य जलस्यैवास्ति। अत्र कश्चन ब्रूते- यदि तैले जलं वर्तते तर्हि जलं त्वग्निं निर्वापयति, परं तैलं त्वग्निं प्रज्वालयति तत् कथम् ? तत्र समाधानं ददाति- "स्नेहप्रकर्षेण च दहनानुकूल्यम्" इति। तैले जलस्य स्नेहोऽतीव 'प्रकृष्टः' (अधिकः) भवति सः प्रकृष्टस्नेह एवाग्नेरनुकूलः सन् दीपयति न तु जलत्वेन निर्वापणम्। एतच्चाग्रे विस्तरेण वक्ष्यते। एतावता मुक्तावलीकारः स्नेहस्य द्रवत्वस्य च मुख्यं स्थानं जलमेवेति प्रतिष्ठाप्य घृततैलादिषु तयोरुपस्थितिमौपाधिकीं साधितवान्।

**कारिका-** **नित्यतादि प्रथमवत् किन्तु देहमयोनिजम्।**
**इन्द्रियं रसनं सिन्धुर्हिमादिर्विषयो मतः॥ ४०॥**

**अन्वयः-** नित्यतादि प्रथमवत्, किन्तु देहम् अयोनिजम्, इन्द्रियं रसनं, सिन्धुर्हिमादिः विषयः मतः।

**कारिकार्थः-** नित्यतादि = नित्यत्व-अनित्यत्वादिकं, प्रथमवत् = पूर्ववत् (पृथिवीवत्) किन्तु = परन्तु, देहम् = शरीरम्, अयोनिजम् = शुक्रशोणितनिरपेक्षम्, इन्द्रियम् = रसग्राहकम्, रसनम् = रसनेन्द्रियं (जिह्वाग्रवर्ति), सिन्धुहिमादिः = समुद्रहिमकरकादिः, विषयः = भोग्यं वस्तु, मतः = अभिहितः।

जलभेदं प्रदर्शयति-

**मुक्तावली- प्रथमवदिति। पृथिव्या इवेत्यर्थः। तथा हि - जलं द्विविधं नित्यमनित्यं च। परमाणुरूपं नित्यं, दव्यणुकादि सर्वमनित्यमवयवसमवेतं च। अनित्यमपि त्रिविधं-शरीरेन्द्रियविषयभेदात्। पृथिवीतो यो विशेषस्तमाह- किन्त्विति। देहमयोनिजम्-अयोनिजमेवेत्यर्थः। जलीयं शरीरमयोनिजं वरुणलोके प्रसिद्धम्॥**

**व्याख्या-** "प्रथमवदिति" प्रतीकमुपादाय ग्रन्थकारः प्रतिपादयति यज्जलस्य व्यवस्था अपि पृथिव्या इव वर्तते। यथा पृथिवी द्विविधा (नित्या अनित्या च) तथैव जलमपि द्विविधम्- परमाणुरूपं नित्यं द्व्यणुकादिरूपं चानित्यम्। अत्रापि युक्तिः सैव यत् सावयवं (अवयवसमवेतं) तत् कार्यत्वादनित्यम्, यच्च निरवयवं तद् नित्यम्। पुनरनित्यं जलमपि त्रिविधं भवति- शरीर-इन्द्रिय-विषयभेदात्। पृथिव्यपेक्षया जले यो विशेषो वर्तते तं दर्शयति- किन्त्विति। पृथिव्यां शरीरं योनिजमयोनिजं चेति द्विविधं भवति परन्तु जलीयं शरीरमयोनिजमेवेति नियमः। अत्रैवकारेण योनिजत्वस्य व्यवच्छेदो भवति। जलीयं शरीरं मानुषलोके न दृश्यते तद् 'वरुणलोके' प्रसिद्धं वर्तते। तत्र शरीरस्य आरम्भकाः परमाणवः जलीया एव भवन्ति, अन्यानि भूतानि तु केवलमुपष्टम्भकरूपाणि (सहायकानि) भवन्ति।

**मुक्तावली– इन्द्रियमिति। जलीयमित्यर्थः। तथा हि - रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत्। रसनेन्द्रियसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम्। विषयं दर्शयति- सिन्धुरिति। सिन्धुः- समुद्रः, हिमं- तुषारः, आदिपदात् सरित्कासारकरकादिः सर्वोऽपि ग्राह्यः। न च हिमकरकयोः कठिनत्वात् पार्थिवत्वमिति वाच्यम्। ऊष्मणा विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात्। यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः। अदृष्टविशेषेण द्रवत्वप्रतिरोधात् करकायां काठिन्यप्रत्ययस्य भ्रान्तित्वात् ॥**

**व्याख्या-** इन्द्रियं वर्णयन्नाह- "इन्द्रियं रसनम्" इति। जलस्य इन्द्रियं रसनं (जिह्वाग्रवर्ति) भवति। अस्य लक्षणं "रसोपलब्धिसाधनत्वे सति इन्द्रियत्वं रसनम्"। यतो हि रसनं रसमात्रव्यञ्जकं भवति अतस्तस्य जलीयत्वं सिद्ध्यति। विषयं वर्णयन्नाह- "सिन्धुर्हिमादिर्विषयः"। अत्र सिन्धुपदेन समुद्रादीनां जलानाम्, हिमपदेन च करकाया ग्रहणं भवति। अत्र "इन्द्रियमिति" प्रतीकमुपादाय ग्रन्थकारो रसेन्द्रियस्य जलीयत्वं प्रसाधयति। अत्रानुमानञ्चेत्थं वर्तते- रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत्। अस्यायमर्थः- यथा जलं सक्तोर्गन्धादिकं न प्रकाशयति परं तस्य रसं व्यञ्जयति (प्रकटयति) तथैव रसनेन्द्रियमपि केवलं रसस्यैव ग्राहकं भवति अतस्तस्य जलीयत्वं सुनिश्चितम्। अत्र रसनेन्द्रियसन्निकर्षे व्यभिचारं वारयितुं द्रव्यत्वे सतीति विशेषणं देयम्। यतो हि सन्निकर्षो गुणोऽस्ति न तु द्रव्यम्। विषयं दर्शयति- सिन्धुरित्यत्र जलस्य विविधाः विषयाः प्रदर्शिताः। सिन्धुर्नाम समुद्रः, हिमं तुषारः। आदिपदेन नद्यः सरांसि करका इत्यादयः सर्वे गृह्यन्ते। न च हिमकरकयोः कठिनत्वात् पार्थिवत्वमिति वाच्यम्? अस्य समाधानं मुक्तावलीकारो द्वेधा करोति- १. प्रत्यक्षबलेन- ऊष्मणा (तापेन) सा करका

विलीना सती जलं भवति तत्र च जलत्वस्य प्रत्यक्षं जायते। २. व्याप्तिबलेन- यद् द्रव्यं यद् द्रव्यध्वंसजन्यमिति व्याप्तिः। अर्थात् करकाया ध्वंसे सति यज्जलं जायते तस्योपादानकारणमपि जलमेव भवितुं शक्नोतीत्यतः करका जलीया एव।

ननु यदि करका जलीया तर्हि तस्यां कठिनत्वं कथम् ? तत्राह - अदृष्टविशेषेण द्रवत्वप्रतिरोधादिति। ईश्वरस्येच्छाविशेषेणाथवा प्राणिनोऽदृष्टवशाज्जजलस्य स्वाभाविकं द्रवत्वं प्रतिरुद्धं भवति येन तत्र काठिन्यस्य प्रतीतिर्जायते। वस्तुतस्तत्र काठिन्यप्रत्ययो भ्रान्तिरेव, यतस्तत्र कठिनत्वं नाम पार्थिवगुणो नास्ति अपित्ववयवानां निबिडसंयोगमात्रमस्ति। एतावता मुक्तावलीकारो जलीयविषयाणां वैविध्यं युक्तिपूर्वकं प्रसाधितवान्।

## पदानामर्थपरिचयः

**स्वरूपयोग्यत्वम्** = कारणतावच्छेदकधर्मवत्त्वम्

**वियति** = आकाशे

**धवलिमा** = श्वेतरूपम्

**अभास्वरशुक्लरूपम्** = दीप्तिरहितं श्वेतं रूपम्

**आश्रयौपाधिकी प्रतीतिः** = स्वाश्रयगतं धर्मं विहाय बाह्यसम्बन्धाज्जायमाना प्रतीतिः

**व्यञ्जकम्** = तिरोहितस्य प्रकाशकम्

**स्नेहप्रकर्षः** = स्नेहस्य आधिक्यम्

**करका** = मेघात् पतितं घनीभूतं जलम्

**द्रवत्वप्रतिरोधः** = अदृष्टवशाद् द्रवत्वस्य प्रतिबन्धकः

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) जलस्य को गुणो जलत्वजातिं साधयति ?

(ख) जलस्य रूपं कीदृशं भवति ?

(ग) यमुनाजले (कालिन्दीजले) नीलिमा किमर्थं दृश्यते ?

(घ) जलीयशरीरं योनिजं भवति वा अयोनिजम् ?

(ङ) करकाया जलीयत्वे किं प्रमाणम् ?

(च) रसनेन्द्रियं जलीयं किमर्थम् उच्यते ?

### २. व्याख्यानं कुरुत

(क) "जन्यस्नेहजनकतावच्छेदिका जन्यजलत्वजातिः" इति पदेन जलत्वजातिः कथं सिद्ध्यति ?

(ख) हरीतकीभक्षणस्य उदाहरणं दत्त्वा जलस्य स्वाभाविकमाधुर्यं प्रसाधयत।

(ग) घृततैलादिषु स्नेहद्रवत्वयोरुपलब्धिः कथं जायते ?

(घ) तैले जलसत्त्वेऽपि तस्य दहनानुकूल्यं (अग्निप्रज्वालनम्) कथं सम्भवति ? स्नेहप्रकर्षदृष्ट्या स्पष्टयत।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) "शुक्लरूपवत्त्वं जलस्य लक्षणम्" इत्यत्र स्फटिकादौ अतिव्याप्तिं निर्दिश्य 'नैमित्तिकद्रवत्ववदवृत्ति' इति विशेषणस्य सार्थकतां प्रतिपादयत।

(ख) करकायाः कठिनत्वेऽपि सा पृथिवी किमर्थं न भवति ?

(ग) रसनेन्द्रियं जलीयं वर्तते—अत्र "गन्ध-अव्यञ्जकत्वे सति रस-व्यञ्जकत्वम्" इति हेतोः विश्लेषणं कुरुत।

(घ) "यद् द्रव्यं यद् द्रव्यध्वंसजन्यम्, तत् तदुपादानोपादेयम्" इति व्याप्तिबलेन करकायाः जलीयत्वं साधयत।

४. **परस्परं मेलयत**

| | |
|---|---|
| जलत्वजातिः | वरुणलोके |
| अयोनिजशरीरम् | स्नेहसमवायिकारणतावच्छेदिका |
| सांसिद्धिकद्रवत्वम् | चन्दनान्तर्वर्तिसलिलात् |
| चन्दनलेपे शैत्यम् | केवलं जले एव |
| यमुनाजले नीलत्वम् | आश्रयौपाधिकी भ्रान्तिः |

५. **सन्धियुक्तपदच्छेदं कुरुत**

'सांसिद्धिकमुदाहृतम्', 'नीलिमोपलब्धिः', 'जलोष्मसंयोगात्', 'तदवच्छिन्नजनकतावच्छेदकतया'।

६. **यदि जले पाकोऽङ्गीक्रियेत तर्हि जलस्य नित्यशुक्लत्वनियमस्य किं भवेत् ? मुक्तावल्युक्तरीत्या उत्तरं लिखत।**

***परियोजनाकार्यम्-***

अनित्यजलस्य त्रिविधं विभागं तस्योदाहरणैः सह रचयत।

त्रयोदशः पाठः

# तेजोनिरूपणम्

क्रमप्राप्तं तेजःस्वरूपं प्रतिपादयितुमारभते ग्रन्थकारः-

**कारिका–** उष्णः स्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्।
नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत्॥ ४१॥

**अन्वयः-** तेजसः तु स्पर्शः उष्णः स्यात्, रूपं शुक्लभास्वरम्, द्रवत्वं तु नैमित्तिकम्, नित्यतादि च पूर्ववत्।

**कारिकार्थः-** तेजसस्तु = तेजःपदार्थस्य तु, स्पर्शः = स्पर्शगुणः, उष्णो भवति। रूपम् = रूपगुणः शुक्लभास्वरम् = भास्वरशुक्लवर्णः, स्यात् = भवति। द्रवत्वं तु = द्रवत्वगुणस्तु, नैमित्तिको भवति। नित्यतादि च = नित्यत्व-अनित्यत्वादि च पूर्ववत् = जल-पृथिवीवत् (ज्ञेयम्) भवति।

अत्र तेजस्त्वजातिसिद्धिं तल्लक्षणानि च प्रदर्शयति ग्रन्थकारः-

**मुक्तावली–** तेजो निरूपयति उष्ण इति। उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः। इत्थं च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषस्तस्य परमाणुवृत्तित्वं जलत्वस्येवानुसन्धेयम्। न चोष्णस्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यम्। तत्राप्युष्णस्पर्शस्य सत्त्वात् किन्तु तदन्तःपातिजलस्पर्शेनाभिभवादग्रहः। एवं रत्नकिरणादौ च पार्थिवस्पर्शेनाभिभवात्, चक्षुरादौ चानुद्भूतत्वादग्रहः। रूपमित्यादि। वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभवात् शुक्लरूपाग्रहः। अथ तद्रूपाग्रहे धर्मिणोऽपि चाक्षुषत्वं न स्यादिति चेन्न, अन्यदीयरूपेणैव धर्मिणो ग्रहसम्भवात् शङ्खस्येव पित्तपीतिम्ना। वह्नेस्तु शुक्लं रूपं नाभिभूतं किन्तु तदीयं शुक्लत्वमभिभूतमित्यन्ये।

**व्याख्या–** तेजसोऽसाधारणं लक्षणं वर्णयन् ग्रन्थकार आह- उष्णस्पर्शवत् तेज इति। अत्रोष्णत्वं स्पर्शनिष्ठः कश्चन जातिविशेषो यः प्रत्यक्षसिद्धो वर्तते। तथा च 'जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वम्'। अर्थादुष्णस्पर्शं प्रति तेजः समवायिकारणं भवति, समवायिकारणता च तेजसि। तादृशसमवायिकारणतावच्छेदिका तेजस्त्वजातिर्भवति। यथा जलत्वस्य परमाणुवृत्तित्वं साधितन्तथैव तेजस्त्वमपि तेजःपरमाणौ वर्तत इत्यनुसन्धेयम्।

अत्र चन्द्रकिरणादौ उष्णस्पर्शस्याभावादव्याप्तिः शङ्क्यते। तत्र समाधानं दीयते यच्चन्द्रकिरणेष्वप्युष्णस्पर्श

स्तु वर्तते एव किन्तु तदन्तर्गतेन जलस्पर्शेन (शीतलत्वेन) तस्योष्णस्पर्शस्याभिभवः (दमनम्) भवति, अतस्तस्य ग्रहणं न जायते। एवमेव रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवो भवति, तथा च चक्षुरादौ (नेत्रेन्द्रिये) तेजः सत्त्वेऽपि तस्यानुद्भूतत्वाद् (अप्रकटत्वात्) उष्णस्पर्शस्य प्रत्यक्षं न भवति।

तेजसो रूपं भास्वरशुक्लमुच्यते। जलस्यापि रूपं शुक्लं भवति परं तेजसो रूपं भास्वरमस्तीति विशेषः। अत्र पुनः शङ्का भवति यद् वैश्वानरे (अग्नौ) मरकतकिरणादौ च शुक्लरूपं किमर्थं न दृश्यते ? तत्र समाधानं वर्तते यत् पार्थिवरूपेण (इन्धनरूपेण वा रत्नभागेन वा) तस्य शुक्लरूपस्याभिभवो भवति।

अत्र कश्चन तर्क उत्थाप्यते- यदि तेजसो रूपं न गृह्यते तर्हि तस्य धर्मिणरपि चाक्षुषप्रत्यक्षं न स्यात् ? तत्राह- "अन्यदीयरूपेणैव धर्मिणो ग्रहसम्भवात्"। यथा पीतिमादोषयुक्तस्य पुरुषस्य चक्षुषा शङ्खः पीतो दृश्यते (तत्र पित्तस्य पीतिम्ना शङ्खस्य ग्रहणं भवति) तथैव पार्थिवरूपेणाग्नेर्ग्रहणं भवति। केचन आचार्या मन्यन्ते यद्वह्नेः शुक्लरूपं नाभिभूतमपि तु तदीयं शुक्लत्वमात्रमभिभूतम्, अतस्तेजः प्रत्यक्षं भवति।

अन्ते द्रवत्वविषये विशेष उक्तः- "नैमित्तिकं द्रवत्वं तु" इति। तेजसि (यथा सुवर्णादौ) यद् द्रवत्वं वर्तते तन्नैमित्तिकं भवति, अर्थादग्निसंयोगाज्जायते न तु सांसिद्धिकम्। नित्यताऽनित्यते शरीर-इन्द्रिय-विषयविभागाश्च सर्वेऽपि पृथिवीजलवद् एव बोध्याः।

**मुक्तावली– नैमित्तिकमिति। सुवर्णादिरूपे तेजसि तत्सत्त्वात्। न च नैमित्तिकद्रवत्ववत्त्वं दहनादावव्याप्तं घृतादावतिव्याप्तं चेति वाच्यम् ? पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्व साक्षाद्व्याप्यजातिमत्त्वस्य विवक्षितत्वात्। पूर्ववदिति। जलस्येवेत्यर्थः। तथाहि- तद्द्विविधं नित्यमनित्यं च। नित्यं परमाणुरूपं तदन्यदनित्यमवयवि च। तच्चत्रिधा शरीरेन्द्रियविषयभेदात्। शरीरमयोनिजमेव। तच्च सूर्यलोकादौ प्रसिद्धम्॥**

**व्याख्या**– नैमित्तिकमिति प्रतीकमुपादाय ग्रन्थकारः तेजसो द्रवत्वं विवृणोति। नैयायिकमते सुवर्णादि तेजस एव रूपं वर्तते। सुवर्णे यद्द्रवत्वं दृश्यते तदग्निसंयोगजन्यं भवति अतस्तद् नैमित्तिकमुच्यते। अत्र कश्चन शङ्कते- यदि नैमित्तिकद्रवत्ववत्त्वं तेजसो लक्षणं तर्हि दहने (अग्नौ) तस्याभावादव्याप्तिः स्यात्, घृतादौ (पार्थिवद्रव्ये) तस्य सत्त्वादतिव्याप्तिश्च।

अस्य निराकरणाय जातिघटितं लक्षणं प्रस्तूयते- पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्। अस्यायमर्थः- नैमित्तिकं द्रवत्वं यत्र वर्तते (सुवर्णादौ) तत्र वर्तमाना अथ पृथिव्याम् (घृतादौ) अवर्तमाना या द्रव्यत्वस्य साक्षाद्व्याप्या जातिः (तेजस्त्वम्)। सा यत्रास्ति तत् तेजः। सुवर्णे तेजस्त्वं वर्तते घृते तु पार्थिवत्वमत एतेन परिष्कारेण घृतादीनां व्यावृत्तिर्भवति। दहने च तेजस्त्वजातेः सत्त्वाल्लक्षणसमन्वयो भवति।

"पूर्ववदिति" पदेन जलवत् तेजसोऽपि विभागः करणीय इत्याशयः। तेजो द्विविधम्- नित्यं परमाणुरूपम्, अनित्यं च द्व्यणुकादि-अवयविरूपम्। अनित्यं तेजः पुनस्त्रिविधं भवति- शरीरेन्द्रियविषयभेदात्।

तेजसः शरीरं वर्णयन्नाह- "शरीरमयोनिजमेव"। जलीयशरीरवत् तेजसः शरीरमपि केवलमयोनिजमेव भवति यत् सूर्यलोकादौ प्रसिद्धं वर्तते। तत्र शरीराणि तेजःपरमाणुभिर्निर्मितानि भवन्ति, अन्यानि भूतानि तु तत्रोपष्टम्भकाणि भवन्ति। इन्द्रियं तु चक्षुर्वर्तते तद्रूपस्य ग्राहकं भवति। चक्षुषस्तेजस्त्वं रूपव्यञ्जकत्वलिङ्गेन सिद्ध्यति, यथा प्रदीपो रूपव्यञ्जकः सन् तैजसोऽस्ति।

**कारिका– इन्द्रियं नयनं वह्निः स्वर्णादिर्विषयो मतः।**

**अन्वयः-** इन्द्रियं, नयनम्, वह्निः, स्वर्णादिः, विषयः मतः।

**कारिकार्थः-** इन्द्रियम् = तेजसः इन्द्रियं, नयनं = चक्षुरिन्द्रियं (कृष्णताराग्रवर्ति) भवति। वह्निः = अग्निः, स्वर्णादिः = सुवर्णरजतादिः (तैजसद्रव्यं) च, विषयः = भोग्यपदार्थः, मतः = न्यायमते स्वीकृतोऽस्ति।

**मुक्तावली – अत्र यो विशेषस्तमाह- इन्द्रियमिति। ननु चक्षुषस्तैजसत्वे किं मानमिति चेत्, चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत्। प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादत्रदृष्टान्तेऽव्याप्तिवारणायप्रथमंपरकीयेति।घटादेःस्वीयरूपव्यञ्जकत्वाद् व्यभिचारवारणाय द्वितीयं परकीयेति। अथवा प्रभाया दृष्टान्तत्वसम्भवादाद्यं परकीयेति न देयम्। चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम्। विषयं दर्शयति- वह्निरिति।**

**व्याख्या**–"इन्द्रियमिति" प्रतीकमुपादाय चक्षुषः स्वरूपं निर्दिशति। चक्षुः (नयनं) तैजसं वर्तते। अत्र तैजसत्वसाधनाय हेतुः प्रोक्तः- "परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात्"। अस्यायमर्थः- चक्षुरन्येषां वस्तूनां स्पर्शादिप्रत्यक्षस्याजनकनम् अथ च रूपप्रत्यक्षस्य जनकं दृष्टम्। अत्र प्रदीपो दृष्टान्तरूपेण दत्तः। यथा प्रदीपोऽन्धकारे स्थितानां घटादीनां रूपं प्रकाशयति तथा चक्षुरपि रूपं प्रकाशयति अतः प्रदीपवच्चक्षुरपि तैजसमित्यर्थः।

अत्र हेतौ परकीय इति पदद्वयस्य सार्थकतां ग्रन्थकारो दर्शयति- १. प्रथमं परकीयपदम्- प्रदीपः स्वयं तैजसः सन् स्वकीयमुष्णस्पर्शमपि व्यञ्जयति। अतो यदि स्पर्शाव्यञ्जकत्वमात्रं हेतुः स्यात्, तर्हि प्रदीपेऽव्याप्तिः स्यात्। परकीयपददानेनायमर्थो भवति यत्- प्रदीपोऽन्येषां (घटादीनां) स्पर्शं न व्यञ्जयति, अतो लक्षणं समन्वेति। २. द्वितीयं परकीयपदम्- घटादयः पदार्थाः स्वकीयं रूपं व्यञ्जयन्ति, अतो रूपव्यञ्जकत्वमात्रोक्तौ घटादिषु अतिव्याप्तिः स्यादतो द्वितीयं परकीयेति विवक्षितम्।

अत्र परिष्कारान्तरं दर्शयति- यदि प्रभा (प्रकाशः) दृष्टान्तरूपेण स्वीक्रियते तर्हि प्रथमं 'परकीयपदं नावश्यकं यतः प्रभा स्वकीयस्पर्शं न व्यञ्जयति। अपि च चक्षुरिन्द्रियस्य विषयैः सह यः सन्निकर्षः (सम्बन्धः) भवति सोऽपि

रूपव्यञ्जकोऽस्ति अतस्तत्र व्यभिचारं वारयितुं द्रव्यत्वे सतीति विशेषणं देयम्। चक्षुर्द्रव्यं वर्तते सन्निकर्षस्तु गुणोऽतो लक्षणं चक्षुष्येव समन्वेति।

विषयं दर्शयति- वह्निरितीत्यनेन तेजसो विषयाणां वैविध्यं सूचितम्। तत्र वह्निः (अग्निः) सुवर्णादयश्च तेजसो विषयाः सन्ति।

**मुक्तावली– ननु सुवर्णस्य तैजसत्वे किं मानमिति चेन्न, सुवर्णं तैजसमसति प्रतिबन्धकेऽत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानजन्यद्रवत्वात्, यन्नैवं तन्नैवं, यथा पृथिवीति। न चाप्रयोजकं, पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य चाऽत्यन्ताग्निसंयोगनाश्यत्वात्। ननु पीतिमगुरुत्वाश्रयस्याऽपि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेन्न, जलमध्यस्थमसीक्षोदवत् तस्याद्रुतत्वात्।**

**व्याख्या–** ननु सुवर्णस्य तैजसत्वे किं मानम् ? सुवर्णं तु पीतं गुरु च दृश्यते अतः तत् पृथिवी किमर्थं न स्यात् ? अस्य समाधानं ग्रन्थकारो ददाति- सुवर्णं तैजसम्, असति प्रतिबन्धके अत्यन्तानलसंयोगेऽपि अनुच्छिद्यमानजन्यद्रवत्वादिति। अस्यायमर्थः- सुवर्णं तेजोऽस्ति, यतोऽत्यन्तं वह्निसंयोगे कृते सत्यप्यस्य जन्यं द्रवत्वं न नश्यति (अनुच्छिद्यमानं भवति)। अत्र व्याप्तिर्वर्तते- यस्य जन्यद्रवत्वं तीव्राग्निसंयोगेनापि न नश्यति तत् तेजो भवति। पृथिवीरुपघृतादीनां द्रवत्वं तु वह्निसंयोगेन नश्यति अतः पृथिवी सुवर्णं न भवितुं शक्नोति। अत्राप्रयोजकत्वशङ्कां वारयति- यदि सुवर्णं पृथिवी स्यात्, तर्हि घृतमधूच्छिष्टादिवदस्य द्रवत्वमप्यनलसंयोगेन नश्येत्। परन्तु नश्यति, अतः तत् पृथिवी द्रव्यं सिद्ध्यति।

अत्र कश्चन सूक्ष्मं शङ्कते- सुवर्णे पीतिमा तथा गुरुत्वं दृश्यते। तौ तु पृथिव्या गुणौ स्तः। यदा सुवर्णं द्राव्यते (द्रुतीक्रियते) तदा पीतिमगुरुत्वाश्रयो द्रुतः प्रतीयते। तर्हि पीतिमद्रव्यस्य (पृथिव्याः) द्रवत्वं कुतो न नश्यति ? अस्य समाधानं मुक्तावलीकारो जलमध्यस्थमसीक्षोदवदिति दृष्टान्तेन दर्शयति। यथा जलस्य मध्ये मसीचूर्णं स्थापितं चेज्जलस्य द्रवत्वाद् मस्यपि द्रुतेव भासते परन्तु वस्तुतो मसी न द्रवीभवति सा केवलं जलमध्यस्था वर्तते। तथैव सुवर्णे वस्तुतस्तत् तैजसं द्रव्यमेव द्रवीभवति पीतिमगुरुत्वाश्रयभूता पृथिवी तु तदन्तर्गतास्ति, सा तु न द्रवीभवति। तस्याः पृथिव्या द्रवत्वं तु तैलघृतादिवदनलसंयोगेन नष्टमेव, परं तैजसद्रवत्वसम्बन्धात् तस्यामपि द्रुतिभ्रमो जायते। इत्थं मुक्तावलीकारोऽनुच्छिद्यमानद्रवत्वलिङ्गेन सुवर्णस्य तैजसत्वं सर्वथा निर्बाधं प्रसाधितवान्।

**मुक्तावली– अपरे तु पीतिमाश्रयस्यात्यन्ताग्निसंयोगेऽपि पूर्वरूपापरावृत्तिदर्शनात् तत्प्रतिबन्धकं विजातीयद्रवद्रव्यं कल्प्यते। तथा हि- अत्यन्ताग्निसंयोगे पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपविजातीयरूपानधिकरणपार्थिवत्वाद्, जलमध्यस्थपीतपटवत्। तस्य च पृथिवीजलभिन्नस्य तेजस्त्वनियमात्।**

**व्याख्या–** अत्र मुक्तावलीकारः सुवर्णस्य तैजसत्वसाधनायान्येषामचार्याणां मतमुपस्थापयति। अस्मिन् मते विजातीयप्रतिबन्धकद्रव्यकल्पनेन सुवर्णस्य तैजसत्वं सिद्ध्यति। अत्रायं तर्कः- यदा पृथिव्याम् (यथा घटे वा घृतादौ) अत्यन्ताग्निसंयोगो भवति तदा तत्र पाको जायते येन पूर्वतनं रूपं नश्यति नूतनं चोत्पद्यते (पूर्वरूपपरावृत्तिः) परन्तु सुवर्णे विद्यमानस्य पीतिमगुरुत्वाश्रयस्य (पार्थिवभागस्य) अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपस्य (पीतवर्णस्य) परावृत्तिर्न दृश्यते। एतादृशी पूर्वरूपापरावृत्तिः कथं सम्भवा ? अत्र नैयायिकाः कल्पयन्ति यत् तत्र कोऽपि तादृशो विजातीयो द्रवपदार्थो वर्तते यः पीतिमश्रयस्य पार्थिवभागस्य रूपपरिवर्तनं प्रतिबध्नाति। अस्यायमर्थः- पार्थिवभागे अग्निसंयोगेन पाको भवेत् परन्तु तत्र स्थितं तैजसं सुवर्णद्रव्यं तं पाकं प्रतिबध्नाति।

अत्रानुमानप्रयोग इत्थं वर्तते- अत्यन्ताग्निसंयोगे पीतिमगुरुत्वाश्रयो विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः, अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपविजातीयरूपानधिकरणत्वाद्, जलमध्यस्थपीतपटवत्।

अर्थाद्यथा जलस्यान्तःस्थितस्य पीतवस्त्रस्य (पीतपटस्य) अग्निसंयोगे सत्यपि रूपपरिवर्तनं न भवति, यतो जलं तत्र प्रतिबन्धकं वर्तते तथैव सुवर्णे अपि पार्थिवभागस्य रूपपरिवर्तनं न जायते। अत्र कोऽपि जलपृथिवीभिन्नो द्रवपदार्थोऽवश्यं स्वीकार्यः। अतः परिशेषात् तस्य तेजस्त्वं सिद्ध्यति। पूर्वरूपापरावृत्तिलिङ्गेन सुवर्णस्यान्तः कश्चन तैजसो भागोऽस्तीति केचन समर्थयन्ति।

## *पदानामर्थपरिचयः*

**तेजस्त्वम्** = जन्योष्णस्पर्शसमवायिकारणतावच्छेदिका जातिः

**अभिभवः** = बलवता सजातीयेन विजातीयेन वा धर्मेण अन्यस्य धर्मस्य दमनम्

**भास्वरशुक्लरूपम्** = दीप्तिसहितं श्वेतं रूपम्

**क्षोदम्** = मषीचूर्णम्

**पीतिमा** = पीतरूपम्

**अनुच्छिद्यमानद्रवत्वम्** = तीव्राग्निसंयोगेनापि यस्य विनाशो न भवति तद् द्रवत्वम्

**प्रतिबन्धकम्** = कार्योत्पत्तौ विघ्नकारकं द्रव्यं शक्तिर्वा

**साक्षाद्व्याप्यजातिः** = द्रव्यत्वस्य अव्यवहित-न्यूनदेशवृत्तिजातिः (यथा तेजस्त्वम्)

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) तेजसः स्पर्शः कीदृशो भवति ?

(ख) चक्षुरिन्द्रियं तैजसं वर्तते वा न वा ?

(ग) चन्द्रकिरणेषु उष्णस्पर्शस्य ग्रहणं किमर्थं न जायते ?

(घ) सुवर्णं कस्य द्रव्यस्य प्रकारोऽस्ति ?

(ङ) तेजसः शरीरं कुत्र प्रसिद्धं वर्तते ?

(च) भास्वरशुक्ल' इति कस्य रूपम् ?

### २. व्याख्यानं कुरुत

(क) चन्द्रकिरणेषु उष्णस्पर्शस्य सत्त्वेऽपि किमर्थं न प्रतीयते ? व्याख्यायताम्।

(ख) यदि तेजसः रूपं पार्थिवरूपेण अभिभूतं भवति तर्हि अग्नेः प्रत्यक्षं कथं सम्भवति ? विवृणुत।

(ग) नैमित्तिकद्रवत्ववत्त्वं तेजसः लक्षणम् इत्यत्र घृतादावतिव्याप्तिः कथं वार्यते ? व्याख्यायताम्।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) चक्षुषस्तैजसत्वानुमाने समागतस्य पदद्वयस्य सार्थकतां प्रसाधयत।

(ख) सुवर्णं पार्थिवं न, अपि तु तैजसमस्ति। अत्र "अत्यन्ताग्निसंयोगेऽपि अनुच्छिद्यमान-द्रवत्वम्" इति हेतोर्महत्त्वं लिखत।

(ग) सुवर्णे पीतिमा गुरुत्वं च दृश्यते, तथापि तस्य तैजसत्वं कथं न व्याहन्यते ? विश्लेषयत।

## ४. परस्परं मेलयत

| | |
|---|---|
| चक्षुरिन्द्रियम् | अयोनिजं सूर्यलोके प्रसिद्धम् |
| सुवर्णम् रूपव्यञ्जकं तैजसं द्रव्यम् | |
| तैजसं शरीरम् | अनुद्भूत-स्पर्श-रूपम् |
| तेजःपरमाणुः | अनुच्छिद्यमानद्रवत्ववत् |
| चक्षुरादितेजः | नित्यं निरवयवम् |

## ५. पदच्छेदं कृत्वा अर्थं कुरूत

तदन्तःपातिजलस्पर्शेन, पीतिम गुरुत्वाश्रयस्य, विजातीयरूपप्रतिबन्धकद्रवद्रव्यम्।

## *परियोजनाकार्यम्-*

तेजसस्त्रिविधं विभागं तस्योदाहरणैः सह रचयत।

# वायुनिरूपणम्

क्रमप्राप्तं वायुस्वरूपं प्रतिपादयितुमारभते ग्रन्थकारः-

**कारिका –** **अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः ॥ ४२ ॥**

**तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ।**

**पूर्ववन्नित्यत्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ॥ ४३ ॥**

**अन्वयः-** पवने तु अपाकजः अनुष्णाशीतस्पर्शः मतः, एषः स्पर्शादिलिङ्गकः तिर्यग्गमनवान् ज्ञेयः, नित्यतादि पूर्ववत् उक्तम्, इन्द्रियं देहव्यापि ।

**कारिकार्थः-** पवने = वायुद्रव्ये, अपाकजः = पाकनिरपेक्षः, अनुष्णाशीतस्पर्शस्तु = न उष्णो न च शीतलः स्पर्शस्तु, मतः = कथितः । एषः = वायुः, तिर्यग्गमनवान् = तिर्यग्गमनक्रियावान्, स्पर्शालिलिङ्गकः = स्पर्शादिभिर्लिङ्गैः (अनुमानैः) ज्ञेयः = ज्ञातव्यो भवति । पूर्ववत् = जलादिवत्, नित्यताद्युक्तं = नित्यत्वानित्यत्वादिकं प्रोक्तम्, देहव्यापि = सर्वशरीरगतं, त्वगिन्द्रियम् = स्पर्शग्राहकम् (त्वक्) ।

**मुक्तावली– वायुं निरूपयति- अपाकज इति । अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वादुक्तमपाकज इति । अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीतेति । एतेन वायवीयो विजातीयः स्पर्शो दर्शितः, तज्जनकतावच्छेदकं वायुत्वमिति भावः । एषः- वायुः स्पर्शादिलिङ्गकः । वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते । विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कम्पनेन च वायोरनुमानात् । पूर्ववदिति । वायुर्द्विविधो नित्योऽनित्यश्च । परमाणुरूपो नित्यस्तदन्यो ऽनित्योऽवयवसमवेतश्च, सोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात् । यथा च वायुर्न प्रत्यक्षस्तथाऽग्रे वक्ष्यते ।**

**व्याख्या-** वायुं लक्षयति- "अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः" इत्यनेन । अत्र वायवीयस्पर्शस्य वैशिष्ट्यं प्रकटितम् । वायौ स्पर्शोऽनुष्णाशीतः (न उष्णो न वा शीतलः) भवति । यद्यपि तादृशः स्पर्शः पृथिव्यामपि वर्तते । अतोऽतिव्याप्तिं वारयितुमपाकज इति उक्तम् । पृथिव्यां स्पर्शः पाकजः (तेजःसंयोगजन्यः) भवति, वायौ तु न । पुनश्च

अपाकजस्पर्शस्तु जले तेजसि अपि वर्ततेऽतस्तद्व्यावृत्त्यर्थमनुष्णाशीत इति पदं दत्तम्। (जले शीतस्पर्शः, तेजसि च उष्णस्पर्शो भवति)। एवञ्च 'अपाकजानुष्णाशीतस्पर्शवत्त्वम्' वायोर्लक्षणम्।

अत्र वायोः प्रत्यक्षाभावात् तस्य साधकं प्रमाणं लिङ्गमाह- "एष ज्ञेयः स्पर्शादिलिङ्गकः" इति। वायुः चक्षुषा न दृश्यते परं चतुर्भिर्लिङ्गैरनुमीयते- १. स्पर्शेन- यदा विजातीयः (शीतल-उष्ण-भिन्नः) स्पर्शः शरीरे भवति तदा तस्याश्रयत्वेन वायोरनुमानं भवति। २. शब्देन- यदा मन्दं वा वेगेन वायुः प्रवहति तदा जायमानेन विलक्षणेन शब्देन वायोः सत्ता सिद्ध्यति। ३. धृत्या- आकाशे स्थितानां मेघानां पक्षिणां वा विधारणं वायुना एव सम्भवति। ४. कम्पनेन- वृक्षाणां शाखादीनां तृणानां च कम्पनेन तस्य प्रेरको वायुरनुमीयते।

वायोर्विभागं दर्शयति- "पूर्ववदिति"। पृथिवीजलतेजांसि इव वायुरपि द्विविधो नित्यः (परमाणुरूपः), अनित्यश्च (अवयविरूपः)। अनित्यो वायुः पुनस्त्रिविधः- शरीरेन्द्रियविषयभेदात्। वायोः शरीरमयोनिजमेव भवति यद् मरुल्लोके (वायुलोके) प्रसिद्धम्। वायोरिन्द्रियं त्वगिन्द्रियमस्ति। इदं चेन्द्रियं देहव्यापि (सर्वं शरीरं व्याप्य स्थितम्) अस्ति। त्वगिन्द्रियं वायुनिर्मितं भवति तत् स्पर्शस्य ग्राहकं भवति, स्पर्शश्च वायोर्विशेषगुणः। अन्ते ग्रन्थकारो विशेषं सूचयति यद्- "यथा च वायुर्न प्रत्यक्षस्तथाऽग्रे वक्ष्यते" इति। न्यायसिद्धान्तानुसारं महत्त्वे सत्युद्भूतरूपवत्त्वं चाक्षुषप्रत्यक्षे कारणम्। वायौ तु महत्त्वं वर्तते परं रूपं नास्ति अतः स चक्षुषा न दृश्यते। अस्य सविस्तरं खण्डनमण्डनमग्रे करिष्यते।

**मुक्तावली– तत्र शरीरमयोनिजं पिशाचादीनाम्, परन्तु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टम्भादुपभोगक्षमत्वम्, जलादीनां प्राधान्याज्जलीयत्वादिकमिति। अत्र यो विशेषस्तमाह- देहव्यापीति। शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक्, तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वाद् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत्॥**

**व्याख्या** – वायोः शरीरं निरूपयन् ग्रन्थकार आह- "तत्र शरीरमयोनिजं पिशाचादीनाम्" इति। वायोः शरीरमयोनिजं भवति यद् मरुल्लोके तथा पिशाचादीनां लोके प्रसिद्धं वर्तते। अत्र कश्चन प्रश्न उद्भवति यद्- यदि जलीयतैजसवायवीयशरीराणि केवलं जलादिभिरेव निर्मितानि सन्ति तर्हि तान्यस्माकं पार्थिवशरीरवद् दृढानि उपभोगक्षमाणि च कथं भवन्ति? तत्र समाधानं दत्तम्- पार्थिवभागोपष्टम्भादुपभोगक्षमत्वम्। अर्थाज्जलीयादिशरीरेषु अपि पृथिव्या अवयवा उपष्टम्भकरूपेण वर्तन्ते येन तेषु काठिन्यं स्थैर्यं च जायते, तस्मादेव तानि शरीराणि सुखदुःखभोगाय समर्थानि भवन्ति तथापि जलादीनां बहुत्वात् (प्राधान्यात्) तानि जलीयत्वादिव्यपदेशं लभन्ते।

इन्द्रियं वर्णयन् विशेषं कथयति- देहव्यापीति। वायोरिन्द्रियं त्वगस्ति यत् सम्पूर्णं शरीरं व्याप्य तिष्ठति। अस्य लक्षणं "शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक्" इति। अत्र त्वगिन्द्रियस्य वायवीयत्वं साधयितुमनुमानं प्रस्तौति- त्वक् वायवीयम्, रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वादङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत्।

अस्यायमर्थः– यथा व्यजनस्यवायुरङ्गे संलग्नानां जलबिन्दूनां शीतलतां (स्पर्शं) प्रकटयति परं रूपादिकं न प्रकाशयति तथैव त्वगिन्द्रियमपि केवलं स्पर्शस्यैव ग्राहकं भवति, अतस्तस्य वायवीयत्वं सिद्ध्यति। अत्र स्पर्शव्यञ्जकत्वं हेतुः। अत्र रूप-रस-गन्ध-शब्दव्यावृत्यर्थं रूपादिषु मध्य इति विशेषणं दत्तम्। चक्षुः रूपं प्रकाशयति रसनं रसं घ्राणं गन्धं परं त्वक् केवलं स्पर्शं प्रकाशयति, अतः प्रदीपवदिन्द्रियमपि सजातीयद्रव्येण निर्मितं मन्तव्यम्।

**कारिका- प्राणादि स्तु महावायुपर्यन्तो विषयो मतः।**

**अन्वयः-** प्राणादिः महावायुपर्यन्तः तु विषयः मतः।

**कारिकार्थः-** प्राणतो महावायुपर्यन्तम् सर्वे वायोर्विषया भवन्तीत्यर्थः।

**मुक्तावली – विषयं दर्शयति- प्राणादिरिति। यद्यप्यनित्यो वायुश्चतुर्विधस्तस्य चतुर्थी विधा प्राणादिरित्युक्तमाकरे तथाऽपि सङ्क्षेपादेव त्रैविध्यमुक्तम्। प्राणस्त्वेक एव हृदादिनानास्थानवशा न्मुखनिर्गमादिनानाक्रियाभेदाच्च नानासंज्ञां लभत इति॥**

**व्याख्या-** विषयं दर्शयति- प्राणादिरित्यनेन ग्रन्थकारो वायोरनित्यविभागं वितनोति। वैशेषिकसूत्रभाष्यादिषु 'आकरे' अर्थात् प्रशस्तपादभाष्यग्रन्थे अनित्यो वायुश्चतुर्विधः प्रोक्तः- शरीरम्, इन्द्रियम्, विषयः, प्राणश्चेति। **शरीरम्-** (अयोनिजं मरुल्लोके) २. **इन्द्रियम्-** (देहव्यापि त्वगिन्द्रियम्) ३. **विषयः-** (वृक्षादिकम्पकः प्रवाही वायुः) ४. **प्राणः-** (शरीरान्तः सञ्चारी वायुः) परन्तु मुक्तावल्यां सङ्क्षेपेण त्रैविध्यं दर्शितम्। अत्र तु प्राणस्य विषयेऽन्तर्भावो विवक्षितः।

प्राणस्य स्वरूपं वर्णयन्नाह- "प्राणस्त्वेक एव" इति। वस्तुतः प्राण एक एव वायुर्वर्तते परन्तु सः शरीरे कुत्र तिष्ठति किमर्थं च प्रयुज्यत इत्याधारेण भिन्नां भिन्नां संज्ञां लभते। अत्र द्वे कारणे स्तः-१. स्थानभेदात्- हृदये, गुदे, नाभौ, कण्ठे च स्थिताः वायवः पृथग् नाम्ना व्यपदिश्यन्ते। २. नानाक्रियाभेदात्- मुखनानासिकाभ्यां निर्गमन-प्रवेशनमलत्यागादिकाश्च याः क्रियाः सन्ति तासां भेदादपि प्राणो भिद्यते। यथा एक एव पुरुषः पुत्र-भ्रातृ-पिता-इत्यादिसम्बन्धभेदाद् नाना संज्ञां लभते तथैव एक एव प्राणवायुः क्रिया-स्थान-भेदात् पञ्चधा व्यवहारपथमवतरतीति भावः। वस्तुतस्त्वेक एव प्राणः। अत एवोच्यते–

**हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले। उदानकण्ठदेशे तु व्यानः सर्वशरीरगः॥**

अर्थात् स एव प्राणवायुर्यदा हृदये भवति तदा प्राणः, यदा गुदे मलत्यागादिक्रियां सम्पादयति तदा अपानः, यदा नाभौ आहारपचनं करोति तदा समानः, कण्ठे ऊर्ध्वगमनेन शब्दादिकं करोति चेदुदानः, तथा च सम्पूर्णे शरीरे व्याप्तः सन्

रससञ्चारं करोति चेद् व्यान इति उच्यते। एतावता मुक्तावलीकारो वायोः प्राणरूपं भेदं तस्य स्थानक्रियाविशेषैः सह स्पष्टीकृतवान्।

## *पदानामर्थपरिचयः*

| | | |
|---|---|---|
| **अपाकजत्वम्** | = | पाकरहितत्वम् |
| **अनुष्णाशीतत्वम्** | = | उष्णशीतलविलक्षणत्वम् |
| **स्पर्शादिलिङ्गकः** | = | यस्य ज्ञाने स्पर्शादयो हेतवो भवन्ति सः |
| **धृतिः** | = | विधारणम् |
| **देहव्यापित्वम्** | = | सम्पूर्णशरीरे व्याप्तत्वम् |
| **प्राणः** | = | शरीरान्तःसञ्चारी वायुः |
| **उपष्टम्भः** | = | सहायः |

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) वायोः स्पर्शः कीदृशो भवति ?

(ख) वायुः प्रत्यक्षोऽस्ति वानुमेयः ?

(ग) वायोरनुमाने कानि चत्वारि लिङ्गानि सन्ति ?

(घ) त्वगिन्द्रियं देहव्यापि वा एकदेशि ?

(ङ) प्राणाः स्थानभेदात् कतिधा भिद्यन्ते ?

(च) पिशाचानां शरीरं कीदृशं भवति ?

### २. व्याख्यात्मकमुत्तरं लिखत

(क) "अपाकजोऽनुष्णाशीतस्पर्शवान् वायुः" इति लक्षणे 'अपाकज' तथा 'अनुष्णाशीत' इति पदद्वयस्य सार्थकतां स्पष्टयत।

(ख) वायुश्चक्षुषा किमर्थं न दृश्यते ? "स्पर्श-शब्द-धृति-कम्पैः" वायोरनुमानं कथं जायते ? साधयत।

(ग) रूपाद्यव्यञ्जकत्वे सति स्पर्शव्यञ्जकत्वम्" इति हेतोः व्यजनपवन-दृष्टान्तेन विश्लेषणं कुरुत।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) "प्राणस्त्वेक एव" इति उक्तेऽपि प्राण-अपान-समान-उदान-व्यान इति पञ्च भेदाः कथं सङ्गच्छन्ते ? विवृणुत।

(ख) जलीयतैजसवायवीयशरीराणि 'पार्थिवभागोपष्टम्भात्' कथम् उपभोगक्षमाणि भवन्ति ? तत्र मुक्तावलीकारमतं स्पष्टयत।

(ग) नैयायिकमते प्रत्यक्षं प्रति 'उद्भूतरूपवत्त्वं' कारणम्, अस्मिन् सन्दर्भे वायोरप्रत्यक्षत्वं कया युक्त्या प्रसाधितम् ? विवृणुत।

४. **परस्परं मेलयत**

| | |
|---|---|
| समानवायुः | कण्ठदेशः (ऊर्ध्वगमनम्) |
| उदानवायुः | नाभिमण्डलम् (पचनक्रिया) |
| व्यानवायुः | गुदस्थानम् (मलत्यागः) |
| अपानवायुः | सर्वशरीरगः (रससञ्चारः) |
| त्वगिन्द्रियम् | देहव्यापि स्पर्शग्राहकम् |

६. **सन्धियुक्तवाक्यानां पदच्छेदं कुरुत**

अपाकजोऽनुष्णाशीतस्पर्शः, प्राणवायावेव, पार्थिवभागोपष्टम्भात्, "।

७. **यदि वायुः प्रत्यक्षःस्यात्, तर्हि तस्य रूपवत्त्वमपि अङ्गीकरणीयं भवेद् वा न वा ? मुक्तावल्युक्तरीत्या विमृशत।**

*परियोजनाकार्यम्-*

अनित्यवायोश्चतुर्विधविभागं तस्योदाहरणैः सह सुन्दरतया रचयत।

पञ्चदशः पाठः

# आकाशनिरूपणम्

क्रमप्राप्तमाकाशस्वरूपं प्रतिपादयितुमारभते ग्रन्थकारः-

**कारिका - आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ॥ ४४ ॥**

**अन्वयः-** आकाशस्य तु शब्दः वैशेषिकः गुणः विज्ञेयः ।

**कारिकार्थः-** आकाशस्य तु = आकाशद्रव्यस्य तु, शब्दः = शब्दगुणः, वैशेषिको गुणः = असाधारणगुणः, विज्ञेयः = ज्ञातव्यः ।

**मुक्तावली– आकाशं निरूपयति- आकाशस्येति । आकाशकालदिशामेकैकव्यक्तित्वादाकाशत्वादिकं न जातिः किन्तु आकाशत्वं शब्दाश्रयत्वम् । वैशेषिक इति कथनं तु विशेषगुणान्तरव्यवच्छेदाय । एतेन प्रमाणमपि दर्शितम् । तथाहि- शब्दो गुणः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात् स्पर्शवत् । शब्दो द्रव्यसमवेतः गुणत्वात् संयोगवदित्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे सिद्धे शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वाद् सुखवत् । पाकजरूपादौ व्यभिचारवारणाय सत्यन्तम् । पटरूपादौ व्यभिचारवारणायाऽकारण गुणपूर्वकेति । जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति । शब्दो न दिक्कालमनसां गुणो विशेषगुणत्वाद् रूपवत् । नाऽत्मविशेषगुणो बहिरिन्द्रिययोग्यत्वाद् रूपवत् । इत्थञ्च शब्दाधिकरणं नवमं द्रव्यं गगनात्मकं सिद्ध्यति । न च वाय्ववयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द उत्पद्यतामिति वाच्यम् । अयावद्द्रव्यभावित्वेन वायोर्विशेषगुणत्वाभावात् ॥**

**व्याख्या-** ग्रन्थकार आकाशस्य स्वरूपं तस्य साधकं प्रमाणं च न्यायसरण्या उपस्थापयति। आकाशस्येति पदेन आकाशस्य विशेषगुणः शब्द इति सूचितम्। अत्र मुख्यो विचार आकाशत्वस्य जातित्वविमर्शः। न्यायमते आकाशत्वं जातिर्नास्ति यत आकाश एक एव पदार्थः। जातिस्तु अनेकव्यक्तिषु समवेता भवति। अत आकाशकालदिशामेकैकव्यक्तित्त्वादाकाशत्वादिकं न जातिरिति सिद्धान्तितम्। तस्माद् आकाशत्वं शब्दाश्रयत्वम्।

कारिकायां वैशेषिक इति पदं प्रयुक्तम्, तस्य प्रयोजनं त्वाकाशे विद्यमानानां सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागादीनां सामान्यानां गुणानां व्यावर्तनं कृत्वा शब्दस्य विशेषगुणत्वं ज्ञापयितुमस्ति। एतेन लक्षणेनैवाकाशस्यास्तित्वसाधकं प्रमाणमपि फलितं भवति। तत्र शब्दस्य गुणत्वं प्रथमं साध्यते- शब्दो गुणश्चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्

वात् स्पर्शवद्। यो गुणो भवति सोऽवश्यं कञ्चन आश्रयम् (द्रव्यं) अपेक्षते, यथा संयोगः। अतः शब्दो द्रव्यसमवेत इति सिद्ध्यति।

अधुना परिशेषानुमानेन शब्दाधारत्वेनान्येषां द्रव्याणां निषेधः क्रियते। शब्दः पार्थिवादिचतुष्टयस्य विशेषगुणो न भवति यतः पार्थिवगुणाः पाकजाः (अग्निसंयोगजन्याः) भवन्ति, अन्येषां च गुणा अकारणगुणपूर्वका न भवन्ति। अत्र अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वादिति हेतुः परिष्कृतः। पुनः शब्दो दिक्-काल-मनसां विशेषगुणो न भवति, यतस्तेषां विशेषगुणा न सन्ति। स च आत्मनोपि गुणो न, यतो हि आत्मगुणाः केवलं मानसप्रत्यक्षयोग्या भवन्ति शब्दस्तु बाह्यश्रोत्रेन्द्रियग्राह्यः। इत्थं पृथिव्यादि-अष्टद्रव्याणां निषेधे सति यः परिशेषात् शब्दाधिकरणतया नवमः पदार्थः सिद्ध्यति स एव आकाश इति गगनात्मकद्रव्यरूपेण प्रतिष्ठापितो भवति।

अत्र पूर्वपक्षी तर्कयति यत् शब्दो वायोर्विशेषगुणः किमर्थं न स्यात् ? यथा पार्थिवपरमाणुषु विद्यमानेन रूपेण द्व्यणुकादिरूपमुत्पद्यते तथैव वाय्ववयवेषु (वायुपरमाणुषु) विद्यमानेन सूक्ष्मशब्देन कारणगुणपूर्वकः शब्दो महावायौ उत्पद्यताम्। एतेन शब्दस्याश्रयतया आकाशसिद्धिर्न भविष्यति।

अस्य समाधानं ग्रन्थकारोऽयावद्द्रव्यभावित्वहेतुना करोति। स आह- अयावद्द्रव्यभावित्वेन वायोर्विशेषगुणत्वाभावाद्। न्यायसिद्धान्ते पृथिवीजलतेजोवायूनां ये विशेषगुणा भवन्ति ते यावद्द्रव्यभाविनो भवन्ति। अर्थाद् यावद् द्रव्यं तिष्ठति तावत् ते गुणा अपि तिष्ठन्ति (यथा जलस्य शीतत्वं वायोः स्पर्शो वा) परन्तु शब्दस्तु तादृशो नास्ति। शब्दः क्षणभङ्गुरोऽस्ति, स वायोः सत्त्वेऽपि विनश्यति। अतः शब्दस्यायावद्द्रव्यभावित्वात् स वायोर्विशेषगुणो भवितुं नार्हति। इत्थं शब्दस्य वायवीयगुणत्वनिषेधेन परिशेषात् तस्याश्रयरूपेण 'आकाश एव सिद्ध्यति। मूर्तद्रव्याणां विशेषगुणाः स्वकीयाश्रयविनाशमेव विनाशकत्वेनापेक्षन्ते। शब्दस्तु स्वकीयाश्रये (आकाशे) विद्यमाने सत्यपि विनश्यति तस्मादेव तस्य मूर्तगुणत्वं वारितम्।

**कारिका- इन्द्रियं तु भवेच्छ्रोत्रमेकस्सन्नप्युपाधितः।**

**अन्वयः -** इन्द्रियं तु श्रोत्रं भवेद्, एकः सन्नपि उपाधितः (नाना इव भासते)॥

**कारिकार्थः-** इन्द्रियं तु = आकाशस्य इन्द्रियं तु, श्रोत्रम् = श्रोत्रेन्द्रियं, एकः सन्नपि = आकाशः एक एव भूत्वापि, उपाधितः = कर्णशष्कुलीरूपोपाधिवशाद् (नाना भवति) इत्यर्थः।

**मुक्तावली- तत्र च शरीरस्य विषयस्य चाभावादिन्द्रियं दर्शयति- इन्द्रियमिति। नन्वाकाशं लाघवादेकं सिद्धं श्रोत्रं पुनः पुरुषभेदाद्भिन्नं कथमाकाशं स्यादिति चेत्तत्राऽह- एक इति। आकाश एकः सन्नपि उपाधेः कर्णशष्कुल्या भेदाद्भिन्नं श्रोत्रात्मकं भवतीत्यर्थः॥**

**व्याख्या-** ननु आकाशं तावल्लाघवाद् एकं सिद्धं वर्तते परं लोके तु श्रोत्रं पुरुषभेदाद् भिन्नं प्रतीयते। कश्चन बधिरः, कश्चन तु श्रवणवान्। यदि श्रोत्रम् आकाशमेव स्यात् तर्हि एकस्याकाशस्य बधिरत्वे सर्वेषामपि बाधिर्यं प्रसज्येतातो विरुद्धमिदं प्रतिभाति। अस्य समाधानार्थं ग्रन्थकार एक इति प्रतीकमुपादायोपाधिसिद्धान्तं वर्णयति- आकाशो वस्तुत एकः सन् अपि कर्णशष्कुल्या भेदाद् भिन्न इव प्रतिभासते। अत्र कर्णशष्कुली एवोपाधिरस्ति। यथा एक एव महाकाशो घट-मठ-आद्युपाधिवशाद् घटाकाशो मठाकाश इत्यादिना नानात्वं भजते तथैवाकाशमपि कर्णविवरावच्छेदेन भिन्नं भिन्नं श्रोत्रात्मकं भवति। अनेनैवोपाधिभेदेन प्रतिपुरुषं श्रोत्रव्यवस्था सिद्ध्यति। यस्य पुरुषस्य कर्णशष्कुल्यवच्छिन्नम् आकाशं (श्रोत्रम्) धर्माधर्मवशाद् दोषयुक्तं भवति स एव बधिर उच्यते। यस्य तु तादृशं नभो दोषरहितं सः शृणोति। एवं चाकाशस्य एकत्वेऽपि श्रोत्रस्य नानात्वं कर्णशष्कुलीरूपोपाधिसम्बन्धात् सिद्ध्यति।

## *पदानामर्थपरिचयः*

| | | |
|---|---|---|
| **शब्दाश्रयत्वम्** | = | शब्दसमवायिकारणत्वम् |
| **द्रव्यसमवेतः** | = | द्रव्ये समवायसम्बन्धेन विद्यमानः |
| **अखण्डोपाधिः** | = | अखण्डपदार्थे विद्यमानो धर्मः |
| **परिशेषः** | = | प्रसक्तप्रतिषेधे अन्यत्र अप्रसङ्गात् शिष्यमाणे सम्प्रत्ययः |
| **अयावद्द्रव्यभावित्वम्** | = | यावद्द्रव्ये अविद्यमानत्वम् |
| **कर्णशष्कुली** | = | श्रोत्रेन्द्रियस्य आधारभूता कर्णशष्कुलिका |
| **वैशेषिकगुणः** | = | विशेषगुणः |

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) आकाशस्य विशेषगुणः कः ?

(ख) आकाशत्वं जातिरस्ति वा उपाधिः ?

(ग) शब्दाधारतया कतमं द्रव्यं सिद्ध्यति ?

(घ) श्रोत्रेन्द्रियं पुरुषभेदाद् भिन्नं कथं जायते ?

(ङ) शब्दो वायोर्विशेषगुणः किमर्थं न भवति ?

(च) चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमान् पदार्थः कः ?

### २. व्याख्यात्मकमुत्तरं लिखत

(क) "आकाशत्वं न जातिः" इति मुक्तावलीकारस्य आशयः कः ? स्पष्टं कुरुत।

(ख) शब्दः गुणोऽस्ति-अत्र "चक्षुर्ग्रहणायोग्यत्वे सति बहिरिन्द्रियग्राह्यत्वम्" इति हेतोः स्पर्शदृष्टान्तेन विश्लेषणं कुरुत।

(ग) आकाश एकस्तथापि कश्चन बधिरः कश्चन चाबधिर इति भेदः कथं सङ्गच्छते ? तत्रकर्णशष्कुली रूपोपाधेर्भूमिकां विवृणुत।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) शब्दः पृथिव्यादि-चतुष्टयस्य, दिक्-काल-मनसाम्, आत्मनश्च गुणः किमर्थं न भवति ? साधयत ।

(ख) वायुपरमाणुषु विद्यमानेन शब्देन महावायौ शब्दस्य उत्पत्तिः किमर्थं न स्वीक्रियते ? मूर्तद्रव्याणां विशेषगुणानां शब्दस्य च स्वभावगतं भेदं स्पष्टयत।

(ग) "अग्निसंयोगासमवायिकारणकत्वाभावे सत्यकारणगुणपूर्वकप्रत्यक्षत्वाद्" इति हेतोर्वैशिष्ट्यं शब्दसन्दर्भे विवृणुत।

४. **परस्परं मेलयत**

| | |
|---|---|
| शब्दः | कर्णशष्कुल्यवच्छिन्नं नभः |
| आकाशत्वम् | अयावद्द्रव्यभावी क्षणिकगुणः |
| श्रोत्रेन्द्रियम् | शब्दाश्रयत्वम् |
| वायुः | मूर्तद्रव्यं स्पर्शवत् |
| दिक्काल-मनांसि | विशेषगुणरहितद्रव्याणि |

५. **पदच्छेदं कुरुत**

आकाशत्वादिकन्न जातिः, शब्दाधिकरणन्नवमन्द्रव्यम्, एकःसन्नप्युपाधितः, वायोर्विशेषगुणत्वाभावात्।

६. **यदि शब्द आत्मनो विशेषगुणस्तर्हि तस्य श्रवणं बहिः श्रोत्रेणाभविष्यद् वा ? मुक्तावल्युक्तरीत्या उत्तरं लिखत।**

## *परियोजनाकार्यम्-*

शब्दस्याधारत्वेन अष्टद्रव्याणां निषेधप्रक्रियां (परिशेषानुमानं) क्रमेण रचयत।

# कालनिरूपणम्

क्रमप्राप्तं कालस्वरूपं प्रतिपादयितुमारभते ग्रन्थकारः-

**कारिका-** **जन्यानां जनकः कालो जगतामाश्रयो मतः ॥ ४५ ॥**

**परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः ।**

**अन्वयः-** कालः जन्यानां जनकः, जगतां आश्रयः मतः । परापरत्वधीहेतुः, उपाधितः क्षणादिः स्यात् ।

**कारिकार्थः-** कालः = कालपदार्थः, जन्यानां = उत्पत्तिमत्पदार्थानाम्, जनकः = साधारणकारणम्, जगताम् = विश्वस्य, आश्रयः = आधारः, मतः = स्वीकृतः । परापरत्वधीहेतुः = परत्वापरत्वादिबुद्धीनां कारणं भवति । स च उपाधितः = उपाधिवशात्, क्षणादिः = क्षणलवकाष्ठादिव्यवहारभाग् स्यात् = भवति ।

**मुक्तावली- कालं निरूपयति- जन्यानामिति । इति कालनिरूपणे काललक्षणकथनम् । तत्र प्रमाणं दर्शयितुमाह- जगतामाश्रय इति । तथा हि- इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पन्दादिकं यदा विषयीकरोति तदा सूर्यपरिस्पन्दादिना घटादेः सम्बन्धघटकः कल्प्यते । इत्थं च तदाश्रयत्वमपि सम्यक् । प्रमाणान्तरं दर्शयति- परापरत्वेति । परत्वापरत्वादिबुद्धेरसाधारणं निमित्तं काल एव, परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः कालः कल्प्यत इति भावः ॥**

**व्याख्या-** ग्रन्थकारः कालस्यासाधारणं स्वरूपं तस्य निमित्तकारणत्वं च प्रदर्शयति । जन्यानां जनक इति कथनेन कालस्य साधारणकारणत्वं सूचितम् । न्यायसिद्धान्ते अष्टौ साधारणकारणानि सन्ति तेषु कालोऽन्यतमः । यत् किमपि कार्यम् (जन्यं द्रव्यम्) उत्पद्यते, तत् कालसापेक्षमेव भवति । विना कालमुत्पत्तेः सम्भावनैव नास्ति अतः कालः सर्वेषां कार्याणां साधारणकारणत्वेन स्वीकृतः ।

अत्र कालस्य सत्त्वे प्रमाणं दर्शयति- जगतामाश्रय इति । लोके इदानीं घट इति या प्रतीतिर्जायते सा एव कालस्यास्तित्वे मुख्यं प्रमाणम् । अत्र सूक्ष्मो विचारो वर्तते- घटः पृथिव्यां वर्तते सूर्यपरिस्पन्दः (सूर्यस्य गतिः) तु आकाशे वर्तते । यदा वयं इदानीं घट इति वदामस्तदा वस्तुतः सूर्यपरिस्पन्देन सह घटस्य सम्बन्धं प्रकाशयामः, परन्तु घटसूर्यपरिस्पन्दयोः साक्षात् सम्बन्धो न सम्भवति अतस्तयोः सम्बन्धघटकत्वेन कश्चन विभुपदार्थोऽवश्यं कल्पनीयः, स एव कालः ।

अनेन प्रकारेण कालस्याश्रयत्वमपि सिद्ध्यति। सर्वे जन्यपदार्थाः कालिकाधारतासम्बन्धेन काले एव तिष्ठन्ति। अतः कालो जगतामाश्रयोऽस्ति। यद्यपि विभुत्वादाकाशोऽपि व्यापकस्तथापि इदानीं घट इति प्रतीत्या कालस्यैवाधारत्वं विशेषतः प्रसाधितं भवति। एवं च सूर्यपरिस्पन्दघटयोः सम्बन्धनिर्वाहकतया सिद्धः कालो विभुः, नित्यः, एकश्चेति।

ग्रन्थकारः कालस्यास्तित्वं प्रसाधयितुं ज्येष्ठकनिष्ठादिव्यवहारस्याधारं वर्णयति। लोके परत्वापरत्वबुद्धेः (ज्येष्ठत्व-कनिष्ठत्व-ज्ञानस्य) असाधारणं निमित्तकारणं काल एव वर्तते। यदा वयं कञ्चन पुरुषं परः (ज्येष्ठः) इति मन्यामहे तदा तस्य शरीरे परत्वनामको गुणः स्वीकर्तव्यः। तस्य च गुणस्योत्पत्तौ असमवायिकारणं कश्चन संयोगोऽपेक्षते।

अयं विचार इत्थं परिष्क्रियते- परत्वापरत्वयोरुत्पत्तौ सूर्यपरिस्पन्दस्य (सूर्यावर्तनानां) सम्बन्धो मुख्योऽस्ति। यस्य शरीरेऽधिकः सूर्यपरिस्पन्दसम्बन्धः स ज्येष्ठः। यस्य च न्यूनः सः कनिष्ठः। परन्तु सूर्यपरिस्पन्दः (य आकाशे वर्तते) तथा पुरुषस्य शरीरं (यत् पृथिव्यां वर्तते) तयोः साक्षात् संयोगो न सम्भवति। अतस्तयोः सम्बन्धघटकत्वेन कश्चन विभपदार्थोऽवश्यं कल्पनीयो यस्य शरीरेण सहापि संयोगः स्यात् तथा सूर्यपरिस्पन्देन सहापि।

अयं संयोगस्याश्रयः कः भवेत्? न तावदाकाशः, यतो हि आकाशस्य विशेषगुणः शब्दोऽस्ति, तस्य च परत्वापरत्व-हेतुत्वे गौरवं स्यात्। दिगादिषु अपि एतादृशव्यापारस्याभावोऽस्ति। अतो लाघवाद् अष्टद्रव्येभ्योऽ तिरिक्तः काल एव सम्बन्धघटको विभुपदार्थ इति कल्प्यते। इत्थं परत्वापरत्वगुणानां जनकसंयोगस्याश्रयत्वेन कालस्य द्रव्यत्वं नित्यत्वं च प्रसाधितं भवति। एवञ्च 'इदानीं घटः' इति प्रतीत्या तथा परत्वापरत्वबुद्ध्या कालस्य सत्ता निर्बाधं सिद्ध्यति।

**मुक्तावली- नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यादित्यत आह- क्षणादिः स्यादुपाधित इति। कालस्त्वेकोऽप्युपाधिभेदात् क्षणादिव्यवहारविषयः। उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म, पूर्वसंयोगनाशावच्छिन्नविभागो वा, पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा उत्तरसंयोगावच्छिन्नं कर्म वा। न चोत्तरसंयोगानन्तरं क्षणव्यवहारो न स्यादिति वाच्यम्। कर्मान्तरस्याऽपि सत्त्वादिति। महाप्रलये क्षणादिव्यवहारो यद्यस्ति तदा ध्वंसेनैवोपपादनीय इति। दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरिति।**

**व्याख्या-** ननु कालस्तावल्लाघवाद् एक एव सिद्धस्तर्हि लोके अयं क्षणः, अयं मासः, इदं वर्षम् इति समयभेदव्यवहारः कथं सङ्गच्छते? यदि काल एकस्तर्हि सः सर्वदा एकरूप एव स्यात्। अस्य समाधानार्थं ग्रन्थकारः क्षणादिः स्यादुपाधित इति कथयति। वस्तुतः काल एक एव परन्तु स उपाधिभेदाद् नानाव्यवहारविषयो भवति। अत्रोपाधिर्विशेषतो विवेचनीयः। अत्र स्वजन्यविभागप्रागभावावच्छिन्नं कर्म अर्थाद् यस्मिन् कर्मणि (क्रियायाम्) स्वजन्यविभागस्य प्रागभावो वर्तते तदवच्छिन्नः काल उपाधि । अथवा "पूर्वसंयोगनाशावच्छिन्नविभागः" इति वा वक्तुं शक्यते। यदा एकस्मिन् कर्मणि पूर्वसंयोगस्य नाशो भवति तावत्पर्यन्तं विद्यमानः कालः।

अत्र शङ्का भवति यद्- यदि पूर्वसंयोगनाशानन्तरमुत्तरसंयोगो जातस्तर्हि ततः परं क्षणव्यवहारः कथं स्यात् ? तत्राह- कर्मान्तरस्यापि सत्त्वात्। संसारे क्रियाणामविच्छिन्नप्रवाहो वर्तते अत एकस्मिन् कर्मणि समाप्तेऽपि अन्यकर्मणा क्षणव्यवहारः प्रवर्तते। यदि महाप्रलये (यदा किमपि कर्म न जायते) क्षणव्यवहारोऽङ्गीक्रियते तर्हि सः पदार्थानां ध्वंसेनैवोपपादनीयः। यतो हि तदानीं कर्मणामभावो भवति। एवमेव दिनादिव्यवहारः (दिवस-पक्ष-मासादयः) तु तत्तत्क्षणकूटैः (समूहैः) भवति। बहूनां क्षणानां समूहेन दिवसः, दिवसानां समूहेन च मासादयः सिद्ध्यन्ति। इत्थं मुक्तावलीकारः कालस्य वस्तुत एकत्वं तथा व्यावहारिकं नानात्वं चोपाधिभेदपुरःसरं प्रतिष्ठापयति।

## *पदानामर्थपरिचयः*

**साधारणकारणत्वम्** = कार्यत्वसामान्यधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वम्

**परत्वापरत्वे** = ज्येष्ठत्वकनिष्ठत्वव्यवहारहेतुभूतौ गुणौ

**सम्बन्धघटकत्वम्** = द्वयोरसम्बद्धपदार्थयोः सम्बन्धनिर्वाहकत्वम्

**सूर्यपरिस्पन्दः** = सूर्यस्य क्रिया

**लाघवम्** = लघुता

**उपाधिः** = अन्यस्मिन् स्वधर्मारोपकं वस्तु

**क्षणकूटः** = क्षणानां समूहः

**महाप्रलयः** = सर्वान्तिमो नाशः

# अभ्यासः

## १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) कालः कतिविधानां कार्याणां (जन्यानां) जनकोऽस्ति ?

(ख) "इदानीं घटः" इति प्रतीत्या कस्य पदार्थस्य सिद्धिर्भवति ?

(ग) ज्येष्ठकनिष्ठव्यवहारस्यासाधारणं कारणं किम् ?

(घ) सूर्यपरिस्पन्दः कुत्र वर्तते ?

(ङ) कालो वस्तुत एकोऽस्ति वा नाना ?

(च) कया युक्त्या कालो नाना इव प्रतीयते ?

(छ) 'क्षणः' इति व्यवहारस्य उपाधिः कः ?

(ज) महाप्रलये क्षणव्यवहारः कस्य आधारेण भवति ?

## २ व्याख्यात्मकमुत्तरं लिखत

(क) "जन्यानां जनकः कालः" इति कथनेन कालस्य विश्वव्यापकं निमित्तकारणत्वं च कथं सिद्ध्यति ? स्पष्टयत ।

(ख) सूर्यपरिस्पन्द आकाशे वर्तते, घटश्च पृथिव्याम्' तयोः साक्षात् सम्बन्धाभावे "इदानीं घटः" इति प्रतीतिः कथं सङ्गच्छते ? तत्र कालस्य सम्बन्धघटकत्वं विवृणुत ।

(ग) ज्येष्ठत्वं तथा कनिष्ठत्वं प्रति कालः कथमसाधारणं निमित्तं भवति ? सूर्यपरिस्पन्दबाहुल्याल्पत्वयो भूमिकां स्पष्टयत ।

## ३. विवेचनात्मकमुत्तरं लिखत

(क) "जगतामाश्रयो मतः" इति पङ्क्तेराशयः कः ? सर्वे पदार्थाः काले कथं तिष्ठन्ति ? आकाशकालयोराधारत्वे को भेदः ? सम्यक् दर्शयत ।

(ख) परत्वापरत्वयोरसमवायिकारणसंयोगस्याश्रयत्वेन आकाशं विहाय 'अतिरिक्त-कालः' किमर्थं कल्प्यते ? लाघव-गौरव-दृष्ट्या कालस्य स्वतन्त्रद्रव्यत्वं साधयत।

(ग) कालो वस्तुत एक एव, तथापि क्षणदिनमासवर्षादिव्यवहारः कथं जायते ? सूर्यपरिस्पन्दरूपोपाधेः प्रभावं विमृश्य लिखत।

## ४. परस्परं मेलयत

| | |
|---|---|
| कालः | कालः |
| साधारणकारणम् | जगताम् आधारः |
| परत्वापरत्वे | सर्वान्तिमो नाशः |
| महाप्रलयः | क्षण-दिन-मास-वर्षा: |
| उपाधय: | उपाधिकृते |

## ५. पदच्छेदं कुरुत

कालस्त्वेकोप्युपाधिभेदात्, परत्वापरत्वधीहेतुः, सूर्यावर्तनानाम्, निमित्तकारणङ्कालः।

## ६. यदि कालोऽविभुः स्यात् तर्हि स जगतामाश्रयो भवितुं शक्नोति स्म वा ? मुक्तावल्युक्तरीत्योत्तरं लिखत।

# दिङ्निरूपणम्

क्रमप्राप्तं दिक्स्वरूपं प्रतिपादयितुमारभते ग्रन्थकारः-

कारिका- दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ॥ ४६ ॥
उपाधिभेदादेकाऽपि प्राच्यादिव्यपदेशभाक् ।

**अन्वयः -** एका नित्या दिक् दूरान्तिकादिधीहेतुः उच्यते, एकापि उपाधिभेदात् प्राच्यादिव्यपदेशभाक् ।

**कारिकार्थः-** एका = एका एव, नित्या = विनाशरहिता, दिग् = दिशा, दूरान्तिकादिधीहेतुः = दूर-अन्तिक-प्राच्यादिबुद्धेः निमित्तं, उच्यते = कथ्यते ।

**मुक्तावली- दिशं निरूपयति- दूरान्तिकेति। दूरत्वमन्तिकत्वं च दैशिकं परत्वमपरत्वं बोध्यम्। तद्बुद्धेरसाधारणं बीजं दिगेव। दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया लाघवादेका दिक् सिद्ध्यतीति भावः । ननु यद्येकैव दिक् तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यत इत्यत आह- उपाधिभेदादिति। यत्पुरुषस्योदयगिरिसन्निहिता या दिक् सा तत्पुरुषस्य प्राची, एवमुदयगिरिव्यवहिता या दिक् सा प्रतीची। एवं यत्पुरुषस्य सुमेरुसन्निहिता या दिक् सोदीची, तद्व्यवहिता त्ववाची। सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित इति नियमात्।**

**व्याख्या-** ननु यदि दिग् वस्तुतएकैवसिद्धा तर्हि लोके प्राचीप्रतीची, उदीची, अवाची इत्यादयो विविधा व्यवहाराः कथं जायन्ते ? एकस्मिन् वस्तुनि परस्परविरुद्धाः संज्ञा न सङ्गच्छन्ते। अस्य समाधानार्थं ग्रन्थकार उपाधिभेदाद् इति सिद्धान्तं प्रस्तौति। यथा एक एव कालः क्षणाद्युपाधिभिर्भिन्नः प्रतीयते तथैव एकापि दिग् उदयगिरिसुमेरु-आदि-उपाधिभिर्नाना व्यवहारविषया भवति।

अत्र प्राचीलक्षणं वर्णयन् आह- यत्पुरुषस्य उदयगिरिसन्निहिता दिक् सा प्राची। अर्थात् कश्चित् पुरुषो यत्र तिष्ठति तस्मात् स्थानादुदयकालिकादित्यसंयोगविशिष्टोदयगिरिसम्बद्धा या दिक् सा तस्य कृते 'प्राची' उच्यते। अस्य विपरीतम् उदयगिरिव्यवहिता या दिक् सा प्रतीचीति। अत्र सन्निधानं व्यवधानं च पुरुषसापेक्षं भवति अतस्तत्र दिशः औपाधिकत्वं सिद्ध्यति।

एवमेवोत्तरदक्षिणदिशोर्व्यवस्थां प्रदर्शयति- यत्पुरुषस्य सुमेरुसन्निहिता या दिक् सा उदीची।

पौराणिकभौगोलिकमर्यादानुसारं सुमेरुः सर्वेषां मनुष्याणामुत्तरस्यां दिशि स्थितः। अतः सुमेरुसंयोगिनी दिक् उदीची , तद्व्यवहिता चावाचीति कथ्यते। अत्र ग्रन्थकारः प्रमाणमुद्धरति- सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित इति। अर्थाद् जम्बुद्वीपादिषु सर्वेषु भूभागेषु सुमेरुरुत्तरदिश्येव वर्तत इति शास्त्रवचनम्। इत्थं मुक्तावलीकारो दिशः पारमार्थिकमेकत्वं नित्यत्वं च प्रसाध्य उदयगिरि-सुमेरु-आदि-संयोगरूपोपाधिभिस्तस्या व्यावहारिकं नानात्वं सुव्यवस्थितं व्याचष्टे।

## *पदानामर्थपरिचयः*

**दैशिकपरत्वापरत्वे** = दिक्-कृतं दूरत्वं समीपत्वं च

**असमवायिकारणसंयोगः** = दिशः शरीरेण सह यः संयोगः परत्वापरत्वगुणयोरुत्पत्तौ कारणं भवति

**उपाधिभेदः** = उदयगिरि-सुमेरु-आदि-पदार्थानां संयोगः, येन एका दिक् नाना व्यवहारविषया जायते

**उदयगिरिः** = सः काल्पनिकः पर्वतः यस्मात् सूर्यस्य उदयः भवति (प्राची-व्यवहार-नियामकः)

**सुमेरुः** = पौराणिक-भूगोलानुसारं स मध्यवर्ती पर्वतः, य सर्वेषां उत्तरदिशि व्यवस्थितः

**सन्निहितव्यवहितज्ञानम्** = संयोगाल्पीयस्त्वबहुत्वज्ञानम् (समीपत्वं दूरत्वं च)

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) दैशिकपरत्वापरत्वबुद्धेरसाधारणं कारणं किम् ?

(ख) दिक् एका अस्ति वा नाना ?

(ग) प्राचीप्रतीच्यादिव्यवहारः कस्य भेदाज्जायते ?

(घ) सुमेरुः कस्यां दिशि स्थितोऽस्ति ?

(ङ) उदयगिरिसन्निहिता दिक् का उच्यते ?

(च) 'अवाची' इति कस्या दिशो नाम अस्ति ?

### २. व्याख्यात्मकमुत्तरं लिखत

(क) "दूरत्वमन्तिकत्वं च दैशिकं परत्वमपरत्वं बोध्यम्" इति मुक्तावलीवचनस्याशयं स्पष्टयत।

(ख) "यत्पुरुषस्य उदयगिरिसन्निहिता या दिक् सा प्राची" इति लक्षणं सोदाहरणं विवृणुत।

(ग) सुमेरुपर्वतस्य संयोगेन उत्तर-दक्षिणदिशोर्व्यवस्थां प्रदर्शयत।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) एकापि दिग् उदयगिरिसुमेर्वादिसंयोगैः कथं नानाव्यवहारविषया भवति ? कालदिशोरुपाधिव्यवहारस्य तुलनां कुरुत।

(ख) परत्वापरत्वयोरुत्पत्तौ दिशः शरीरेण सह संयोगः 'असमवायिकारणं' किमर्थं कथ्यते ? इति विलिख्य दिशो नित्यत्वं विभुत्वं च साधयत।

### ४. परस्परं मेलयत

| | |
|---|---|
| उदयगिरिसन्निधानम् | उदीची |
| उदयगिरिव्यवधानम् | अवाची |
| सुमेरुसन्निधानम् | प्राची |
| सुमेरुव्यवधानम् | प्रतीची |
| दैशिकपरत्वम् | दूरत्वम् |

### ५. सन्धियुक्तपदच्छेदं कुरुत

प्राच्यवाच्यादिव्यवहारः, इत्याह, उपाधिभेदादेकापि।

### ६. यदि सुमेरु-पर्वतो न अभविष्यत्, तर्हि 'उदीची' व्यवहारः कया युक्त्या अभविष्यत् ? मुक्तावल्युक्त-उपाधिसिद्धान्तेन विमृशत।

*परियोजनाकार्यम्-*

एकतो 'नित्या विभुः दिक्', अन्यतः 'दश-दिशः' (प्राच्यादि) एतयोः सम्बन्धं दर्शयन् एकं रेखाचित्रं रचयत।

# अत्मनिरूपणम्

इतः परम् आत्मस्वरूपं प्रतिपादयितुमारभते ग्रन्थकारः-

कारिका- आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ॥ ४७ ॥
शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ।
तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥ ४८ ॥

**अन्वयः-** आत्मा इन्द्रियाद्यधिष्ठाता, हि करणं सकर्तृकं, मृतेषु व्यभिचारतः शरीरस्य चैतन्यं न, इन्द्रियाणां तथात्वं चेद् उपघाते स्मृतिः कथं ?

**कारिकार्थः-** आत्मा = आत्मद्रव्यम्, इन्द्रियाद्यधिष्ठाता = इन्द्रियशरीरादीनां नियन्ता, हि = यतः, करणम् = साधनम्, सकर्तृकम् = कर्तारमपेक्षते। मृतेषु = मृतशरीरेषु, व्यभिचारतः = ज्ञानाभावात् (व्यभिचारात्), शरीरस्य = देहस्य, चैतन्यं न = चेतनत्वं नास्ति। तथात्वं चेत् = यदि इन्द्रियाणां चेतनत्वं स्यात्, इन्द्रियाणामुपघाते = इन्द्रियनाशे सति, स्मृतिः कथं = स्मरणं कथमिव संभवेत् ?

ग्रन्थकारोऽत्र आत्मनोऽस्तित्वं साधयितुमनुमानप्रमाणं प्रस्तौति-

मुक्तावली- आत्मानं निरूपयति- आत्मेन्द्रियाद्यधिष्ठातेति। आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारतावच्छेदकतया सिद्ध्यति। ईश्वरेऽपि सा जातिरस्त्येव, अदृष्टादिरूपकारणाभावन्न सुखदुःखाद्युत्पत्तिः, नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भावनियम इत्यस्याप्रयोजकत्वात्। परे तु ईश्वरे सा जातिर्नास्त्येव प्रमाणाभावात्। न च दशमद्रव्यत्वापत्तिः, ज्ञानत्त्वेन विभजनादित्याहुः। इन्द्रियाद्यधिष्ठाता- इन्द्रियाणां शरीरस्य च परंम्परया चैतन्यसम्पादकः। यद्यप्यात्मनि अहं सुखी अहं दुःखीत्यादिविषयत्वमस्त्येव तथाऽपि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपादयितुं न शक्यते इत्यतः प्रमाणान्तरं दर्शयति- करणमिति। वात्स्यादीनां च्छिदादिकरणानां कत्रतरमन्तरेण फलानुपधानं दृष्टम्, एवं चक्षुरादीनां ज्ञानकरणानामपि फलोपधानं कर्तारमन्तरेण नोपपद्यत इत्यतिरिक्तः कर्ता कल्प्यते।

**ननु शरीरस्य कर्तृत्वमस्त्वत आह- शरीरस्येति। ननु चैतन्यं ज्ञानादिकमेव मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तद्भावे का क्षतिः ? प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न-शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थाविरे स्मरणानुपपत्तेः, शरीराणाम् अयवोपचयापचयैरुत्पादविनाशशालित्वाद्। न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पाद्यत इति वाच्यम्। अनन्तसंस्कारकल्पने गौरवात्। एवंशरीरस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिर्नस्याद्, इष्टसाधनताज्ञानस्य तद्धेतुत्वात्, तदानीमिष्टसाधनतास्मारकाभावाद्। मन्मते तु जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः। न च जन्मान्तरानुभूतमन्यदपि स्मर्यतामिति वाच्यम्, उद्बोधकाभावाद्। अत्र त्वनायत्या जीवनादृष्टमेवोद्बोधकं कल्प्यते। इत्थञ्च संसारस्यानादितया आत्मनोऽनादित्वसिद्धावनादिभावस्य नाशासम्भवान्नित्यत्वं सिद्ध्यतीति बोध्यम्।**

**ननु चक्षुरादीनामेव ज्ञानादिकं प्रति करणत्वं कर्तृत्वं चास्तु विरोधे साधकाभावादत आह- तथात्वमिति। तथात्वम्- चैतन्यम्। उपघाते- नाशे सति अर्थाच्चक्षुरादीनामेव। कथं स्मृतिः ? पूर्वं चक्षुषाऽनुभूतानां चक्षुरभावे स्मरणं न स्यादनुभवितुरभावाद्, अन्येनानुभूतस्यान्येन स्मरणासम्भवाद्, अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः।**

**व्याख्या-** आत्मेन्द्रियाद्यधिष्ठाता इति कथनेन आत्मा इन्द्रियाणां नियामक इति प्रसाधितम्। अस्य साधिका युक्तिरस्ति- "करणं हि सकर्तृकम्"। लोके यानि करणानि भवन्ति तानि सर्वदा कञ्चन कर्तारमपेक्षन्ते। यथा वास्यादिकरणानि तक्षकादिकर्तारं विना स्वयं काष्ठतक्षणं कर्तुं न शक्नुवन्ति तथैव चक्षुरादीनीन्द्रियाण्यपि रूपादिज्ञानरूपकार्याय कञ्चन चेतनं कर्तारमपेक्षन्ते। स इन्द्रियविलक्षणश्चेतनः कर्ता एव आत्मा।

अधुना चार्वाकादिमतं निरस्यति यत् शरीरमेव आत्मा इति। तत्राह- "शरीरस्य न चैतन्यम्"। शरीरं चेतनं भवितुं नार्हति। कुतः ? "मृतेषु व्यभिचारतः" इति। यदि चैतन्यं शरीरस्य स्वाभाविको गुणः स्यात् तर्हि मृतशरीरेऽपि तदुपलभ्येत। मृतशरीरे चक्षुरादीनीन्द्रियाणि सन्ति शरीरमपि विद्यते परन्तु तत्र ज्ञानं न जायते। अतश्चैतन्यं शरीरधर्मो न, अपि तु शरीरातिरिक्तस्य कस्यचित् पदार्थस्य धर्मः, यस्यापगमाद् मृतशरीरं जडं भवति।

अत्र पुनश्च युक्तिर्वर्तते यत्- चैतन्यं यदि शरीरगुणः स्यात् तर्हि स यावद्द्रव्यभावी भवेत्, परन्तु स न तथा। अपि च बाल्यकालेऽनुभूतस्य विषयस्य वार्धक्ये स्मरणं न स्यात्, यतः शरीरस्यावयवास्तु प्रतिक्षणं परिवर्तन्ते। योऽनुभवति स एव स्मरतीति प्रतिसन्धाननियमाद्गनुभावकः स्मर्ता च एक एव स्थिर आत्मा अवश्यं स्वीकार्यः।

यद्यपि आत्मनोऽस्तित्वं अहं सुखी अहं दुःखीति मानसप्रत्यक्षेण एव सिद्धं वर्तते तथापि ये चार्वाकादय आत्मनः स्वतन्त्रसत्तां न स्वीकुर्वन्ति तान् प्रति केवलं प्रत्यक्षप्रमाणेन शरीरातिरिक्तात्मसिद्धिः प्रथमतः कर्तुं न शक्यते। तेऽहं इति प्रतीतिं शरीरपरतयैव मन्वतेऽतो ग्रन्थकारस्तेषां प्रबोधायानुमानप्रमाणं प्रदर्शयति- करणमिति।

अत्र अनुमानस्य मूलाधारः करणस्य सकर्तृकत्वनियमोऽस्ति। लोके दृश्यते यद् वास्यादीनां काष्ठच्छेदनक्रियायां छिदेति फलं कर्तारं विना न जायते। कोऽपि तक्षको वास्यादिकरणानि प्रयुङ्क्ते तदैव क्रिया सिद्ध्यति। एवमेव अस्माकं चक्षुरानादीनि अपि ज्ञानकरणानि सन्ति। यथा वास्यादीनां फलोपधानाय (कार्यनिष्पत्तये) कश्चित् चेतनः कर्ता अपेक्ष्यते तथैव चक्षुरादिभिरिन्द्रियैः रूपादिज्ञानरूपफलस्योत्पत्तयेऽपि कश्चिद् अतिरिक्तः कर्ता अवश्यं स्वीकार्यः। यत इन्द्रियाणि स्वयं जडानि सन्ति अतस्तानि स्वयमेव ज्ञानं न जनयन्ति। स एव इन्द्रियव्यतिरिक्त इन्द्रियाणां प्रयोक्ता ज्ञानस्य च आश्रयभूतश्चेतनः कर्ता आत्मेति सिद्धं भवति। इत्थं मुक्तावलीकारः करणलिङ्गेन आत्मनो द्रव्यत्वं चेतनत्वं च प्रसाध्य देहात्मवादं निराकरोति।

ननु अतिरिक्तः कर्ता आत्मा किमर्थं कल्पनीयः ? शरीरस्यैव ज्ञानरूपं कर्तृत्वं किमर्थं न स्वीक्रियते ? अस्य समाधानार्थं ग्रन्थकारः शरीरस्येति प्रतीकमुपादाय शरीरस्य जडत्वं साधयति। चार्वाकः शङ्कते यत्- यथा भवतां मते मुक्तात्मनां चैतन्यं नोपलभ्यते तथैव मृतशरीराणामपि चैतन्यं न स्यात्, तत्र का क्षतिः ? यदि उच्यते यत् मृतशरीरे प्राणो नास्ति अतो ज्ञानं न भवति तर्हि प्राणाभावेन एव ज्ञानाभावः सिद्ध्यति न तु शरीरातिरिक्ततया आत्मसिद्ध्या।

अस्य खण्डनं कुर्वन् न्यायविदो ब्रुवते यत्- शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थाविरे स्मरणानुपपत्तेः। अयं प्रतिसन्धाननामको महान् तर्कोऽस्ति। यदि शरीरमेवात्मा स्यात् तर्हि बाल्यकालस्य शरीरं भिन्नं तथा वृद्धकालस्य (स्थाविरस्य) शरीरं भिन्नम्। शरीराणि तु अवयवोपचयापचयैः प्रतिक्षणं विनाशशालीनि उत्पत्तिमन्ति च भवन्ति।

नियमोऽस्ति यद्- योऽनुभवति स एव स्मरति। यदि बाल्ये अनुभावकः शरीरखण्डो विनष्टस्तर्हि तस्यानुभवस्य स्मरणं वृद्धशरीरेण कथं कर्तुं शक्यते ? न हि अन्येनानुभूतं विषयमन्यः स्मर्तुं शक्नोति। अतो बाल्ययौवनवार्धक्येषु शरीरे भिन्ने सत्यपि योऽनुसन्धानं करोति यत्- योऽहं बाल्ये जनकमपश्यम् स एवाहं वृद्धोऽपि पश्यामि। सः स्थिरः पदार्थः शरीरातिरिक्त आत्मा एव भवितुमर्हति।

एवञ्च मृतशरीरे चैतन्याभावात् तथा शरीरस्यानित्यत्वाच्च शरीरं न आत्मा। अपि च यदि शरीरं चेतनं स्यात् तर्हि अवयवनाशे (हस्तपादादिच्छेदे) सति आत्मनोऽपि नाशः प्रसज्येत परं न तथा दृश्यते, तस्मात् सिद्ध्यति यत् शरीरातिरिक्तः कश्चन नित्यः पदार्थोऽस्ति यो ज्ञानस्याश्रयः।

ननु चार्वाकः पुनस्तर्कयति- यदि शरीरं भिद्यते तर्हि पूर्वशरीरोत्पन्नसंस्कारेण उत्तरशरीरे नवीनसंस्कार उत्पाद्यताम्, येन स्मृत्युपपत्तिर्भवेद्। अस्य खण्डनं कुर्वन् ग्रन्थकार आह- अनन्तसंस्कारकल्पने गौरवात्। यदि प्रतिशरीरं संस्काराणां सङ्क्रमणं स्वीक्रियत तर्हि अनन्तानां संस्काराणां तत्प्रवाहाणां च कल्पने महद् गौरवं प्रसज्येत। लाघवात् तु एकमेव स्थिरमात्मानं स्वीकृत्य तत्रैव संस्काराणां स्थितिर्मन्तव्या।

पुनश्च शरीरस्य चैतन्यनिषेधे प्रबलं लिङ्गं दर्शयति- बालकस्य स्तन्यपाने प्रवृत्तिः। सद्यो जातो बालको येन अस्मिन् जन्मनि किमपि न शिक्षितं सः कथं मातुः स्तन्यपाने प्रवर्तते ? नियमोऽस्ति यद्- इष्टसाधनताज्ञानं प्रवर्तकम्। स्तन्यपानं

मम तृप्तिसाधनं सुखसाधनं वेति ज्ञानं विना तत्र प्रवृत्तिर्न सम्भवति। बालकस्यास्मिन् जन्मनि तादृशेष्टसाधनतास्मारकं किमपि नास्ति।

नैयायिकानां मते तु अस्य समाधानं सुलभम्- जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः। बालकः पूर्वजन्मनि वारं वारं स्तन्यपानं कृतवान्, तत्र च तस्य तृप्तिरूपं फलमपि अनुभूतम्। तस्यानुभवस्य संस्कार आत्मनि तिष्ठति। सद्यो जातकाले स एव संस्कार उबुद्धः सन् स्मृतिं जनयति, तया च स्मृत्या बालक इदं मम सुखसाधनमिति ज्ञात्वा प्रवर्तते।

अत्र शङ्का भवति- यदि पूर्वजन्मनः स्मृतिर्भवति तर्हि अन्यत् सर्वमपि बालकः किमर्थं न स्मरति ? तत्रोच्यते- उद्बोधकाभावात्। स्मृतेः कृते उद्बोधकोऽपेक्ष्यते। बालकस्य बुभुक्षारूपोद्बोधकः केवलं स्तन्यपानस्मृतिमेव जनयति न तु विषयान्तरस्मृतिम्। इत्थं बालकप्रवृत्त्या जन्मान्तरसिद्धिः, तया च शरीरातिरिक्तनित्यात्मसिद्धिः सुदृढा भवति।

मुक्तावलीकारः क्रमप्राप्तमात्मनोनित्यत्वं प्रसाधयति। बालकस्य स्तन्यपाने या प्रवृत्तिर्भवति तत्र क उद्बोधक इति विमर्शं कुर्वन् ग्रन्थकार आत्मनोऽनादित्वं साधयति—

ननु बालकस्य स्तन्यपाने प्रवृत्त्यर्थं पूर्वजन्मानुभवस्य स्मृतिरपेक्षिता, तस्याश्च स्मृतेः कृते कश्चन उद्बोधकः कल्पनीयः। तत्र अनायत्या (अनन्यगतिकतया) जीवनादृष्टमेव उद्बोधकं स्वीक्रियते। अर्थात् प्राणधारणरूपं यज्जीवनं तदर्थं यददृष्टं (पुण्यपापात्मकं कर्म) वर्तते तदेव संस्कारमुद्बोधयति येन बालकः स्तन्यपाने प्रवर्तते।

एतेन किमायाति ? इत्थञ्च संसारस्यानादितया आत्मनोऽनादित्वसिद्धिः। यदि बालकस्य प्रवृत्तिः पूर्वजन्मनः संस्काराद् भवति तर्हि तज्जन्मनोऽपि पूर्वं जन्म कल्पनीयम्। एवं तस्यापि पूर्वं जन्मान्तरमिति परम्परया संसारस्य अनादित्वं सिद्धं भवति। यस्य संसारः (जन्ममरणप्रवाहः) अनादिस्तस्य आश्रयभूत आत्माऽपि अनादिरेवावश्यं स्वीकार्यः।

अत्र न्यायशास्त्रस्य महान् नियमः प्रवर्तते- अनादिभावस्य नाशासम्भवात्। लोके यो भावपदार्थोऽनादिर्भवति स नित्य एव भवति (यथा गगनम्)। यस्य आदिः (उत्पत्तिः) नास्ति तस्य विनाशोऽपि न सम्भवति, यतो हि विनाशस्तस्यैव भवति यस्योत्पत्तिर्भवति। अत आत्मनोऽनादित्वसिद्धौ तस्य नित्यत्वं स्वत एव सिद्ध्यति।

इत्थं मुक्तावलीकारो बालकप्रवृत्त्या जन्मान्तरं जन्मान्तरेण संसारस्यानादित्वं ततश्च आत्मनो नित्यत्वं च क्रमबद्धतया प्रतिष्ठापयति। एतेन देहात्मवादः सर्वथा निरस्तो भवति। यतो हि शरीरं तु सादि (उत्पत्तिमान्) अनित्यं चास्ति।

ननु अतिरिक्त आत्मा किमर्थं स्वीक्रियते ? चक्षुरादीनामेव ज्ञानं प्रति चैतन्यमप्यस्तु, अर्थाच्चक्षुरेव पश्यति, चक्षुरेव च तस्य ज्ञानस्य आश्रयश्चास्तु। अत्र कश्चन विरोधोपि न दृश्यते। अस्य समाधानार्थं ग्रन्थकारस्तथात्वमिति प्रतीकमुपादाय इन्द्रियचैतन्यं निराकरोति। अत्र तथात्वं नाम चैतन्यम्। ग्रन्थकारः तर्कयति- उपघाते सति कथं स्मृतिः

? । यदि चक्षुरेव अनुभवितृ (चेतनं) स्यात् तर्हि चक्षुषि विनष्टे सति पूर्वदृष्टविषयाणां स्मरणं न भवेद् । लोके हि दृश्यते यत् कश्चन पुरुषः चक्षुषा घटं पश्यति कालान्तरे चक्षुषि विकृते विनष्टे वाऽपि स मया घटो दृष्ट इति स्मरति । यदि चक्षुरेवात्मानुभावकश्च स्यात् तर्हि अनुभवितुर्नाशात् स्मरणं सर्वथाऽसम्भवं स्यात् ।

अत्र मुख्यो नियमोऽस्ति- अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावात् । अर्थात् योऽनुभवति स एव स्मरति । अन्येनानुभूतस्य विषयस्य स्मरणं अन्यः कर्तुं न शक्नोति (न हि चैत्रानुभूतं मैत्रः स्मरति) । यदि अनुभवश्चक्षुषि जातः तर्हि तस्य संस्कारोऽपि चक्षुषि एव भवेत् । चक्षुर्नाशे सति सः संस्कारोऽपि नश्येत् । अत उत्तरकाले शरीराभ्यन्तरे जायमानं स्मरणं प्रति आश्रयभूतः कश्चन स्थिरः पदार्थोऽवश्यं स्वीकार्यो यः चक्षुर्नाशे सत्यपि अवशिष्यते ।

इत्थं चक्षुरादीनां करणानां विनश्वरत्वात्, अनुभवस्मरणयोश्च एकस्मिन्नेवाधिकरणे (आश्रये) नियमतो जायमानत्वात्, इन्द्रियातिरिक्तो नित्य आत्मा एव ज्ञानस्याश्रय इति सिद्धं भवति । एवं चेन्द्रियाणि केवलं करणानि एव न तु कर्तारः ।

**कारिका-** **मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् ।**
**धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ।। ४९ ।।**

**अन्वयः-** मनः अपि तथा न, तदा ज्ञानाद्यनध्यक्षं भवेत्, धर्माधर्माश्रयः, विशेषगुणयोगतः अध्यक्षः ।

**कारिकार्थः-** मनोऽपि = मनःपदार्थोऽपि, न तथा = चेतनं न, तदा = मनसः चेतनत्वे, ज्ञानाद्यनध्यक्षं = ज्ञान-सुखादीनां मानसप्रत्यक्षं न, भवेत् = स्यात्, तस्याणुत्वादित्यर्थः । धर्माधर्माश्रयः = पुण्यपापयोराधारः, विशेषगुणयोगतः = ज्ञानसुखादिविशेषगुणयोगेन, अध्यक्षः = आत्मन प्रत्यक्षं भवतीत्यर्थः ।

**मुक्तावली- नन्‍ु चक्षुरादीनां चैतन्यं माऽस्तु मनसस्तु नित्यस्य चैतन्यं स्यादत आह - मनोऽपीति । न तथा- न चेतनम् । ज्ञानाद्यनध्यक्षं तदा भवेद्, मनसोऽणुत्वात्प्रत्यक्षे महत्त्वस्य हेतुत्वाद् मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानुपपत्तिरित्यर्थः । यथा च मनसोऽणुत्वं तथाऽग्रे वक्ष्यते ।**

**व्याख्या-** अत्र मुक्तावलीकारो मनसश्चैतन्यं निराकरोति । नैयायिकानां मते मनो नित्यम् अणुरूपं च वर्तते अतस्तस्य चैतन्यवादे का बाधका युक्तिरिति अत्र विवेचयति- ननु शरीरस्य इन्द्रियाणाम् चानित्यत्वात् तत्र चैतन्यं मास्तु परन्तु मनस्तु नित्यं परमाणुस्वरूपं च वर्तते । अतो मन एव ज्ञानस्याश्रयः (आत्मा) किमर्थं न स्वीक्रियते ? अस्य खण्डनार्थं ग्रन्थकारो मनोऽपीति प्रतीकमुपादाय आह- न तथा अर्थाद् मनोऽपि चेतनं नास्ति ।

अत्र मुख्यः तर्कः प्रत्यक्षनियम- विषयकोऽस्ति । न्यायसिद्धान्ते कस्यापि पदार्थस्य चाक्षुष-रासन-मानस-प्रत्यक्षं प्रति महत्त्वमनिवार्यं कारणं भवति । यदि ज्ञान-सुख-दुःखादय गुणा मनसि तिष्ठेयुस्तर्हि तेषां कदापि प्रत्यक्षं न स्यात् । कुतः ? मनसोऽणुत्वाद् । मनः अणुपरिमाणवदस्ति परमाणुसदृशे पदार्थे विद्यमानानां विशेषगुणानां प्रत्यक्षं न सम्भवति ।

लोके तावत् अहं सुखी अहं जानामि इति ज्ञानसुखादीनां प्रत्यक्षं तु सर्वेषां जायते। यदि एते गुणाः मनसि आश्रिताः स्युः तर्हि अणोराश्रितत्वात् एतेषामनध्यक्षत्वं प्रसज्येत। अतो ज्ञानसुखादीनां प्रत्यक्षत्वानुरोधेन तेषां आश्रयः कश्चन महत् (व्यापकः) पदार्थोऽवश्यं स्वीकार्यः, स एवात्मा। मनसोऽणुत्वं तु अग्रे साधयिष्यते। यतो युगपद् (बहूनां ज्ञानानामनुत्पत्तिर्मनसोऽणुत्वे लिङ्गम्। इत्थं मनसः परिमाणगताल्पत्वात् तस्य चैतन्यं (ज्ञानाश्रयत्वं) न सम्भवति, यतो हि तथा सति अस्माकमान्तरिकानुभवानां लोपः प्रसज्येत।

## *पदानामर्थपरिचयः*

| | | |
|---|---|---|
| **अधिष्ठाता** | = | नियामकः प्रेरकश्च |
| **करणम्** | = | साधकतमम् |
| **प्रतिसन्धानम्** | = | स्मरणम् |
| **इष्टसाधनताज्ञानम्** | = | इष्टस्य सुखस्य इदं साधनमिति ज्ञानम् |
| **जीवनादृष्टम्** | = | प्राणधारणहेतुभूतमदृष्टम् |
| **उपचयः** | = | वृद्धिः |
| **अपचयः** | = | ह्रासः |

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) आत्मनोऽस्तित्वसाधिका मुक्तावल्युक्ता मुख्या युक्तिः का ?

(ख) शरीरं चेतनं किमर्थं न भवति ?

(ग) सद्योजातस्य बालकस्य स्तन्यपाने प्रवृत्तिः कथं जायते ?

(घ) मनसश्चैतन्यं (चेतनत्वं) किमर्थं प्रतिषिद्धम् ?

### २. व्याख्यात्मकमुत्तरं लिखत

(क) "करणं हि सकर्तृकम्" इति नियमं वास्यादिदृष्टान्तैः प्रदर्श्य इन्द्रियाणामधिष्ठातृत्वेन शरीरातिरिक्त आत्मा कथं सिद्ध्यति ? तन्निरूपयत।

(ख) बाल्यकाले अनुभूतस्य वृद्धकाले स्मरणं कथं भवति ? प्रतिपादयत।

(ग) बालकस्य प्रवृत्तिं प्रति 'इष्टसाधनताज्ञानं' कथं कारणं भवति ? तत्र जन्मान्तरीयसंस्कारस्य तथा जीवनादृष्टस्य भूमिकां स्पष्टयत।

### ३. यदि आत्मा 'अणुः' तर्हि तस्य 'विभुत्वम्' तथा 'युगपत्सर्वज्ञानम्' बाधितं भवति वा न वा ? मुक्तावल्युक्तरीत्या उत्तरं लिखत।

ऊनविंशः पाठः

# आत्मविषयकमतान्तरनिरसनम्

**मुक्तावली-** नन्वस्तु विज्ञानमेवात्मा तस्य स्वतःप्रकाशरूपत्वाच्चेतनत्वम्। ज्ञानसुखादिकन्तु तस्यैवाकारविशेषः। तस्यापि भावत्वादेव क्षणिकत्वम्, पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञाने हेतुत्वात् सुषुप्त्यवस्थायामप्यालयविज्ञानधारा निराबाधैव, मृगमदवासनावासितवसन इव पूर्वपूर्वविज्ञानजनितसंस्काराणमुत्तरविज्ञाने हेतुत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न- तस्य जगद्विषयकत्वे सर्वज्ञत्वापत्तिः, यत्किञ्चिद्विषयकत्वे विनिगमनाविरहः, सुषुप्तावपि विषयावभासप्रसङ्गाच्च ज्ञानस्य सविषयत्वात्। तदानीं निराकारा चित्सन्ततिरनुवर्तत इति चेन्न। तस्याः प्रकाशत्वे प्रमाणाभावाद्, अन्यथा घटादीनामपि ज्ञानत्वापत्तिः। न चेष्टापत्तिः, विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यम्। घटादेरनुभूयमानस्यापलपितुमशक्यत्वाद्। आकारविशेष एवायं विज्ञानस्येति चेन्न- किमयमाकारोऽतिरिच्यते विज्ञानात्? तर्हि समायातं विज्ञानव्यतिरिक्तेन। नातिरिच्यते चेत्, तर्हि समूहालम्बने नीलाकारोऽपि पीताकारः स्यात्, स्वरूपतो विज्ञानस्याविशेषात्। आकारविशेष एवायं विज्ञानस्येति चेन्न- किमयमाकारोऽतिरिच्यते विज्ञानात्? तर्हि समायातं विज्ञानव्यतिरिक्तेन। नातिरिच्यते चेत् तर्हि समूहालम्बने नीलाकारोऽपि पीताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात्।

**व्याख्या-** अत्र मुक्तावलीकारो योगाचार-बौद्धमतं (विज्ञानवादं) निराकरोति। बौद्धमते स्थिर आत्मा नास्ति, अपि तु क्षणिकविज्ञानप्रवाह एव आत्मा इति मन्यते। अस्य विवेचनमित्थं वर्तते-

ननु अतिरिक्तः स्थिर आत्मा किमर्थं कल्पनीयः? विज्ञानमेव (ज्ञानमेव) आत्मा अस्तु। तस्य स्वतःप्रकाशरूपत्वात् चेतनत्वं सिद्ध्यति। अस्माकं सुखादयोऽनुभवास्तु तस्यैव विज्ञानस्य आकारविशेषाः सन्ति। यथा घटज्ञानं घटाकारं भवति तथा सुखज्ञानं सुखाकारं भवति। तच्च विज्ञानं क्षणिकं वर्तते, यतः संसारे सर्वेऽपि भावपदार्थाः क्षणिकाः।

अत्र शङ्का भवति यद्यदि विज्ञानं क्षणिकं तर्हि सुषुप्तिकाले आत्मनो नाशः प्रसज्येत, तथा च स्मृतिः कथं सङ्गच्छेत? तत्र बौद्धो ब्रूते- आलयविज्ञानधारा निराबाधा प्रवहति। सुषुप्तावपि सूक्ष्मरूपेण विज्ञानप्रवाहः तिष्ठति। स्मरणस्य उपपत्तये च मृगमदवासनान्यायो दर्शितः। यथा कस्तूरीसुगन्धेन (मृगमदेन) वासितं वस्त्रं कस्तूर्या अभावेऽपि सुगन्धं धारयति तथैव पूर्वपूर्वविज्ञानेन जनितः संस्कार उत्तरोत्तरविज्ञाने संक्रामति। अतोऽनुभावकविज्ञानस्य नाशेऽपि उत्तरविज्ञाने संस्कारसङ्क्रमात् स्मृतिरुपपद्यते।

अस्य विज्ञानवादस्य खण्डनं नैयायिका इत्थं कुर्वन्ति- न, अर्थादयं पक्षोऽयुक्तः। मुख्यं बाधकं तु प्रतिसन्धानमेव। योऽनुभवति स एव स्मरतीति नियमः। यदि विज्ञानं क्षणिकंतर्हि अनुभवकाले विद्यमानं विज्ञानं स्मरणकाले न तिष्ठति। अन्येनानुभूतस्य अन्येन स्मरणं न सम्भवति। यत्तु संस्कारसङ्क्रम उक्तस्तत्र अहोरात्रं गौरवं प्रसज्येत। यदि संस्कार एकस्मात् विज्ञानादन्यस्मिन् संक्रामति तर्हि गुरोः संस्कारो शिष्येऽपि संक्रमेत परं न तथा दृश्यते।

अतः स्थिर एव कश्चन आत्मा स्वीकार्यः, यः सर्वेषां क्षणिकविज्ञानानां (ज्ञानानां) आश्रयो भवेद्। लाघवात् तु एकः स्थिर आत्मा एव ज्यायान् न तु अनन्ताः क्षणिकविज्ञानधाराः। यदि विज्ञानमेव (ज्ञानमेव) आत्मा इति स्वीक्रियते तर्हि तस्य विज्ञानस्य कश्चन विषयोऽवश्यं भवेत्, यतो हि ज्ञानं सविषयकं भवति। अत्र त्रयो विकल्पाः सम्भवन्ति- ये त्रयोऽपि दोषग्रस्ताः सन्ति—

१. सर्वज्ञत्वापत्तिः- यदि तदात्मरूपं विज्ञानं जगद्विषयकं (समग्रविश्वविषयकं) स्यात् तर्हि सर्वेऽपि जीवाः सर्वज्ञा भवेयुः। न हि संसारे सर्वे सर्वज्ञा दृश्यन्ते। २. विनिगमनाविरहः- यदि उच्यते तद् विज्ञानं यत्किञ्चिद्विषयकं (कतिपयवस्तुविषयकं) वर्तते तर्हि कस्य वस्तुनो ज्ञानं भवेद् कस्य च न इति निर्धारणे किमपि दृढं कारणं (विनिगमना) नास्ति। ३. सुषुप्तावपरोक्षप्रसङ्गो यदि विज्ञानधारा एव आत्मा तर्हि सुषुप्तिकालेऽपि विषयाणां भानं (अवभासः) प्रसज्येत परन्तु सुषुप्तौ तु किमपि ज्ञानं न जायते।

अत्र बौद्धः शङ्कते- तदानीं निराकारा चित्सन्ततिरनुवर्तत इति। अर्थात् सुषुप्तौ विषयाभावात् निराकारा ज्ञानधारा प्रवहति सैव आत्मा। अस्य खण्डनं कुर्वन् नैयायिकः आह- न, तस्याः प्रकाशत्वे प्रमाणाभावात्। यदि कस्यचिद् ज्ञानस्य कोऽपि विषयः नास्ति तर्हि तत् ज्ञानमिति कथं वक्तुं शक्यते ? निर्विषयकं ज्ञानं लोके न प्रसिद्धम्।

किञ्च- यदि विषयं विनापि ज्ञानत्वं स्वीक्रियेत तर्हि घटादीनामपि ज्ञानत्वापत्तिः। यथा घटादयो जडपदार्था निर्विषयकाः सन्ति तथा तव निराकारा चिदपि जडा भवेद्। जडस्य चात्मत्वं न सम्भवति। अतो विषयावभासकस्य ज्ञानस्य आश्रयभूतः कश्चन स्थिरः पदार्थोऽवश्यं स्वीकार्यः, यः सुषुप्तौ ज्ञानरहितो भूत्वापि तिष्ठति। स एव नित्य आत्मा।

विज्ञानवादी बौद्धः पुनस्तर्कयति- न चेष्टापत्तिरिति। यदि निर्विषयकस्य ज्ञानस्य घटादिवद् जडत्वापत्तिः (घटादीनामपि ज्ञानत्वापत्तिः) दीयते तर्हि सा अस्माकं कृते इष्टापत्तिरेव। कुतः ? यतो हि अस्माकं मते विज्ञानव्यतिरिक्तवस्तुनोऽभावाद्। अर्थाद् विज्ञानादतिरिक्तं बाह्यं जगद् घटादिकं वा वस्तुतः किमपि नास्ति। यत्किञ्चिद् बाह्यं प्रतीयते तत् सर्वं विज्ञानस्यैवाकारविशेषः। यथा स्वप्ने बाह्यार्थाभावेऽपि ज्ञानं नानाकारं भासते तथैव जाग्रदवस्थायामपि बाह्यवस्तु नास्ति इति बौद्धस्याशयः।

अस्य खण्डनं कुर्वन् नैयायिकः सिद्धान्ती आह- न, घटादेरनुभूयमानस्यापलपितुमशक्यत्वादिति। अर्थाद् अयं बौद्धपक्षः सर्वथायुक्तः। लोके प्रत्यक्षप्रमाणेन घटादिपदार्थानां पृथक् सत्ता अनुभूयते। अयं घट इति प्रतीतिः

बाह्यवस्तुविषयिणी भवति। यद् वस्तु प्रत्यक्षत उपलभ्यते तस्यापलापः कर्तुं न शक्यते। यदि बाह्यं वस्तु न स्यात् तर्हि घटं पश्यामि पटं पश्यामीति विषयाणां वैचित्र्यं कथं भवेत्?

किञ्च, यदि ज्ञानमेव घटाकारं भवति, तर्हि अहं घट इति प्रतीतिः स्यात्, न तु अयं घट इति। इदमिति पदेन विषयस्य ज्ञानभिन्नत्वं स्पष्टं प्रतीयते। अतो ज्ञानं प्रकाशकमस्ति, घटादयस्तु प्रकाशाः सन्ति। प्रकाशप्रकाशकयोरभेदः कदापि न सम्भवति। एवं च विज्ञानव्यतिरिक्तस्य बाह्यजगतः सत्यत्वात्, तस्य ज्ञेयस्य आश्रयभूतः कश्चन स्थिर आत्मा एव युक्तो न तु क्षणिकविज्ञानमात्रम्। इत्थं मुक्तावलीकारो विज्ञानवादं निरस्य बाह्यार्थवादं तथा स्थिरात्मवादं च सुदृढं प्रसाधयति।

इदानीं मुक्तावलीकारो बौद्धसम्मतस्य 'साकारविज्ञानवादस्य' उपरि वज्रप्रहारं करोति। यदि विज्ञानमेव घटादिरूपेण भासते तर्हि स आकारो विज्ञानाद् भिन्नो वाऽभिन्नो वेति विकल्पद्वयमुत्थाप्य तन्मतं खण्डयति। अत्र बौद्धः शङ्कते- आकारविशेष एवायं विज्ञानस्येति। अर्थाद् बाह्यं वस्तु किमपि नास्ति विज्ञानमेव नीलपीतघटाद्याकारेण विवर्तते। अस्य खण्डनार्थं नैयायिकः पृच्छति- किमयमाकारोऽतिरिच्यते विज्ञानात्?। अर्थात् स आकारो विज्ञानात् पृथक् (भिन्नः) अस्ति वा न वा?

१. व्यतिरिक्तत्वपक्षः - यदि स आकारः (घटत्व-नीलत्वादिकं) विज्ञानादतिरिच्यते (भिन्नः अस्ति), तर्हि समायातं विज्ञानव्यतिरिक्तेन। एवं सति तव सिद्धान्त एव व्याहतः स्याद्, यतो हि भवान् विज्ञानादतिरिक्तं किमपि नास्तीति मनुते। विज्ञानातिरिक्तपदार्थस्याङ्गीकारे तु अस्माकं नैयायिकानां बाह्यार्थवाद एव सिद्धो भवति।

२. अव्यतिरिक्तत्वपक्षः - यदि स आकारो विज्ञानाद् नातिरिच्यते (अभिन्नोऽस्ति) तर्हि समूहालम्बने नीलाकारोऽपि पीताकारः स्याद्। यत्र एकस्मिन् विज्ञाने नील-पीतादयो बहवो विषया भासन्ते (समूहालम्बन-ज्ञानम्) तत्र विज्ञानं तु एकमेव। यदि नील-पीताकारा विज्ञानादभिन्नाः तर्हि नीलः पीतः स्यात्, पीतश्च नीलः स्यात्, यतो हि स्वरूपतो विज्ञानस्याविशेषात् (विज्ञानं तु उभयत्र एकरूपमेव)।

एवं च आकारविज्ञानयोरभेदे विषयाणां पारस्पारिकं साङ्कर्यं प्रसज्येत। यत्तु लोके नानुभूयते, अतो विषयाः (घटादयः) विज्ञानात् पृथक् बाह्या एव सन्ति, तेषां च ज्ञानाश्रयः स्थिर आत्मा एव युक्तो न तु क्षणिकं विज्ञानमात्रम्। इत्थं मुक्तावलीकारो बौद्धमतं परिहृत्य आत्मनो नित्यत्वं बाह्यार्थानां सत्यत्वं च प्रसाधितवान्।

**मुक्तावली- अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न। नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशाद्, इतरथा विरोधावधारणस्यैव दुरुपपादत्वाद्। न वा वासनासङ्क्रमः सम्भवति मातृपुत्रयोरपि वासनासङ्क्रमप्रसङ्गात्।**

**व्याख्या-** अत्र मुक्तावलीकारो बौद्धसम्मतापोहवादस्य तथा वासनासङ्क्रमवादस्य चोपरि प्रौढं प्रहारं करोति। बौद्धः स्वसिद्धान्तं रक्षितुं यं तर्कं प्रस्तौति तस्य खण्डनं इत्थं वर्तते-

ननु विज्ञानवादी बौद्धः पुनः शङ्कते- अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति। अत्र अपोहोऽतद्व्यावृत्तिः। बौद्धमते नीलत्वं नाम कश्चन भावरूपो धर्मो नास्ति अपि तु अनीलव्यावृत्तिः (नीलाद्भिन्नस्य निषेधः) एव नीलत्वम्। अयमपोहरूपो धर्मो विज्ञानस्यैव धर्मोऽस्तु न तु बाह्यवस्तुनः।

अस्य खण्डनं कुर्वन् नैयायिकः सिद्धान्ती आह- नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात्। यदि नीलत्व-पीतत्वादय धर्मा विज्ञानाश्रिताः स्युः तर्हि समूहालम्बनज्ञाने (यत्र एकस्मिन् विज्ञाने नील-पीत-आदयो बहवः पदार्थाः भासन्ते) विरोधः प्रसज्येत। नीलत्वं पीतत्वं च परस्परं विरुद्धौ धर्मौ स्तः। एकस्मिन् विज्ञाने विरुद्धधर्माणां समावेशो न सम्भवति। इतरथा विरोधावधारणस्यैव दुरुपपादत्वाद् यदि एकस्मिन्नेव आश्रये विरुद्धधर्माणां स्थितिरङ्गीक्रियेत, तर्हि लोके विरोध इत्यस्य परिभाषा एव विनश्येद्, अतो नीलपीतादयो बाह्यनिष्ठा धर्मा एव न तु विज्ञानधर्माः।

ततः परं बौद्धोक्तं वासनासङ्क्रमं निराकरोति- न च वासनासङ्क्रमः सम्भवति। बौद्धमते क्षणिकविज्ञानेषु पूर्वविज्ञानाद् उत्तरविज्ञाने संस्कारस्य (वासनायाः) सङ्क्रमणं भवति। तत्र नैयायिकस्य प्रबलं दूषणं वर्तते- मातृपुत्रयोरपि वासनासङ्क्रमप्रसङ्गाद्। यदि संस्कारः (संस्कारकः) स्वकीयाश्रयं विहाय अन्याश्रये गन्तुं शक्नोति तर्हि मातुः शरीरे विद्यमानानां संस्काराणां सङ्क्रमणं पुत्रस्य शरीरे (विज्ञाने) अपि भवेद्। एवं सति माता यत् पठितवती तत् पुत्रेण विनाऽभ्यासं स्मर्येत परं लोके न तथा दृश्यतेऽतो योऽनुभवति स एव स्मरति इति नियमादनुभवस्मरणयोरेकाश्रयत्वं (सामानाधिकरण्यं) अनिवार्यम्। तच्च एकाश्रयत्वं स्थिरमात्मानं विना न सम्भवति। क्षणिकविज्ञानवादे तु अनुभावकोऽन्यः स्मर्ता चान्य इति कृतप्रणाशाकृताभ्यागमदोष प्रसज्येत।

**मुक्तावली- न चोपादानोपादेयभावो नियामक इति वाच्यम्। वासनायाः सङ्क्रमासम्भवाद्। उत्तरस्मिन्नुत्पत्तिरेव सङ्क्रम इति चेन्न- तदुत्पादकाभावात्, चितामेवोत्पादकत्वे संस्कारानन्त्यप्रसङ्गः। क्षणिकविज्ञानेष्वतिशयविशेषः कल्प्यत इति चेन्न- मानाभावात्, कल्पनागौरवाद्। एतेन क्षणिकशरीरेष्वेव चैतन्यं प्रत्युक्तं, गौरवाद्, अतिशये मानाभावाच्च। बीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वाकल्पनात्॥**

**व्याख्या-** ननु बौद्धः पुनः स्वपक्षं समर्थयितुं शङ्कते- न चोपादानोपादेयभावो नियामक इति वाच्यम्। अत्रायमाशयः- मातुः पुत्रस्य च विज्ञानधारा भिन्ना अस्ति परन्तु एकस्यां विज्ञानधारायां पूर्वविज्ञानं उपादानकारणम् उत्तरविज्ञानं च उपादेयम् (कार्यम्) भवति। अतोऽन्यत्र सङ्क्रमाप्रसङ्गेऽपि स्वकीयायां धारायामुपादान-उपादेयभावाद् वासनासङ्क्रमः (संस्कारसङ्क्रमः) सम्भवति।

अस्य खण्डनं कुर्वन् नैयायिकः पृच्छति- सङ्क्रमोनाम कः ? वासनायाः सङ्क्रमासम्भवात् । संस्कारः कश्चन गुणः, सः स्वकीयाश्रयं विहायान्यत्र गन्तुं न शक्नोति । यदि बौद्धो ब्रूते- उत्तरस्मिन्नुत्पत्तिरेव सङ्क्रम इति (अर्थात् पूर्वविज्ञानेन उत्तरविज्ञाने नवीनस्य संस्कारस्य उत्पत्तिः एव सङ्क्रमः) तर्हि तत्राह- तदुत्पादकाभावात् । नवीनसंस्कारस्योत्पादकः कः ? अनुभवस्तु पूर्वविज्ञानेन सह विनष्टः ।

किञ्च- यदि चितामेवोत्पादकत्वे (अर्थाद् विज्ञानानामेव संस्कारोत्पादकत्वं स्वीक्रियेत), तर्हि संस्कारानन्त्यप्रसङ्गः । विज्ञानानि तु प्रतिक्षणं जायन्ते यदि तानि सर्वाणि संस्कारान् जनयेयुस्तर्हि संसारेऽनन्तानां संस्काराणां कल्पने महद् गौरवं प्रसज्येत । पुनश्च बौद्धः कथयति- क्षणिकविज्ञानेष्वतिशयविशेषः कल्प्यत इति । अर्थात् सर्वेषु विज्ञानेषु न, अपि तु केषुचिद् विज्ञानेषु एव कश्चन अतिशयः कल्प्यते, येन ते संस्कारान् जनयन्ति । अत्र नैयायिकस्य वज्रप्रहारः- मानाभावात्, कल्पनागौरवादिति । तादृशस्यातिशयस्य कल्पने किमपि प्रमाणं नास्ति । अपि च- अनन्तानां क्षणिकविज्ञानानां तेषां सङ्क्रमाणामतिशयानां च कल्पनापेक्षया एकमेव स्थिरं नित्यं चात्मानं स्वीकृत्य तत्रैव संस्कारस्थितिं मन्यामहे चेत् लाघवं भवति ।

इत्थं मुक्तावलीकारः क्षणिकविज्ञानवादं सर्वथा निरस्य, अनुभवस्मरणयोः सामानाधिकरण्यानुरोधेन शरीरादिव्यतिरिक्तं नित्यं चात्मानं सिद्धान्तयति । एतेन क्षणिकशरीरेष्वेव चैतन्यं प्रत्युक्तम्- यथा पूर्वं क्षणिकविज्ञानवादो निरस्तस्तथैव शरीरं क्षणिकं तदेव च चेतनम् इति यो वाद सोऽपि निरस्तो मन्तव्यः । अत्र मुख्यं दूषणद्वयं वर्तते- गौरवम् तथा मानाभाव इति । यदि प्रतिशरीरक्षणं भिन्नं भिन्नं चैतन्यं स्वीक्रियेत तर्हि अनन्तानां चैतन्यानां कल्पने महद् गौरवम् । अपि च- तादृशे क्षणिकशरीरे संस्काराणां सङ्क्रमाय योऽतिशयः कल्प्यते तत्र किमपि प्रमाणं नास्ति ।

अत्र बौद्धः स्वपक्षं द्रढयितुं बीजस्याङ्कुरजनकत्वदृष्टान्तं प्रदर्शयति । स मनुते यद्- बीजं सर्वदा अङ्कुरं न जनयति, अपि तु यदा तत् कुर्वद्रूपं (कार्यकरणक्षमं) भवति तदैव अङ्कुरो जायते । अतः तत् क्षणिकमेव । अस्य समाधानं नैयायिक इत्थं करोति- बीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः ।

अस्यार्थोऽस्ति यद्- बीजं तु स्थिरमेवास्ति । तस्मादङ्कुरस्योत्पत्तिस्तदैव भवति यदा सहकारिकारणानि (जलादीनि) समवहितानि (उपस्थितानि) भवन्ति । यदा जलादीनि न सन्ति तदा बीजमङ्कुरं न जनयति । अत्र केवलं सहकारिकारणानां सन्निधिरसन्निधिश्च नियामको न तु बीजस्य क्षणिकत्वं वा तत्र कश्चन कुर्वद्रूपत्वनामकोऽतिशयः । अतो कुर्वद्रूपत्वाकल्पनाद् -अर्थाद् बीजं स्थिरं सदपि सहकारिवशात् कार्यं करोति इति लाघवात् सिद्धं भवति । एवं च आत्मनः क्षेत्रेऽपि नानाक्षणिकशरीराणां कल्पनामपहाय एकस्यैव स्थिरस्य आत्मनः स्वीकारो न्याय्यः । स एव स्थिर आत्मा अनुभवस्मरणयोः सामानाधिकरण्यं निर्वहति ।

**मुक्तावली- अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा, अविनाशी वा अरेऽयमात्मा, सत्यं ज्ञानमनन्तं ब्रह्म इत्यादिश्रुतेश्चेति चेन्न- तस्य सविषयकत्वासम्भवस्य दर्शितत्वाद्, निर्विषयस्य ज्ञानत्वे मानाभावाद्, अतो विज्ञानादिभिन्नो नित्य आत्मेति सिद्धम् ।**

**व्याख्या-** अत्र मुक्तावलीकारो वेदान्तिनां' (विशेषतः अद्वैतवेदान्तिनां) मतं निराकरोति। अद्वैतवेदान्तिनो मन्यन्ते यत् विज्ञानं (ज्ञानं) न क्षणिकमपि तु नित्यं ज्ञानमेव आत्मा। ननु बौद्धोक्तं क्षणिकविज्ञानं गौरवात् मास्तु परन्तु "नित्यं विज्ञानमेव" आत्मा अस्तु। अत्र वेदान्ती श्रुतिप्रमाणं ददाति- "अविनाशी वा अरेऽयमात्मा" (बृहदारण्यकोपनिषत्) तथा "सत्यं ज्ञानमनन्तं ब्रह्म" (तैत्तिरीयोपनिषत्)। एताभिः श्रुतिभिः सिद्ध्यति यद् आत्मा ज्ञानस्वरूपो नित्यश्चास्तीति।

अस्य खण्डनं कुर्वन् नैयायिकः सिद्धान्ती आह- "न" अर्थाद् एतदपि अयुक्तम्। कुतः? "तस्य सविषयकत्वासम्भवस्य दर्शितत्वात्"। यथा पूर्वं क्षणिकविज्ञानवादे उक्तं तथैवात्रापि प्रश्नो भवति- तद् नित्यं ज्ञानं सविषयकमस्ति वा निर्विषयकम्?

१. यदि सविषयकं तर्हि सुषुप्तिकालेऽपि विषयाणां भानं प्रसज्येत, यतो हि आत्मा (ज्ञानं) तु तदानीमपि वर्तते। परं सुषुप्तौ न किमपि ज्ञायते। २. यदि "निर्विषयस्य ज्ञानत्वे मानाभावात्" अर्थात् यदि उच्यते यत् तत् ज्ञानं कञ्चन विषयं न अपेक्षते (निर्विषयकम्), तर्हि तस्य ज्ञानत्वम् एव न सिद्ध्यति। लोके ज्ञानं नाम प्रकाशकत्वं तच्च कस्यचित् विषयस्यैव भवति। निर्विषयकं ज्ञानं तु गगनकुसुमवदप्रामाणिकम्।

अत आत्मा ज्ञानस्वरूपो न, अपि तु ज्ञानाश्रयोऽस्ति। ज्ञानं तु आत्मन आगन्तुको विशेषगुणः, यो मनसा इन्द्रियैश्च संयोगे सति उत्पद्यते। सुषुप्तौ च नश्यति। एवं च श्रुतीनां तात्पर्यं तु आत्मनश्चैतन्याश्रयत्वे एव वर्तते। इत्थं शरीरेन्द्रियमनोविज्ञानव्यतिरिक्तो नित्य आत्मेति निष्कण्टकं सिद्धं भवति।

**मुक्तावली- सत्यं ज्ञानमिति तु ब्रह्मपरं, जीवे तु नोपयुज्यते, ज्ञानाज्ञानसुखित्वदुःखित्वादिभिर्जीवानां भेदसिद्धौ सुतरामीश्वरभेदः सिद्ध्यति। अन्यथा बन्धमोक्षव्यवस्थानुपपत्तेः। योऽपीश्वराभेदबोधको वेदः सोऽपि तदभेदेन तदीयत्वं प्रतिपादयँस्तौति, अभेदभावनयैव यतितव्यमिति वदति। अत एव सर्वे आत्मानः समर्पिता इति श्रूयते।**

**व्याख्या-** अत्र मुक्तावलीकारो जीवात्मनः परमात्मनः (ईश्वरस्य) च भेदं प्रतिष्ठापयति। तथा च अद्वैतवेदान्तिभिः प्रदर्शितायाः 'सत्यं ज्ञानम्' इति श्रुतेः नैयायिकरीत्या व्याख्यां करोति। अस्य दण्डक्रमव्याख्यानमित्थं वर्तते-

ननु 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुत्या आत्मा ज्ञानस्वरूपः सिद्धः। तत्राह- "इति तु ब्रह्मपरम्, जीवे तु नोपपुज्यते"। इदं श्रुतिवाक्यं मुख्यतया ब्रह्म (परमात्मानं) लक्षयति न तु अस्माकं सदृशं संसारीणं जीवात्मानम्। जीवात्मनि तु ज्ञानम् आगन्तुको गुणो यश्च उत्पद्यते नश्यति च।

अत्र जीवपरमात्मनोर्भेदसाधकं प्रमाणं प्रस्तौति- "ज्ञानाज्ञानसुखित्वादिभिर्जीवानां भेदसिद्धौ सुतरामीश्वरभेदः सिद्ध्यति"। लोके दृश्यते यत् कश्चन पुरुषो ज्ञानी अन्यश्च अज्ञानी। कश्चन सुखी, कश्चन दुःखी। यदि आत्मा

एक एवाभविष्यत् तर्हि एकस्य सुखे सर्वेषामपि सुखं प्रसज्येत। जीवानां परस्परं विलक्षणानुभवात् तेषां नानात्वं सिद्ध्यति। यदा जीवा एव परस्परं भिन्नास्तर्हि अल्पज्ञो जीवः सर्वज्ञाद् ईश्वरात् तु सुतरां भिन्न एव।

अस्य भेदस्याङ्गीकारे मुख्यं कारणं तु "बन्धमोक्षव्यवस्थानुपपत्तेः" इति। यदि सर्वे जीवा एक एव आत्मा तर्हि एकस्य मोक्षे सर्वेषामपि मोक्षः प्रसज्येत, तथा च कश्चन मुक्तः कश्चन बद्ध इति व्यवस्था न सङ्गच्छते। अतः प्रतिशरीरं भिन्न आत्मा स्वीकार्यः।

ननु यदि भेदः सत्यस्तर्हि 'तत्त्वमसि' इत्यादिनामभेदबोधकवाक्यानां का गतिः ? इति प्रश्ने तत्राह- "योऽपीश्वराभेदबोधको वेदः सोऽपि तदभेदेन तदीयत्वं प्रतिपादयन् स्तौति"। वेदे योऽभेद उक्तः स वस्तुतोऽभेदो नास्ति अपि तु 'तदीयत्वं' (ईश्वरसम्बद्धत्वं) दर्शयति। यथा लोके भृत्यः स्वामिनि अनन्यभक्त्या अहमेव स्वामीति वदति (अथवा स्वामी भृत्यं 'ममात्मा' इति वदति) तथा अत्रापि स्तुतिपरमेतदिति बोद्धव्यम्।

अपि च- अभेदभावनयैव यतितव्यमिति वदति - मुमुक्षुरीश्वराराधनायै 'सोऽहमस्मि' इति अभेदभावनया ध्यानं कुर्यादिति उपदेशमात्रम्। अत्र 'सर्वे आत्मानः समर्पिताः' इति श्रुतिरपि जीवात्मनामीश्वरे आश्रितत्वमेव प्रमाणयति न तु तादात्म्यम्। इत्थं मुक्तावलीकारो जीवपरमात्मनोः भेदं सुदृढं प्रसाधितवान्।

**मुक्तावली- मोक्षदशायामज्ञाननिवृत्तावभेदो जायते इत्यपि न, भेदस्य नित्यत्वेन नाशासम्भवाद्, भेदनाशेऽपि व्यक्तिद्वयं स्थास्यत्येव। न च द्वित्वमपि नश्यतीति वाच्यम्। तव निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि सत्यत्वरूपं तदितिवद् द्वित्वाभावेऽपि व्यक्तिद्वयात्मकौ ताविति सुवचत्वाद्। मिथ्यात्वाभावोऽधिकरणात्मकस्तत्र सत्यत्वमिति चेद्, एकत्वाभावो व्यक्तिद्वयात्मको द्वित्वमित्यप्युच्यताम्, प्रत्येकमेकत्वेऽपि पृथिवीजलयोर्न गन्ध इतिवदुभयं नैकमित्यस्य सर्वजनसिद्धत्वाद्। योऽपि तदानीमभेदप्रतिपादको वेदः, सोऽपि निर्दुःखत्वादिना साम्यं प्रतिपादयति, सम्पदाधिक्ये पुरोहितोऽयं राजा संवृत्त इतिवद्। अत एव निरञ्जनः परमं साम्यमुपैतीति श्रूयते।**

**व्याख्या-** अत्र मुक्तावलीकारो वेदान्तिनां मुक्तिदशायामभेदो जायते इति मतं प्रबलतर्केण खण्डयति। नैयायिकमते आत्मा नित्यो वर्तते अतस्तस्य ईश्वरेण सह तादात्म्यं कदापि न सम्भवति। अत्र वेदान्ती वदति- संसारावस्थायां भेदो भासते परन्तु मोक्षदशायामज्ञानस्य (अविद्यायाः) निवृत्तौ सत्यां जीवब्रह्मणोरभेदो जायते। अस्य खण्डनार्थं नैयायिक आह- भेदस्य नित्यत्वेन नाशासम्भवात्। जीवात्मपरमात्मनोर्भेदो नित्यद्रव्यगतत्वाद् नित्योऽस्ति। किञ्च- यदि अद्वैतवादी ब्रूते यद् मोक्षे भेदो नश्यति तर्हि तत्राह- भेदनाशेऽपि व्यक्तिद्वयं स्थास्यत्येव। यदि कल्प्यते यद् भेदो नष्टस्तथापि जीवः पृथक् पदार्थ ईश्वरश्च पृथक् पदार्थ इति व्यक्तिद्वयं तु अवशिष्यते एव। द्वयोः पदार्थयोरत्यन्ताभेदः (एकत्वं) तदैव सम्भवति यदा एकस्य विनाशः स्यात्, परं जीवात्मा नित्य इति वेदान्तिनोऽपि अङ्गीकुर्वन्ति।

अत्र वेदान्ती पुनस्तर्कयति- मोक्षे द्वित्वं नश्यति केवलं ब्रह्म एवावशिष्यते। अस्य परिहारार्थं मुक्तावलीकारो वेदान्तिनामेव रीतिमनुसरन् आह- यथा भवतां मते निर्धर्मके ब्रह्मणि सत्यत्वं नाम कश्चन धर्मो नास्ति अपि तु मिथ्यात्वाभाव एव सत्यत्वम्, तथैवात्रापि एकत्वाभाव एव व्यक्तिद्वयात्मकं द्वित्वम्।

अयं भावः- यथा पृथिव्यां गन्धोऽस्ति जले च नास्ति अतः पृथिवीजलयोर्न गन्ध इति व्यवहारः सर्वेषां सिद्धस्तथैव उभयं नैकमिति व्यवहारः सार्वलौकिकः। यदि मोक्षेऽपि जीव ईश्वरश्च वर्तेते तर्हि तयोरेकत्वं वक्तुं न शक्यते। यतो हि एकत्वाभावस्तत्र अनिवार्यतया तिष्ठति।

इत्थं मुक्तावलीकारो जीवपरमात्मनोर्नित्यं भेदं प्रसाध्य मोक्षदशायामपि तयोर्व्यक्तिद्वयत्वं सुप्रतिष्ठितं करोति। एतेन अहं ब्रह्मास्मीति तादात्म्यवादो नैयायिकदृष्ट्या केवलं गौण उपचारात्मको वा सिद्धो भवति।

ननु यदि मोक्षेऽपि जीवपरमात्मनोः भेदस्तिष्ठति तर्हि अद्वैतप्रतिपादिकाः श्रुतयः किमर्थं सन्ति ? अस्य समाधानार्थं ग्रन्थकारः साम्यसिद्धान्तं प्रस्तौति। मोक्षदशायामज्ञाननिवृत्तौ सत्यां जीवः परमात्मना सहसभेदेन प्रतीयते परं सोऽभेदो वस्तुगतो नास्ति।

अत्र सम्पदाधिक्यन्याय उपपद्यते। यथा लोके कश्चन पुरोहितोऽतीव धनवान् वैभवशाली च जायते तर्हि जना वदन्ति- पुरोहितोऽयं राजा संवृत्तः (अयं पुरोहितो राजा एव जातः) इति। अत्र पुरोहितो वस्तुतो राजा न भवति परं राजसदृशवैभववत्त्वात् तत्र उपचारतोऽभेदव्यवहारः क्रियते। तथैव मोक्षदशायां जीवः शरीरेन्द्रियादिबन्धनमुक्तः सनीश्वरेण सह निर्दुःखत्वादिना (दुःखात्यन्ताभावेन) सदृशो भवति। अयं सदृशभाव एव उपचारतोऽभेद इति उच्यते।

अस्य भेदस्य पुष्ट्यर्थं ग्रन्थकारः श्रुतिप्रमाणं ददाति- निरञ्जनः परमं साम्यमुपैति (मुण्डकोपनिषत् ३.१.३) इति। अत्र श्रुतौ साम्यशब्दस्य प्रयोगः कृतः, न तु ऐक्यशब्दस्य। यदि जीवो ब्रह्म एवाभविष्यत् तर्हि साम्यं प्राप्नोतीति कथनं व्यर्थं स्यातद्, यतो हि साम्यं सर्वदा भिन्नयोः पदार्थयोरेव भवति (न हि घटो घटेन सदृश इति उच्यते)।

इत्थं मुक्तावलीकारोऽहं ब्रह्मास्मीति वाक्यानां परमसाम्यपरकत्वं प्रसाध्य जीवात्मनां नित्यं नानात्वं तस्येश्वराद् भेदं च सुदृढं प्रतिष्ठापयति। एतेन न्यायसिद्धान्तस्य 'आत्मनानात्ववादः श्रुतिसम्मत इति सिद्धं भवति।

**मुक्तावली- ईश्वरोऽपि न ज्ञानसुखात्मा किन्तु ज्ञानाद्याश्रयः। "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः, यः सर्वज्ञः स सर्वविद् इत्याद्यनुरोधाद्। आनन्दम् इत्यस्याप्यानन्दवदित्यर्थः। अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययः, अन्यथा पुँल्लिङ्गत्वापत्तेः। आनन्दोऽपि दुःखाभावे उपचर्यते, भाराद्यपगमे सुखी संवृत्तोऽहमितिवत्। अस्तु वा तस्मिन्नानन्दो नत्वसावानन्दः, असुखमिति श्रुतेः। न विद्यते सुखं यस्येति कुतो नार्थ इति चेन्न, क्लिष्टकल्पनापत्तेः, प्रकरणविरोधाद्, आनन्दमित्यत्र मत्वर्थीयाच्प्रत्यथविरोधाच्चेति सङ्क्षेपः॥**

**व्याख्या-** अत्र मुक्तावलीकार ईश्वरस्य (परमात्मनः) स्वरूपं नैयायिकदृष्ट्या परिशोधयति। वेदान्तिन ईश्वरं ज्ञानस्वरूपम् आनन्दस्वरूपं च मन्यन्ते परं नैयायिकास्तं 'ज्ञानाश्रयम्, एव अङ्गीकुर्वन्ति। तदित्थं वर्तते- ईश्वरोऽपि न ज्ञानसुखात्मा, किन्तु ज्ञानाद्याश्रयः। नैयायिकानां मते ईश्वरो ज्ञानस्वरूपो नास्ति, अपि तु ज्ञानाद्याश्रयोऽस्ति। अर्थाद् ज्ञानं तस्य धर्मो न तु स्वरूपम्। अत्र प्रमाणत्वेन "यः सर्वज्ञः स सर्ववित्" (मुण्डकोपनिषत्) इति श्रुतिः प्रस्तूयते। अत्र 'ज्ञ, इत्यनेनेश्वरस्य ज्ञानकर्तृत्वं (ज्ञानवत्त्वं) प्रतीयते। यदि ईश्वरो ज्ञानमेवाभविष्यत् तर्हि 'सर्वज्ञः, (सर्वं जानाति इति) इति व्यपदेशो न सङ्गच्छते।

ननु नित्यं विज्ञानमानन्दं ब्रह्म इति श्रुतौ तु ईश्वरस्य विज्ञान-आनन्दस्वरूपत्वं श्रूयते। तत्राह- अत्र विज्ञानपदेन ज्ञानाश्रय एव ग्राह्यः। तथैव आनन्दमोत्यस्यापि 'आनन्दवान्, इत्यर्थः। अत्र व्याकरणरीत्या अर्शआदिभ्यश्च (पाणिनि ५.२.१२७) इति सूत्रेण मत्वर्थीयोऽच्प्रत्ययः कृतः। अत आनन्दोऽस्यास्तीति आनन्दम्। यदि अयं शब्दः स्वरूपपरोऽभविष्यत् तर्हि आनन्द इति पुल्लिङ्गप्रयोगः स्याद्, न तु आनन्दमिति नपुंसकलिङ्गप्रयोगः।

पुनश्च ईश्वरस्य आनन्दविषये मतद्वयं प्रस्तौति-

१. दुःखाभावे उपचारः- ईश्वरे वस्तुतः सुखं नास्ति अपि तु दुःखाभाव एवानन्दपदेनोपचर्यते। यथा लोके भारभूतं वस्तु शिरसोऽवतार्य कश्चन वदति- इदानीं सुखी संवृत्तोऽहमिति। अत्र सुखोत्पत्तिर्न भवति केवलं दुःखस्यापगम एव सुखत्वेन प्रतीयते।

२. आनन्दाश्रयत्वम्- अस्तु वा ईश्वरे नित्यं सुखं (आनन्दः) तथापि स आनन्दवान् एव न तु आनन्दस्वरूपः। यतः असुखमिति श्रुतिरीश्वरे इन्द्रियजन्यप्राकृतसुखस्य निषेधं करोति।

अत्र कश्चन शङ्कते- असुखमित्यस्य न विद्यते सुखं यस्य (बहुव्रीहिः) इति अर्थं कृत्वा ईश्वरस्य सुखराहित्यं किमर्थं नोच्यते ? तत्राह- क्लिष्टकल्पनापत्तेः। एतादृशी कल्पना क्लिष्टा अस्ति। अपि च- ईश्वरोपासनाप्रकरणेन सह विरुद्धा। आनन्दमिति श्रुतौ मत्वर्थीयाच्प्रत्ययस्याङ्गीकार एव सरलो युक्तियुक्तश्चास्ति। इत्थं मुक्तावलीकार ईश्वरस्य ज्ञानान्दाश्रयत्वं प्रसाध्य तस्य द्रव्यत्वं नित्यत्वं च प्रतिष्ठापितवान्।

**मुक्तावली-एतेन-प्रकृतिः कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेपः किन्तु चेतनः। कार्यकारणयोरभेदात् कार्यनाशे सति कार्यरूपतया तन्नाशोऽपि न स्यादित्यकारणत्वं तस्य। बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनम्। बुद्धिश्च प्रकृतेः परिणामः, सैव महत्तत्वमन्तःकरणमित्युच्यते, तत्सत्त्वासत्वाभ्यां पुरुषस्य संसारापवर्गौ, तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना सम्बन्धः, पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहाद्। ममेदं कर्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया तत्प्रतिबिम्बादतात्त्विकः। दर्पणस्येव मुखोपरागः। इदमिति**

विषयोपराग इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विको निःश्वासाभिहतदर्पणस्येव मलिनिमा। कर्तव्यमिति व्यापारांशः, तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्याऽतात्त्विकः सम्बन्धो दर्पणस्य मलिनिम्नेव मुखस्योपलब्धिरुच्यते। ज्ञानवत् सुखदुःखेच्छाद्वेषधर्मधर्मा अपि बुद्धेरेव, कृतिसामानाधिकरण्येन प्रतीतेः। न च बुद्धिश्चेतना परिणामित्वादिति मतमपास्तम्।

**व्याख्या-** साङ्ख्या मन्यन्ते यद् जगति प्रकृतिरेव साक्षात् कर्त्री अस्ति, पुरुषः (आत्मा) तु सर्वथा अकर्ता निर्लेपश्च वर्तते। यथा जलमध्ये स्थितमपि पद्मपत्रं (पुष्करपलाशः) जलेन न लिप्यते तथैव पुरुषः संसारे स्थितोऽपि कर्मभिर्न लिप्यते। सः केवलं चेतनोऽस्ति। साङ्ख्यरीत्या पुरुषस्याकारणत्वं सिद्धम्, यतो यदि सः कारणं स्यात् तर्हि कार्यकारणयोरभेदात् कार्यनाशे (जगतः प्रलये) आत्मनोऽपि नाशः प्रसज्येत।

अत्र प्रश्नो भवति यद् यदि पुरुषोऽकर्ता तर्हि अहं करोमि, अहं सुखी, इति प्रतीतिः कथं जायते ? तत्र साङ्ख्याः 'बुद्धिगतचैतन्याभिमानं स्वीकुर्वन्ति। प्रकृतिः प्रवृत्ता सती प्रथमतो महत्तत्त्वम् (बुद्धिं) जनयति। इयमेव बुद्धिरन्तःकरणमित्युच्यते। बुद्धेः सत्त्वात् पुरुषस्य संसारो भवति तस्या अभावाच्चापवर्गो (मोक्षः) भवति।

बुद्धेर्व्यापारविशेष इत्थं वर्तते- बुद्धेः स्वच्छत्वात् तत्र पुरुषस्य-चैतन्यस्य प्रतिबिम्बं पतति। यथा दर्पणे मुखस्य प्रतिबिम्बं पतति तथा बुद्धौ पुरुषस्य प्रतिबिम्बोऽतात्त्विकोऽस्ति। बुद्धौ त्रयोंशा भवन्ति-१. मदंशः: मम इदं कर्तव्यमिति पुरुषस्य प्रतिबिम्बाज्जायमानोऽतात्त्विकोंऽशः। २. इदमंशः- इन्द्रियप्रणालिकया विषयैः (घटादिभिः) सह बुद्धेर्यः सम्बन्ध भवति सः तात्त्विकः परिणामः। यथा निश्वासाभिहतदर्पणे मलिनिमा तात्त्विकी भवति तथा इदमंशः। ३. कर्तव्यतांशः- कार्यप्रवृत्तिरूपो व्यापारः। एवं त्रिभिरंशैर्युक्ता बुद्धिरेव ज्ञानसुखदुःखेच्छाद्वेषधर्माधर्माणा माश्रयः।

साङ्ख्यमते कृतिसामानाधिकरण्येन (यः कर्ता स एव ज्ञानाश्रयः) प्रतीतेरेते सर्वे धर्मा बुद्धेरेव सन्ति। बुद्धेरचेतनत्वं तु तस्याः परिणामित्वात् (परिवर्तनशीलत्वात्) सिद्धम्।

अस्य साङ्ख्यमतस्य खण्डनं मुक्तावलीकार इति मतमपास्तमिति पदेन करोति। अस्य मुख्यो हेतुरयं यद्यदि बुद्धौ ज्ञानसुखादयः स्युस्तर्हि पुरुषे तेषां प्रतिसन्धानं (स्मरणम्) न सम्भवति। अन्येनानुभूतस्यान्येन स्मरणं न भवति इति नियमाद् बुद्धेरनुभवं पुरुषः स्मर्तुं न शक्नोति। अपि च- प्रतिबिम्ब-अतात्त्विकसम्बन्धाभिमानादीनां बहूनां पदार्थानां कल्पने महद् गौरवं भवति। लाघवात् तु शरीरादिव्यतिरिक्तः स्थिर आत्मा एव ज्ञानादीनां साक्षादाश्रय इति नैयायिकमतमेव युक्तम्।

मुक्तावली- कृत्यदृष्टभोगानामिव चैतन्यस्याऽपि सामानाधिकरण्यप्रतीतेः, तद्भिन्ने मानाभावाच्च। चेतनोऽहं करोमीति प्रतीतिश्चैतन्यांशे भ्रम इति चेत्, कृत्यंशेऽपि किं न नेष्यते ? अन्यथा

**बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्वमसंसारापत्तिः। नन्वचेतनायाः प्रकृतेः कार्यत्वाद् बुद्धेरचेतनत्वं कार्यकारणयोस्तादात्म्यादिति चेन्न- असिद्धेः, कर्तुर्जन्यत्वे मानाभावाद्। वीतरागजन्मादर्शनादनादित्वम्, अनादेर्नाशासम्भवान्नित्यत्वम्, तत् किं प्रकृत्यादिकल्पनेन ? न च- प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते इत्यनेन विरोध इति वाच्यम्। प्रकृतेः- अदृष्टस्य, गुणैः- अदृष्टजन्यैरिच्छादिभिः, कर्ताऽहमिति- कर्ताऽहमेवेत्यस्य तदर्थत्वात्। तत्रैवं सति कर्तारमात्मानं केवलं तु य इत्यादि वदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति सङ्क्षेपः।**

**व्याख्या-** यथा लोके कृति (प्रयत्नः) अदृष्टम् (पुण्यपापे) तथा भोगः (सुखदुःखानुभवः) एकाधिकरणे एवानुभूयन्ते तथैव चैतन्यमपि तैः सह सामानाधिकरण्येनैव प्रतीयते। अहं जानामि, अहं यते, अहं सुखीति प्रतीतिरात्मन्येव चैतन्यं साधयति। तस्मात् चैतन्याश्रयाद् भिन्ने बुद्ध्यादौ चैतन्यकल्पने किमपि प्रमाणं नास्ति।

यदि साङ्ख्यो ब्रूते- चेतनोऽहं करोमीति प्रतीत्यां चैतन्यांशो भ्रमोऽस्ति तर्हि नैयायिकः पृच्छति- कृत्यंशे (कर्तृत्वे) अपि भ्रमः किमर्थं न स्वीक्रियते ? यदि उभयत्र भ्रमस्तर्हि प्रतीतेः प्रामाण्यमेव विनश्येत्। किञ्च, साङ्ख्यमते बुद्धिः प्रकृतेः परिणामः। यदि बुद्धिर्नित्या स्यात् तर्हि कदापि मोक्षो न सम्भवेद्, यतो बुद्धेः सत्त्वादेव संसारः। यदि बुद्धिरनित्या (विनाशिनी) स्यात् तर्हि बुद्धेरुत्पत्तेः पूर्वं पुरुषस्य संसारो न भवेद्। अत उभयथापि दोषः।

साङ्ख्यः पुनस्तर्कयति- अचेतनायाः प्रकृतेः कार्यत्वाद् बुद्धिरपि अचेतनैव, यतः कार्यकारणयोस्तादात्म्यं भवति। अस्य समाधानं नैयायिकः करोति यद्- एतदपि असिद्धम्, यतः कर्तुः (आत्मनः) जन्यत्वे (उत्पत्तौ) किमपि प्रमाणं नास्ति। आत्मा तु अनादिरस्ति। वीतरागजन्मादर्शनादर्थाद् रागद्वेषौ जन्मान्तरसंस्कारादेव भवतोऽत आत्मनोऽनादित्वं सिद्धम्। यो भावपदार्थोऽनादिर्भवति स नित्य एव भवति। एवं च आत्मनो नित्यत्वे सिद्धे सति व्यर्था प्रकृत्यादिकल्पना न कार्या।

अत्र भगवद्गीतायाः प्रसिद्धं वचनं प्रस्तौति- प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। साङ्ख्योऽस्य अर्थं करोति यत् प्रकृतिरेव कर्माणि करोति, आत्मा तु केवलं भ्रमवशात् कर्ता इति मनुते। नैयायिकोऽस्य वचनस्य समन्वयमित्थं करोति- अत्र प्रकृतेरित्यस्यसर्थोऽदृष्टस्येति ग्राह्यः। गुणैरित्यस्यार्थोऽदृष्टजन्येच्छादिभिरिति। कर्ता अहमित्यस्यार्थः कर्ता अहमेव (अहमेव स्वतन्त्रः कर्ता) इति अहङ्कारस्य निषेधः।

स्वमतपुष्टये पुनराह- तत्रैवं सति कर्तारमात्मानं केवलं तु यः... (भ.गी. १८.१६) इति। अस्य तात्पर्यं नैयायिकरीत्या अस्ति यत्- केवलं (सहायकरहितं) आत्मानं यः कर्ता मनुते स भ्रान्तः। अत्र आत्मानमकर्तारं नोक्तमपि तु केवलकर्तृत्वस्य निषेधः कृतः, यतः कर्मणि अधिष्ठान-कर्ता-करण-चेष्टा-दैवरूप-पञ्चकारणानि अपेक्ष्यन्ते। इत्थं साङ्ख्यमतं निरस्य नैयायिक आत्मानं नित्यं विभुं ज्ञानाद्याश्रयं च प्रतिष्ठापयति।

**मुक्तावली- धर्माधर्मेति। आत्मेत्यनुषज्यते। शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणां देहान्तरेण भोगानुपपत्तेः। विशेषेति। योग्यविशेषगुणस्य ज्ञानसुखादेः सम्बन्धेनाऽत्मनः प्रत्यक्षत्वं सम्भवति न त्वन्यथा। अहं जानेऽहं करोमीत्यादिप्रतीतेः ॥**

**व्याख्या-** धर्माधर्मेति प्रतीकमुपादाय ग्रन्थकार आत्मनो धर्माधर्मयोः (पुण्यपापयोः) आश्रयत्वं व्यवस्थापयति। अत्र आत्मेति पदस्यानुषङ्गो भवति। यदि धर्माधर्मौ आत्मनि न स्वीक्रियेताम्, अपि तु शरीरस्य तदाश्रयत्वं स्वीक्रियेत, तर्हि महान् विरोधः प्रसज्येत। स च- देहान्तरकृतकर्मणां देहान्तरेण भोगानुपपत्तेः। अस्मिन् जन्मनि शरीरेण यानि कर्माणि कृतानि, तेषां फलं जन्मान्तरे नवीनशरीरेण कथं भोक्तुं शक्येत ? यतः शरीरं तु प्रतिजन्म भिद्यते। एवं सति कृतविप्रणाशः (कृतस्य कर्मणः फलभोगं विना नाशः) तथा अकृताभ्यागमः (अकृतस्य कर्मणः फलभोगः) इति दोषो भवेद्। अतः कर्मणां तज्जन्य-सुखदुःखानां च आश्रयः कश्चन स्थिर आत्मा एव भवितुं अर्हति।

ततः परं विशेषेति पदेन आत्मनः प्रत्यक्षविषये विवृणोति। न्यायसिद्धान्ते आत्मा मानसप्रत्यक्षविषयोऽस्ति। परं तस्य प्रत्यक्षं कदा भवति ? योग्यविशेषगुणस्य ज्ञानसुखादेः सम्बन्धेन। यदा आत्मनि ज्ञानं, सुखं, दुःखं वा उत्पद्यते, तदा तद्गुणविशिष्टतया एव आत्मनः प्रत्यक्षं भवति, न तु केवलस्य आत्मनः। यथा अहं जाने, अहं करोमि, अहं सुखी इति प्रतीतिर्भवति, अत्र अहमिति पदेन आत्मनः प्रत्यक्षं सिद्ध्यति।

अयं भावः- आत्मा विभुरस्ति, अतः तस्य चाक्षुषप्रत्यक्षं न सम्भवति। परं मनसा यदा आत्मनः सम्बन्धः भवति तदा आत्मनि विद्यमानैर्ज्ञान-सुखादिविशेषगुणैः सह तस्य प्रत्यक्षं जायते। एतादृशी प्रतीतिरेव आत्मनोऽस्तित्वे बलवत् प्रमाणम्।

**कारिका-** **प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः।**
**अहङ्कारस्याऽऽश्रयोऽयं मनोमात्रस्य गोचरः ॥ ५० ॥**

विभुर्बुद्ध्यादिगुणवान्---

**अन्वयः-** अयं रथगत्या सारथिः इव प्रवृत्त्याद्यनुमेयः, अयं अहङ्कारस्य आश्रयः, मनोमात्रस्य गोचरः विभुः बुद्ध्यादिगुणवान्।

**कारिकार्थः-** अयम् = आत्मा, रथगत्या = रथस्य गत्या सारथिरिव = यथा रथसंचालको ज्ञायते (तद्वत्) प्रवृत्त्याद्यनुमेयो = प्रयत्न-इच्छादिभिः अनुमानयोग्यो भवति परकीयदेहादौ इत्यर्थः। अयम् = आत्मा, अहंकारस्याश्रयः = 'अहम्' इति बुद्धेः आश्रयः, मनोमात्रस्य = केवलं मनोरूपेन्द्रियस्य गोचरः = प्रत्यक्षविषयो भवति। एवं विभुः-व्यापकस्तथा बुद्ध्यादिगुणवान् च अस्ति।

**मुक्तावली- प्रवृत्त्येति। अयमात्मा परदेहादौ प्रवृत्त्यादिनाऽनुमीयते। प्रवृत्तिरत्र चेष्टा, ज्ञानेच्छाप्रयत्नादीनां देहेऽभावस्योक्तप्रायत्वाच्चेष्टायाश्च प्रयत्नसाध्यत्वात्। चेष्टया प्रयत्नवानात्माऽनुमीयत इति भावः। अत्र दृष्टान्तमाह- रथेति। यद्यपि रथकर्म चेष्टा न भवति तथाऽपि तेन कर्मणा सारथिर्यथाऽनुमीयते तथा चेष्टात्मकेन कर्मणा परात्माऽनुमीयत इति भावः। अहङ्कारस्येति। अहङ्कारः- अहमिति प्रत्ययः, तस्याऽश्रयः- विषय आत्मा न शरीरादिरिति। मन इति। मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चेत्यर्थः। रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात्। विभुरिति। विभुत्वं परममहत्परिमाणवत्त्वम्। तच्च पूर्वमुक्तमपि स्पष्टार्थमुक्तम्। बुद्ध्यादिगुणवानिति। बुद्धिसुखदुःखेच्छादयश्चतुर्दश गुणाः पूर्वमुक्ता वेदितव्याः।।**

**व्याख्या-** प्रवृत्त्येति प्रतीकमुपादाय ग्रन्थकार आत्मनः परकीयशरीरेषु कथमस्तित्वं सिद्धं भवति इति विवृणोति। अयं आत्मा परशरीरादौ प्रवृत्त्यादिना अनुमीयते। अत्र प्रवृत्तिशब्देन चेष्टा गृह्यते। यतो हि पूर्वमेव साधितं यत् ज्ञान-इच्छा-प्रयत्नादयो जडदेहे न सम्भवन्ति, अतो देहे या चेष्टा दृश्यते सावश्यमेव कस्यचित् प्रयत्नवतः प्रेरकस्य सत्तां सूचयति। नियमोऽस्ति यत्-चेष्टा प्रयत्नसाध्यत्वादिति। एवं चेष्टारूपहेतुना तस्याः चालकः प्रयत्नवान् आत्मा अनुमीयते।

अत्र अर्थं स्पष्टयितुं रथ इति दृष्टान्तं प्रस्तौति। यद्यपि रथस्य गतिः चेष्टा न उच्यते (यतो हि चेष्टा केवलं प्राणिनामेव भवति), तथापि यथा रथादौ कर्म दृष्ट्वा तस्य प्रेरकः कश्चन सारथिरनुमीयते तथैव परशरीरेषु हितप्राप्ति-अहितपरिहाररूपां चेष्टां दृष्ट्वा तस्य चालकः कश्चन परात्माऽनुमीयते।

अयं भावः- यथा जडो रथः स्वयमेव न चलति, तथा जडं शरीरमपि विना आत्मानं चेष्टितुं न शक्नोति। अतोऽस्माकं शरीरे इव परशरीरेष्वपि कश्चन चेतन आत्मा अवश्यं वर्तत इति अनुमानप्रमाणेन सिद्धं भवति। एवं च आत्मनो नानात्वमपि अनेनैव मार्गेण द्रढीभवति।

अहङ्कारस्येति प्रतीकमुपादाय ग्रन्थकार आत्मनः प्रतीतिस्वरूपं निर्दिशति। अत्र अहङ्कारः नाम अहमिति प्रत्ययः। तस्य आश्रयः, अर्थात् तस्य प्रत्ययस्य विषय आत्मा एव न तु शरीरादिः। यतो हि अहं जाने इति प्रतीतिर्ज्ञानस्य आश्रयं विषयीकरोति, ज्ञानं चात्मन एव गुणो न तु शरीरस्य। अतः 'अहम्' इति शब्देन शरीरादिभ्यो व्यतिरिक्त आत्मा एव परामृश्यते।

ततः परं मन इति पदेन आत्मनः प्रत्यक्षग्राह्यत्वं विवृणोति। अत्र मनोमात्रस्य गोचर इत्यस्य अर्थोऽस्ति यत्-मनोभिन्नेन्द्रियजन्य-प्रत्यक्षाविषयः। अर्थात् चक्षु-श्रोत्रादिभिरिन्द्रियैरात्मनः प्रत्यक्षं न सम्भवति, यत आत्मनि रूपाद्यभावो वर्तते। केवलं मानसप्रत्यक्षविषय एव आत्मा अस्ति। यदा मनसा आत्मनः संयोगो भवति, तदा अहं सुखीति मानसप्रत्यक्षं जायते।

विभुरिति पदेन आत्मनः परिमाणं सूचयति।विभुत्वं नाम परममहत्परिमाणवत्त्वम्। यद्यपि एषः विषयः पूर्वमपि उक्तः, तथापि अत्र स्पष्टप्रतिपत्त्यर्थं पुनरुक्तः। आत्मा व्यापकोऽस्ति, अतः एव स नित्यस्तथा सर्वत्र विद्यमानैः मनःशरीरादिभिः सह सम्बद्धुं शक्नोति।

अन्ते बुद्ध्यादिगुणवानिति पदेन आत्मनो विशेषगुणान् स्मारयति। आत्मनि बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्माधर्म-संस्कारादयः चतुर्दश गुणाः (९ विशेषगुणाः + ५ सामान्यगुणाः) तिष्ठन्ति। एतेषां गुणानामाश्रयत्वादेव आत्मनो जडशरीरादिभ्यो भेदः सिद्ध्यति।

इत्थं मुक्तावलीकार आत्मनः प्रत्यक्षविषयत्वं, व्यापकत्वं तथा तस्य विशेषगुणत्वञ्च सुस्पष्टं प्रसाधितवान्।

## पदानामर्थपरिचयः

| | | |
|---|---|---|
| **आलयविज्ञानधारा** | = | क्षणिकविज्ञानानां सुषुप्तिकाले जायमानप्रवाहः |
| **अपोहः** | = | अतद्व्यावृत्तिः |
| **विभुत्वम्** | = | परममहत्परिमाणवत्त्वम् |
| **प्रतिसन्धानम्** | = | अनुभवस्मरणयोः सामानाधिकरण्यम् |
| **अतद्गुणसंविज्ञानानुपपत्तिः** | = | अन्यस्य धर्मोऽन्यस्मिन् असङ्क्रमणम् |
| **प्रतिबिम्बवादः** | = | साङ्ख्यमते बुद्धौ पुरुषस्य चैतन्यच्छायायाः पतनम् |
| **सामानाधिकरण्यम्** | = | एकाधिकरणवृत्तित्वम् |

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत।

(क) बौद्धमते आलयविज्ञानधारा कदा प्रवहति ?

(ख) "मृगमदवासनान्यायः" कस्य उपपत्तये बौद्धैः प्रयुक्तः ?

(ग) नैयायिकमते आत्मा ज्ञानस्वरूपोऽस्ति वा ज्ञानाश्रयः ?

(घ) 'अहम्' इति प्रत्ययस्य विषयः कः ?

(ङ) परदेहादौ आत्मनः सिद्धिः केन प्रमाणेन भवति ?

(च) 'परमं साम्यम्' इति श्रुतेर्नैयायिकरीत्या कोऽर्थः ?

### २. व्याख्यात्मकमुत्तरं लिखत

(क) "विज्ञानमेव आत्मा" इति बौद्धमतं नैयायिकैः कया युक्त्या निरस्तम् ? इति व्याख्यात।

(ख) साङ्ख्यमते सुखदुःखादीनां बुद्धिनिष्ठत्वं किमर्थं न सङ्गच्छते ?

(घ) परशरीरे आत्मानुमानं सन्दर्श्य चेष्टारूपहेतोर्विश्लेषणं कुरुत।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) वासनासङ्क्रमवादे मातृपुत्रयोरतिप्रसङ्गं विवेचयत।

(ख) पुरुषस्याताात्त्विकसम्बन्धकल्पने गौरवदोषं विवेचयत।

(ग) "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेरीश्वरपरत्वं प्रदर्श्य बन्धमोक्षव्यवस्थानुरोधेन जीवानां नानात्वं साधयत।

## ४. परस्परं मेलयत

| | |
|---|---|
| चार्वाकमते | अयावद्द्रव्यभावित्वदोषः |
| क्षणिकविज्ञानवादे | मृतेषु व्यभिचारदोषः |
| मनश्चैतन्यवादे | अनन्तसंस्कारकल्पनागौरवम् |
| साङ्ख्यमते | मानसप्रत्यक्षानुपपत्तिः |
| नैयायिकमते | अनुभवस्मरणसामानाधिकरण्यम् |

## ५. पदच्छेदं कुरुत

आत्मेन्द्रियाद्यधिष्ठाता, नाशासम्भवात्, सामानाधिकरण्यम्।

## *परियोजनाकार्यम्-*

आत्मनोऽस्तित्वसाधकानां तर्काणां (करणलिङ्गस्मृतिलिङ्गस्तन्यपानलिङ्गानां) एकं सुन्दरं रेखाचित्रं रचयत।

विंशः पाठः

# बुद्धिस्वरूपनिरूपणम्

इदानीं प्रसङ्गसङ्गत्या बुद्धिभेदनिर्देशपुरस्सरं बुद्धिस्वरूपं प्रतिपादयितुमारभते ग्रन्थकारः-

**कारिका-** --- **बुद्धिस्तु द्विविधा मता ॥**

**अनुभूतिः स्मृतिश्च स्यात् अनुभूतिश्चतुर्विधा ॥ ५१ ॥**

**प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ।**

**अन्वयः-** बुद्धिस्तु द्विविधा मता। अनुभूतिः स्मृतिश्च, अनुभूतिः चतुर्विधा स्यात्, प्रत्यक्षम् अनुमितिः तथा उपमितिशब्दजे अपि।

**कारिकार्थः-** बुद्धिः तु अनुभूतिस्मृतिभेदेन द्विविधा अस्ति। एवम् अनुभूतिः पुनः प्रत्यक्षानुमानोपमानशब्दभेदेन चतुर्विधा भवतीति कारिकार्थः।

इदानीं प्रसङ्गसङ्गत्या बुद्धिस्वरूपं प्रकाशयति मुक्तावलीकारः-

**मुक्तावली- अत्रैव प्रसङ्गात् कतिपयं बुद्धेः प्रपञ्चं दर्शयति। द्वैविध्यं व्युत्पादयति अनुभूतिरिति। आसां चतसृणां करणानि चत्वारि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रोक्तानि वेदितव्यानि। इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्। यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानं तथाऽपीन्द्रियत्वेन रूपेणेन्द्रियाणां यत्र ज्ञाने करणत्वं तत्प्रत्यक्षमिति विवक्षितम्। ईश्वरप्रत्यक्षं तु न लक्ष्यम्, इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति सूत्रे तथैवोक्तत्वात्। अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्। अनुमितौ व्याप्तिज्ञानस्य, उपमितौ सादृश्यज्ञानस्य, शाब्दबोधे पदज्ञानस्य, स्मृतावनुभवस्य करणत्वात्तत्र नातिव्याप्तिः। इदंलक्षणमीश्वरप्रत्यक्षसाधारणम्।**

**व्याख्या-** प्रसङ्गसङ्गत्या बुद्धेरात्मगुणत्वात् तत्स्वरूपं प्रपञ्चयितुमारभ्यते। यतो हि "बुद्ध्यादिषट्कं सङ्ख्यादिपञ्चकं भावना तथा। धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश" इत्यत्र साधर्म्यनिरूपणावसरे आत्मनो विद्यमाना बुद्ध्यादयश्चतुर्दश गुणा उक्ताः। (श्रोतृभेदेन जीवात्मा परमात्मा चेति द्वैविध्यम्)। अत्रात्मपदेन जीवात्मा

गृह्यते, तत्र समवायसम्बन्धेन बुद्धिनामको गुणो वर्तते। सा बुद्धिः का ? तत्स्वरूपञ्च किमिति शिष्यजिज्ञासायां तत्प्रपञ्चं प्रदर्शयितुं ग्रन्थोऽयं प्रवर्तते। "बुद्धिस्तु" इत्यत्र 'तु' इत्यव्ययपदं श्रूयते। तच्च निश्चयार्थकम्। नैयायिका बुद्धिः, उपलब्धिः, ज्ञानम्, इति पदानां समानार्थकत्वं स्वीकुर्वन्ति। यथोक्तं महर्षिणा गौतमेन-"बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्" (न्या. सू. १.१.१५)।

अर्थाद् बुद्धिरुपलब्धिज्ञानमित्येतत् त्रयमर्थान्तरं न भवति। एवंभूता बुद्धिः 'अनुभूतिः', 'स्मृतिः' चेति द्विविधा। अर्थाद् अनुभवात्मकं ज्ञानं स्मरणात्मकं ज्ञानञ्चेति बुद्धेर्द्वैविध्यमित्यर्थः। तत्र अनुभूतिः = द्वयोर्मध्ये यदनुभवात्मकं ज्ञानं सा अनुभूतिः। सा च चतुर्विधा- प्रत्यक्षम्, २. अनुमितिः, ३. उपमितिः, ४. शाब्दश्चेति। एतासाम् प्रत्यक्षानुमित्युपमितिशाब्दरूपाणां प्रमितीनां करणानि = असाधारणकारणानि अपि चत्वारि भवन्ति, १. प्रत्यक्षम्, २. अनुमानम्, ३. उपमानम्, ४. शब्दश्च। यतो हि प्रमितीनां भेदेन तत्करणान्यपि भिद्यन्तेऽतः प्रमितयश्चतस्रस्तसां करणानि यानि भवन्ति तान्येव प्रमाणानि उच्यन्ते।

नैयायिकाः प्रमेयसाधकानि प्रत्यक्षानुमानोपमानशब्दरूपाणि प्रमाणानि स्वीकुर्वन्ति। तदेव स्फुटीकरोति ग्रन्थकारः- सूत्रोक्तानि वेदितव्यानि। न्यायसूत्रे प्रमाणत्वेनोपदिष्टानि चत्वारि प्रमाणानीत्यर्थः। यथोक्तम्- "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" (१।१।३)। तत्र केचन मीमांसकादयो दार्शनिका अर्थापत्तिः, अनुपलब्धिः, सम्भवः, ऐतिह्यमित्यादीनि प्रमाणानि स्वीकृत्य तदनुसारेण स्वसिद्धान्तं व्यवस्थापयन्ति, किन्तु नैयायिकाश्चतुर्षु एव प्रमाणेषु तदतिरिक्तानां प्रमाणानामन्तर्भावं विधाय चतुर्विधमेव प्रमाणं न ततो न्यूनं न वाऽधिकमिति प्रमाणचतुष्टयवादं सिद्धान्तयन्ति। अतः परं यथाक्रमं प्रत्यक्षप्रमाया लक्षणमुच्यते- "तत्र इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्" इति। अत्र प्रत्यक्षमिति लक्ष्यबोधकं पदम्, इन्द्रियजन्यं ज्ञानमिति लक्षणबोधकं पदम्। तथा च इन्द्रियजन्यत्वे सति ज्ञानत्वं प्रत्यक्षानुभवस्य लक्षणम्। तत्र इन्द्रियाणि षट्- चक्षुः, घ्राणम्, रसना, त्वक्, श्रोत्रम्, मनश्च। एतानि हीन्द्रियाणि गन्ध-रूप-रस-स्पर्शादिविषयान् प्रत्यक्षीकुर्वन्ति। मनसा च सुखदुःखादिकं साक्षात्क्रियते। अर्थात् सुखदुःखादेर्मानसं प्रत्यक्षं भवति। घ्राणादिना रूपगन्धादिविषयकं प्रत्यक्षं जायते अत इन्द्रियजन्यत्वस्य ज्ञानत्वस्य च गन्धादिप्रत्यक्षे मानसप्रत्यक्षे च सत्त्वाद् भवति लक्ष्ये लक्षणसमन्वयः। अनुमित्यादेश्च व्याप्तिज्ञानादिजन्यत्वान्नातिव्याप्तिः। उक्तलक्षणे ह्येका शङ्का जायते- इन्द्रियजन्यं ज्ञानं प्रत्यक्षमित्युच्यते चेत्तन्नोचितम्। तत्कथमिति चेत्- सर्वाणि ज्ञानानि इन्द्रियजन्यानि भवन्ति, आत्ममनःसंयोगस्य ज्ञानमात्रकारणत्वान्मनोरूपं यदिन्द्रियं तज्जन्यं सर्वमेव ज्ञानं भवतीति प्रत्यक्षलक्षणस्य अलक्ष्येऽनुमित्यादावपि गमनाद् भवत्युक्तलक्षणमतिव्याप्तिदोषग्रस्तम्। अतश्चोक्तम्- यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानमिति। ज्ञानोपयोगी कश्चन क्रमो नैयायिकैर्निर्धारितो वर्तते। तद्यथा- प्रथममिन्द्रियेण सह विषयस्य सम्बन्धस्ततः परमिन्द्रियं मनसा युज्यते तदनु मनस आत्मना सह सम्बन्धस्ततश्चात्मनि तद्विषयकं ज्ञानं जायते। अमुमेव क्रममाश्रित्य हि सर्वमपि ज्ञानं जायते। एतेन सर्वस्यापि ज्ञानस्य मनोरूपेन्द्रियजन्यत्वाद् भवति प्रत्यक्षलक्षणमतिव्याप्तम्। अनया रीत्या शङ्कापक्षमुद्भावयन् ग्रन्थकारस्तत्समाधानं कुरुते- तथापीत्यादिना ग्रन्थेन।

अयमभिप्राय:- यद्यपि पूर्वोक्ता शङ्का समुचितैव तथापि सा शङ्काऽनेन प्रकारेण समाधातुं शक्यते। मनसि इन्द्रियत्वं मनस्त्वमिन्द्रियत्वञ्चेति धर्मद्वयं वर्तते। तत्र यद्यपि यावन्ति ज्ञानानि तानि मनोरूपेन्द्रियजन्यानीति सर्वानुभवसिद्धम्, आत्ममन:संयोगस्य ज्ञानमात्रं प्रति कारणत्वादिति वस्तुस्थिति:। तथापि तादृशं ज्ञानं प्रति मनस्त्वेन रूपेण मनस: कारणत्वं न तु इन्द्रियत्वेन रूपेण। प्रत्यक्षं यज्ज्ञानं जायते, तज्ज्ञानं प्रति मनस्तावदिन्द्रियत्वेन रूपेण कारणं भवति। तथा च प्रत्यक्षलक्षणमित्थं भवति- इन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्यतावत्त्वे सति ज्ञानत्वं प्रत्यक्षस्य लक्षणम्। अनेन चक्षुरादीन्द्रियनिष्ठजनकतानिरूपितजन्यतावत्त्वं ज्ञानत्वञ्च रूपादिप्रत्यक्षे सत्त्वाद् भवति प्रत्यक्षलक्षणस्य लक्ष्ये समन्वय:। अनुमित्यादौ तु इन्द्रियजन्यत्वं नास्तीति नातिव्याप्ति:। अतश्चोक्तम्- इन्द्रियत्वेन रूपेणेति। अर्थात् प्रत्यक्षलक्षणे इन्द्रियत्वेन रूपेण चक्षुरादीन्द्रियाणां कारणत्वमिति निवेशनीयम्। तथा सति पूर्वोक्ताया: शङ्काया: समाधानं जायते। पुनरत्रान्या शङ्का जायते- प्रत्यक्षलक्षणमिदमीश्वरप्रत्यक्षे न सङ्गच्छते ईश्वरप्रत्यक्षस्य नित्यत्वात् तत्रेन्द्रियजन्यत्वं नास्तीति तत्राव्याप्तमत आह- ईश्वरप्रत्यक्षं तु न लक्ष्यम्। एतत्प्रत्यक्षलक्षणलक्ष्यम् ईश्वरप्रत्यक्षं न वर्तते। अलक्ष्ये (ईश्वरप्रत्यक्षे) लक्षणस्यागमनमुचितमेव। अमुं विषयं प्रमाणयितुं सूत्रोक्तं लक्षणं प्रस्तौति ग्रन्थकार:–

"इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" (न्या.सू. १।१।४)

इति महर्षिगौतमोक्तं प्रत्यक्षलक्षणबोधकं न्यायसूत्रम्। तत्रेन्द्रियार्थसन्निकर्षोत्पन्नमिति विशेषणपदं दत्तं वर्तते, तेन इदं सिद्धं भवति यद् एतत्प्रत्यक्षलक्षणं जन्यप्रत्यक्षमात्रं लक्ष्यीकृत्य विहितं न तु नित्येश्वरप्रत्यक्षमादाय, अतो न कोऽपि दोषावसर इति।

इदानीमनुमितिलक्षणं व्याख्याति परिष्करोति च-

**मुक्तावली- परामर्शजन्यं ज्ञानमनुमिति:। यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शजन्यं हेत्वविषयकं ज्ञानं तदेवानुमिति:। न चकादाचित्कहेतुविषयकानुमितावव्याप्तिरिति वाच्यम्। तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमिति:। एवं सादृश्यज्ञानकरणकं ज्ञानमुपमिति:। पदज्ञानकरणकं ज्ञानं शाब्दबोध:। वस्तुतो यां काञ्चिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तित्वे सति यां काञ्चित् प्रत्यक्षव्यक्तिमादाय तदवृत्तिजातिमत्त्वमनुमितित्वम्। एवं यत्किञ्चित्प्रत्यक्षादिकमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति।**

**व्याख्या-** प्रसङ्गसङ्गत्या क्रमप्राप्तमनुमित्युपमिति- शाब्दप्रमितीनां नैकविधानि लक्षणानि प्रस्तुत्य विचार्यन्ते। तत्रादौपरामर्शजन्यं ज्ञानमनुमिति:। अत्र अनुमितिपदं लक्ष्यबोधकञ्चेत् परामर्शजन्यं ज्ञानमिति दलं लक्षणबोधकम्। तथा च परामर्शजन्यत्वे सति ज्ञानत्वमनुमितेर्लक्षणम्। पर्वतो वह्निमानित्यनुमितौपरामर्शजन्यत्वं ज्ञानत्वञ्च वर्तत इति भवति लक्ष्ये समन्वय:। अत्र परामर्शजन्यत्वपदानुक्तौ ज्ञानत्वं प्रत्यक्षादावपि सत्त्वाद् भवत्यतिव्याप्तिरतस्तद्वारणाय

परामर्शजन्यत्वमिति विशेषणदलमावश्यकम्। तथैव ज्ञानत्वपदानुक्तौ परामर्शानन्तरं जायमानं "वह्निव्याप्यधूमवानयं पर्वत" इत्याकारकं यत् परामर्शप्रत्यक्षं तस्य परामर्शजन्यत्वात् तादृशपरामर्शप्रत्यक्षेऽनुमितिलक्षणमतिव्याप्तम्। अतस्तद्वारणायानुमितिलक्षणे हेत्वविषयकत्वं निवेशनीयम्। तथा च परामर्शजन्यत्वे सति हेत्वविषयकत्वे सति ज्ञानत्वमनुमितेर्लक्षणं निष्पन्नं भवति। उक्तपरामर्शप्रत्यक्षस्य हेतुविषयकत्वात् तत्र लक्षणसमन्वयो न भवितुमर्हतीति नातिव्याप्तिः। यतो हि- एवमनुमितिलक्षणे कृते च परामर्शप्रत्यक्षे हेतुरपि विषयभूतः। अर्थाद् "वह्निव्याप्यधूमवान् अयम्" इति यत्परामर्शजन्यं परामर्शस्य प्रत्यक्षं तद्विषयत्वेन धूमोऽपि, स च हेतुरिति परामर्शजन्यपरामर्शप्रत्यक्षस्य हेतुविषयकत्वमेव न तु हेत्वविषयकत्वमिति न तत्रातिव्याप्तिः। अनया रीत्या अनुमितिलक्षणे हेत्वविषयकत्वपदं निवेशनीयं भवति। "पर्वतो वह्निमान्" इत्यनुमितौ तु परामर्शजन्यत्वस्य हेत्वविषयकत्वस्य ज्ञानत्वस्य च सत्त्वाद् भवति लक्ष्ये लक्षणसमन्वयः।

अत्र संक्षेपेणानुमितिप्रक्रिया निर्दिश्यते-

तद्यथा- येन पुरुषेण धूमवति महानसादौ सर्वत्र वह्निसत्त्वं प्रत्यक्षीकृतं स एव पुरुषः पश्चात् पर्वतादौ धूमं पश्यति। ततः परं तस्य "यत्र यत्र धूमस्तत्र तत्र वह्निः" इति साहचर्यनियमेन व्याप्तिस्मरणं जायते। ततः परं तस्यैव पुरुषस्य "वह्निव्याप्यधूमवानयं पर्वत" इत्याकारकं ज्ञानं जायते तच्च परामर्शात्मकं ज्ञानमित्युच्यते। एतादृशं परामर्शात्मकं ज्ञानं तृतीयक्षणे जायते। इदमपि ज्ञानं एतस्मादेव ज्ञानात् पर्वते वह्निव्याप्यधूमवानयं पर्वत' इत्याकारकपरामर्शात् वह्निमानित्यनुमितिर्भवति। एतेन अनुमितिजनकः परामर्शो भवतीति निश्चीयते। एतत्सर्वमनुमाननिरूपणावसरे अनुमानखण्डे व्यक्तीभविष्यति।

पुनस्त्वत्र ह्येका शङ्का समुदेति- कदाचिद् 'धूमवान् पर्वतो वह्निमान्' इत्याकारिका पक्षतावच्छेदकविधया हेतुविषयिणी अनुमितिर्जायते चेत्तादृश्यनुमितिरपि प्रामाणिकी। अनुमितिलक्षणलक्ष्या चेति हेत्वविषयकत्वस्य तत्र विरहाद् भवत्यव्याप्तिः। कदाचिद् धूमो विषयभूत एवेति तादृशज्ञाने हेत्वविषयकत्वं न भवितुमर्हतीति तादृशानुमितौ निरुक्तमनुमितिलक्षणं न सङ्गच्छते। तस्मादिदमनुमितिलक्षणमव्याप्तिदोषग्रस्तम्।

अत्रेदमवधेयम्- मूलस्थ 'न च' इत्यस्य 'वाच्यम्' इति क्रियापदेन सहान्वयं विधाय लक्षणेऽव्याप्तिदोषं प्रदर्श्य तत्परिहारो विधेयः। ततः परमिति वाच्यम्, न च वाच्यमिति रीत्या अर्थनिर्धारणं विधेयम्। अर्थात् पूर्वोक्तरीत्या अनुमितिलक्षणे दोषः प्रदर्श्यते चेत् तन्न सम्भवतीति तात्पर्यम्। अत एव पूर्वोक्तं लक्षणं परित्यज्य जातिघटितमनुमितिलक्षणमुच्यते- "तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्" इत्यादिना। अत्र 'तादृशज्ञान'पदेन व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यानुमित्यात्मकं पर्वतो वह्निमानित्याकारकं ज्ञानं गृह्यते, तच्चानुभवात्मकम्। तत्र वृत्तिः = वर्तमाना या अनुभवत्वव्याप्या अनुमितित्वजातिः। समवायसम्बन्धेन तादृशानुमितित्वजातिस्तत्र सर्वासु अनुमितिषु वर्तते। अतो 'धूमवान् पर्वतो वह्निमान्' इत्यादौ अपि सुलभैवेति नाव्याप्तिः। अथवा जातिघटितं लक्षणं गुरुभूतम्। अतस्तदपेक्षया लघुभूतमनुमितिलक्षणं प्रस्तुतौति ग्रन्थकारः- "व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः"। अनुमित्यात्मकं ज्ञानं प्रति

व्याप्तिज्ञानं करणं भवति। व्याप्तिज्ञानं करणं यत्र इति बहुव्रीहिसमासे कृते 'व्याप्तिज्ञानकरणकम्' इति समस्तपदं निष्पद्यते। अनुमित्यात्मकं ज्ञानं प्रति व्याप्तिज्ञानस्यैव करणत्वं वर्तते। तथा च "धूमो वह्निव्याप्य:" इत्याकारकं यद् व्याप्तिज्ञानं तत्करणकं 'पर्वतो वह्निमान्' इत्याकारकं ज्ञानमनुमित्यात्मकं ज्ञानं वर्तत एवेति भवति लक्षणसमन्वय:।

एतादृशानुमितिलक्षणे कृते सति हेतुविषयिणी 'धूमवान् पर्वतो वह्निमान्' इत्याकारिकानुमिति:, हेतुविषयिणी 'पर्वतो वह्निमान्' इत्याकारिकाऽनुमितिर्वा भवतु सर्वासामनुमितीनां व्याप्तिज्ञानकरणकत्वाद् ज्ञानत्वाच्च लक्ष्यमात्रे अनुमितिलक्षणसमन्वयात्पूर्वलक्षणमपेक्ष्य लघुभूतमिदं लक्षणमुपस्थापितं मुक्तावलीकारेण। यतो हि परामर्शजन्यं ज्ञानं यदनुमितिलक्षणन्तस्य व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यमर्थ:। तत्र पक्षधर्मतानिवेशे सति तल्लक्षणं गुरुभूतमिति स्पष्टमेव। तदपेक्षया व्याप्तिज्ञानकरणकं ज्ञानमिति लघुभूतमनुमितिलक्षणं विहितम्।

तथैव सादृश्यज्ञानकरणकं ज्ञानमुपमितेर्लक्षणम्। "गवयो गवयपदवाच्य:" इत्याकारकं यदुपमित्यात्मकं ज्ञानं प्रति "गोसदृशो गवय:" इत्याकारकं सादृश्यज्ञानं करणं भवतीति सादृश्यज्ञानकरणकत्वस्य ज्ञानत्वस्य च निरुक्तोपमित्यात्मके ज्ञाने सत्त्वाद् भवति लक्षणसमन्वय:।

एवमेव पदज्ञानकरणकं ज्ञानं शाब्दबोधस्य लक्षणम्। अत्रापि पूर्ववच्छाब्दबोधं प्रति पदज्ञानमेव करणं भवतीति "अयं घट:" इत्यत्र घटत्वप्रकारक-घटविशेष्यक-समवायसंसर्गकशाब्दबोधे कर्तव्ये शक्तिज्ञानसहकृतं पदज्ञानं करणं भवति। एवं पदज्ञानकरणकत्वस्य ज्ञानत्वस्य च निरुक्ते शाब्दबोधे सत्त्वाद् भवति लक्षणसमन्वय:। एतत्सर्वं शब्दखण्डे शाब्दबोधप्रक्रियानिरूपणावसरे व्यक्तिर्भविष्यति।

विशेषजिज्ञासुभिस्तत्तत्प्रकरणं दृष्ट्वा एतत्सम्बद्धा विषया: सम्यक्तया अवधारयितुं शक्यन्ते।

अत: परं वस्तुत: पक्षानुसारेण जातिघटितानुमितिस्वरूपं प्रतिपाद्यते- "एवमित्यादिना"। तथा च या काचिदनुमितिव्यक्ति:- "पर्वतो वह्निमान्", "धूमवान् पर्वतो वह्निमान्" इत्यद्यनुमित्यात्मिका व्यक्तिरर्थाद् यावत्योऽनुमितिव्यक्तय: सम्भवन्ति ता: सर्वा अनुमितिव्यक्तीरादाय = गृहीत्वा तद्व्यक्तिषु वृत्ति: = वर्तमाना या प्रत्यक्षे अवृत्ति: = अवर्तमाना जाति: = अनुमितित्वजाति:, तादृशानुमितित्वजातिमत्त्वं सर्वासु अनुमितिषु वर्तत इति भवति सर्वत्र अनुमितिषु लक्षणसमन्वय:। अत्र प्रत्यक्षेऽतिव्याप्तिवारणाय जातौ प्रत्यक्षावृत्तित्वविशेषणं निवेशनीयम्। तथा च न कोऽपि दोष:। तेन प्रत्यक्षप्रमाया अपि एतादृशं जातिघटितं लक्षणं विधेयम्। उक्तञ्च ग्रन्थकारेण-"यत्किञ्चित्प्रत्यक्षादिकमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकम्"। अत्र यत्किञ्चित्प्रत्यक्षादिपदेन घटरूपरसादिविषयकं चाक्षुषरासनादिप्रत्यक्षं गृह्यते, तादृशप्रत्यक्षादिव्यक्तिषु वृत्ति:- समवायेन वर्तमाना अनुमितौ च अवर्तमाना या प्रत्यक्षत्वजातिस्तादृशजातिमत्त्वं सर्वासु प्रत्यक्षादिव्यक्तिषु वर्तत इति प्रत्यक्षलक्षणलक्ष्ये समन्वय:। अत्र प्रत्यक्षवृत्तिरनुभवत्वव्याप्यजातिपदेन अनुमितित्वजातिमादाय तद्वत्त्वमनुमित्यात्मके ज्ञाने सत्त्वादलक्ष्ये लक्षणसमन्वयाद् भवत्यतिव्याप्तिरतस्तद्वारणात्मकम् 'अनुमित्यवृत्ति' इति

जातौ विशेषणं निवेश्यते। तन्निवेशे चानुमित्यवृत्तिपदेन अनुमितित्वजातिर्गृहीतुं न शक्यतेऽतस्तत्रैतज्जातिघटितं लक्षणं न सङ्गच्छते।

## *पदानामर्थपरिचयः*

| | | |
|---|---|---|
| **बुद्धिः** | = | ज्ञानम्, उपलब्धिः,मतिश्चेत्यादयः |
| **अनुभूतिः** | = | स्मरणातिरिक्तं ज्ञानम् |
| **स्मृतिः** | = | संस्कारमात्रजन्यं ज्ञानम् |
| **इन्द्रियार्थसन्निकर्षः** | = | इन्द्रियस्य विषयेण सह सम्बन्धः |
| **परामर्शः** | = | व्याप्तिविशिष्टपक्षधर्मताज्ञानम् |
| **व्याप्तिज्ञानम्** | = | साहचर्यनियमस्य ज्ञानम् |
| **सादृश्यज्ञानम्** | = | "गोसदृशो गवयः" इति ज्ञानम् |
| **पदज्ञानम्** | = | शब्दानां श्रावणज्ञानम् |

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) बुद्धेः कति भेदाः सन्ति ?तेषां नामानि च कानि ?

(ख) अनुमितिलक्षणं किम् ?

(ग) अनुभवात्मकं ज्ञानं कतिविधं भवति ?

(घ) प्रत्यक्षप्रमाया लघुलक्षणं किम् ?

(ङ) अनुमितेरसाधारणं कारणं किम् ?

(च) "बुद्धिरुपलब्धिर्ज्ञानम्" इति वचनं कस्यास्ति ?

(छ) शाब्दबोधं प्रति कस्य ज्ञानं करणं भवति ?

### २. व्याख्यात्मकमुत्तरं लिखत

(क) सपदकृत्यं प्रत्यक्षलक्षणं प्रतिपादयत।

(ख) "परामर्शजन्यं ज्ञानमनुमितिः" इति लक्षणं सोदाहरणं प्रकाशयत।

(ग) जातिघटितमनुमितिलक्षणं विचारयत।

(घ) उपमितिस्वरूपं निरूपयत।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) सभेदं सोदाहरणं बुद्धिस्वरूपमुपपादयत।

(ख) "तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वम्" इति अनुमितेर्जातिघटितं लक्षणं किमर्थं कृतम् ? 'धूमवान् पर्वतो वह्निमान्' इत्याकारकानुमितौ अस्य समन्वयः कथं भवति ? तद्दर्शयत।

(ग) "मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानम्" इत्यस्यां शङ्कायाम् 'इन्द्रियत्वेन रूपेण कारणत्वम्' इति कथनस्य तात्पर्यं सपूर्वपक्षमुपस्थापयत।

४. **परस्परं मेलयत**

| | |
|---|---|
| प्रत्यक्षकरणम् | व्याप्तिज्ञानम् |
| अनुमितिकरणम् | पदज्ञानम् |
| उपमितिकरणम् | इन्द्रियार्थसन्निकर्षः |
| शाब्दबोधकरणम् | सादृश्यज्ञानम् |
| स्मृतिकारणम् | पूर्वानुभवः |

५. **यदि स्मृतेरपि करणं प्रमाणं तर्हि स्मृतेरनुभवे अन्तर्भावो भवेद् वा ? मुक्तावल्युक्तरीत्या उत्तरं लिखत।**

## *परियोजनाकार्यम्-*

बुद्धेर्विभागपूर्वकमनुभवस्य चतुरो भेदान् (प्रत्यक्षादि) तथा तेषां सम्बन्धिनः करणानि (प्रमाणानि) च दर्शयन् एकं रेखाचित्रं रचयत।

# प्रत्यक्षानुभवभेदनिरूपणम्

अत्र कारिकाकारः प्रत्यक्षानुभवभेदान् प्रदर्शयति-

**कारिका- घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥ ५२ ॥**

**अन्वयः -** घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्।

**कारिकार्थः-** घ्राणजादीनां प्रभेदः = विशेषभेदः, तेन घ्राणजादिप्रभेदेन = घ्राणजन्यप्रत्यक्षम्, रसजन्यप्रत्यक्षम्, चक्षुर्जन्यप्रत्यक्षम्, श्रोत्रजन्यप्रत्यक्षम्, त्वग्जन्यप्रत्यक्षम्, मनोजन्यप्रत्यक्षञ्च, तेषाम् = घ्राणजादीनां बाह्यप्रत्यक्षाणां तत्रादिपदेन मानसप्रत्यक्षस्य च प्रभेदेन = विशेषभेदेन, प्रत्यक्षम् = प्रत्यक्षात्मकं ज्ञानम्, षड्विधम् = षट्प्रकारकम्, मतम् = अङ्गीकृतमित्यर्थः।

अतः परं जन्यप्रत्यक्षस्य भेदाः प्रदर्श्यन्ते—

**मुक्तावली- जन्यप्रत्यक्षं विभजते - घ्राणजादीति। घ्राणजम्, रासनम्, चाक्षुषम्, स्पार्शनम्, श्रोत्रम्, मानसमिति षड्विधं प्रत्यक्षम्। न चेश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वम्, जन्यप्रत्यक्षस्यैव निरूपणीयत्वादुक्तसूत्रानुसारात् ॥**

**व्याख्या-** यत्प्रत्यक्षं चक्षुरादिभ्य इन्द्रियेभ्यो जन्यते तदिन्द्रियजन्यं प्रत्यक्षमित्युच्यते। तत्स्वरूपं पूर्वं स्फुटीकृतमेव। इदानीं तद्भेदा उच्यन्ते- 'जन्यप्रत्यक्षं विभजते' इत्यादिना। 'घ्राणजादीति' कारिकायां निर्दिष्टो विषयः। तद्विभागः प्रस्तूयते। अयमभिप्रायः- प्रत्यक्षात्मकं ज्ञानं घ्राणज-रासन-चाक्षुष-स्पार्शन-श्रोत्र-मानसभेदेन षट्प्रकारकं भवति। तत्र जिघ्रतीति घ्राणम्, घ्राणात् = घ्राणेन्द्रियाद् जायत इति घ्राणजम् = घ्राणेन्द्रियजन्यं प्रत्यक्षमित्यर्थः। यतो हि घ्राणेन्द्रियेण गन्धविषयकं प्रत्यक्षं जायतेऽतो गन्धविषयकं प्रत्यक्षं घ्राणजमित्युच्यते। तथैव रसनेन्द्रियजन्यं प्रत्यक्षं रासनम्, रसविषयकं प्रत्यक्षमित्यर्थः। चक्षुरिन्द्रियजन्यं प्रत्यक्षं चाक्षुषम्, रूपविषयकं प्रत्यक्षम्। त्वगिन्द्रियजन्यं प्रत्यक्षं स्पार्शनम्, स्पर्शविषयकं प्रत्यक्षम्। श्रोत्रेन्द्रिययजन्यं प्रत्यक्षं श्रोत्रम्, शब्दविषयकं प्रत्यक्षम्। एतानि बाहिरिन्द्रियजन्यानि बाह्यप्रत्यक्षाणि। मनसा जायमानं यत् सुखदुःखादिविषयकं प्रत्यक्षं तन्मानसं प्रत्यक्षमिति कथ्यते। अनया रीत्या बाह्यमानसभेदेन षट्प्रकारकं प्रत्यक्षम्।

निरुक्तेषु षट्सु प्रत्यक्षेषु ईश्वरप्रत्यक्षस्य विभागो ग्रन्थकारेण नैव प्रदर्शितस्तेन ग्रन्थकारस्य न्यूनत्वं प्रतीयत इत्याशङ्का नोचिता। अत्र जन्यप्रत्यक्षस्यैव "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम्" इति गौतमोक्तसूत्रानुसारेण जन्यप्रत्यक्षभेदा एव

सङ्गृहीता:। ईश्वरप्रत्यक्षस्य नित्यत्वादत्र तद्भेदप्रदर्शनं नावश्यकम्। अत: स्वयं ग्रन्थकारो मूले स्फुटीकरोति- जन्यप्रत्यक्षस्यैव निरूपणीयत्वादुक्तसूत्रानुसाराद्। अर्थाद् जन्यप्रत्यक्षमात्रं निरूपयितुं प्रकरणमिदं प्रवर्तते न तु नित्यप्रत्यक्षमित्यर्थ:। ईश्वरप्रत्यक्षस्य निरूपणविषयत्वाभावात् तस्य निरूपणं न विहितमिति न कापि न्यूनता वा।

अत: परं कारिकाकारः प्रसङ्गसङ्गत्या बाह्यप्रत्यक्षेषु घ्राणेन्द्रियस्य रसनेन्द्रियस्य श्रोत्रेन्द्रियस्य च ये प्रत्यक्षविषया गन्धादयस्तान् प्रदर्शयितुं कारिकामिमामुपस्थापयति-

**कारिका-** **घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृत:।**
**तथा रसो रसज्ञाया: तथा शब्दोऽपि च श्रुते: ॥ ५३ ॥**

**अन्वयः-** घ्राणस्य गोचर: गन्ध:, गन्धत्वादि: अपि स्मृत:; तथा रसज्ञाया: रसः, तथा श्रुते: च शब्द: अपि स्मृत:।

**कारिकार्थ:-** घ्राणस्य = गन्धग्रहजनकस्य घ्राणेन्द्रियस्य। गोचर: = ज्ञानविषय:,गन्ध:। गन्धत्वम्, गन्धाभाव:, गन्धत्वाभावश्चेत्यपि स्मृत: = कथित:। तथा = तेनैव प्रकारेण। रसज्ञाया: = रसग्राहकस्य रसनेन्द्रियस्य रस: = रसनेन्द्रियप्रत्यक्षविषय:। एवमेव पूर्ववत् रसत्वम्, रसत्वाभावश्चेत्यादिकं रसनेन्द्रियग्राह्यम्। तथा = तेनैव प्रकारेण, श्रुते: = श्रवणं शब्दग्राहकस्य श्रोत्रेन्द्रियस्य च शब्द: अपिना शब्दत्वम्, शब्दत्वाभावश्चेत्यादयः प्रत्यक्षविषया भवन्ति अर्थात् शब्द:, शब्दत्वम्, शब्दाभाव:, शब्दत्वाभावश्चेत्येते विषया श्रोत्रेन्द्रियेण प्रत्यक्षीक्रियन्ते।

इदानीं कारिकाप्रतिपाद्यान् विषयान् विशदीकरोति मुक्तावलीकारः-

**मुक्तावली- गोचर इति। ग्राह्य इत्यर्थ:। गन्धत्वादिरिति। आदिपदात् सुरभित्वासुरभित्वपरिग्रहः। गन्धस्य प्रत्यक्षत्वात् तद्वृत्तिजातिरपि प्रत्यक्षा। गन्धाश्रयणे तु घ्राणस्य न सामर्थ्यमिति बोध्यम्। तथा रस इति। रसत्वादिसहित इत्यर्थ:। तथा शब्दोऽपि शब्दत्वादिसहित:। गन्धो रसश्चोद्भूतो बोध्य: ॥**

**व्याख्या-** येन इन्द्रियेण यद् गृह्यते तेनैव इन्द्रियेण तद्गता जातिस्तदभावश्च ग्राह्यते इति नियमानुसारं घ्राणेन्द्रियेण गन्धविषयकं प्रत्यक्षं भवति चेत्तेनैव इन्द्रियेण गन्धत्वं गन्धाभावो गन्धत्वाभावश्चेत्येते विषया यथायथं गृह्यन्ते।

तत्र गोचरो नाम इन्द्रियग्राह्यो विषय इत्यर्थ:। तथैव गन्धे विद्यमाना या गन्धत्वजाति:, गन्धत्वाभाव:, गन्धाभावश्च घ्राणेन्द्रियेण ग्राह्या: = प्रत्यक्षविषया भवन्ति। 'गन्धत्वादि' इत्यत्रादिपदं श्रूयते, तेन सुरभित्वम्, असुरभित्वञ्च परिगृह्यते। अमुमेवाशयं प्रकाशयति मुक्तावलीकार:- गन्धस्य प्रत्यक्षत्वात् तद्वृत्तिजातिरपि प्रत्यक्षा। अर्थाद् गन्धस्य घ्राणेन्द्रियप्रत्यक्षविषयत्वाद् गन्धवृत्ति: = गन्धे समवायेन वर्तमाना या गन्धत्वजाति: सापि प्रत्यक्षा = घ्राणेन्द्रियग्राह्येत्यर्थ:। स च गन्ध: समवायेन पृथिवीद्रव्ये वर्तते, गुणगुणिनो: समवायादिति। गन्धाश्रयभूता या पृथिवी सा तु न खलु घ्राणेन्द्रियग्राह्या। यतो हि घ्राणेन्द्रियस्य गन्धाश्रयभूताया: पृथिव्या ग्रहणसामर्थ्यं नास्ति अत:

पृथिवीसमवेतस्य गन्धस्य घ्राणेन्द्रियग्राह्यत्वेऽपि तदाश्रयग्रहणे सामर्थ्यविरहाद् घ्राणस्य न सामर्थ्यमित्युक्तम्। तथैव रसत्वादिसहितस्य रसादेश्च प्रत्यक्षं रसनेन्द्रियेण जायते। एवमेव शब्दत्वसहितस्य शब्दस्य शब्दत्वस्य च प्रत्यक्षं श्रोत्रेन्द्रियेण जायते। तत्र प्रत्यक्षमात्रं प्रति उद्भूतत्वमावश्यकम्। उद्भूतत्वविशिष्टानां हि रसगन्धस्पर्शशब्दानां तदभावानाञ्च प्रत्यक्षत्वसम्भवादित्यर्थ:। उद्भूतत्वञ्च प्रत्यक्षप्रयोजकजातिविशेषवत्त्वम्। तद्यथा-घ्राणेन्द्रियेण गन्धविषयकप्रत्यक्षे कर्तव्ये गन्धस्य संयोगात्मक: सन्निकर्ष:। तथैव रसादिप्रत्यक्षेऽपि रसनेन्द्रियादिना सह रसादिविषयस्य संयोगात्मक: सन्निकर्ष:। यतो हि गन्धादिसन्निकर्षसत्त्वे गन्धादिविषयकप्रत्यक्षसत्त्वम्, गन्धादिसन्निकर्षाभावे गन्धादिविषयकप्रत्यक्षाभाव इत्यन्वयव्यतिरेकाभ्यां गन्धादिविषयकप्रत्यक्षं प्रति रसादिप्रत्यक्षप्रयोजकसन्निकर्ष: कारणमिति सन्निकर्षविषययो: कार्यकारणभावो निश्चीयते।

सम्प्रति चक्षुरिन्द्रियग्राह्यविषयान् व्यवस्थापयितुम् इमां कारिकामवतारयति—

**कारिका-** **उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसङ्ख्ये**
**विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम्॥ ५४॥**

**अन्वय:-** नयनस्य गोचर: उद्भूतं रूपम्, तथा तद्वन्ति पृथक्त्व-सङ्ख्ये, विभाग-संयोग-परापरत्व-स्नेह-द्रवत्वं, परिमाणयुक्तम्।

**कारिकार्थ:-** नयनस्य = रूपग्राहकस्य चक्षुरिन्द्रियस्य। गोचर: = प्रत्यक्षविषय:। उद्भूतं रूपम् = उद्भूतत्वविशिष्टं रूपम्, रूपत्वं, रूपाभावश्च। तथा = तेनैव प्रकारेण। तादृश-उद्भूतवन्ति = तादृशरूपवन्ति यानि पृथिव्यादिद्रव्याणि, तानि।

पृथक्त्व-सङ्ख्ये = पृथक्त्वं सङ्ख्या च। विभाग-संयोग-परत्वापरत्व-स्नेह-द्रवत्वम् = एते अष्टौ गुणा:। परिणामयुक्तम् = परिणामगुणविशिष्टं द्रव्यं चेति विषयाश्चक्षुरिद्रियग्राह्या भवन्ति।

**मुक्तावली- उद्भूतरूपमिति। ग्रीष्मोष्मादावनुद्भूतं रूपमिति न तत्प्रत्यक्षम्। तद्वन्ति-उद्भूतरूपवन्ति।**

**व्याख्या-** उद्भूतरूपमिति कारिकास्थभागस्य निर्देश:। चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपवत्त्वं कारणम्। तत्र उद्भूतत्वं नाम चक्षुरिन्द्रियप्रत्यक्षविषयत्वम्। तथा च समवायेन उद्भूतरूपवन्ति यानि पृथिव्यादिद्रव्याणि तानि चक्षुरिन्द्रियग्राह्याणि भवन्तीत्यर्थ:। तथैव पृथिवीत्वजलत्वतेजस्त्वादीनां च पृथिव्यादिवृत्तीनां जातीनामपि "येन इन्द्रियेण यद्यद् गृह्यते तद्गता जातिस्तदिन्द्रियग्राह्या" इति नियमानुसारं ग्रहणं चक्षुषा एव जायते।

ग्रीष्मकाले सूर्यस्य उष्मणि भर्जनकपालस्थवह्नौ च यद्रूपं तत् प्रत्यक्षं न जायतेस्तत्र प्रत्यक्षं प्रति यत्कारणम् 'उद्भूतं रूपं' तन्नास्ति। यतो हि तत्र उद्भूतरूपं न वर्तते। तत्रानुद्भूतरूपमस्ति, तस्मात् तस्य (सूर्योष्मणादे:) प्रत्यक्षं भवितुं नार्हति।

इत्थञ्च पृथक्त्वं, सङ्ख्या (द्वित्वादिकम्) संयोग:, विभाग:, परत्वम्, अपरत्वम्, स्नेह:, द्रवत्वम्, परिमाणम् इत्येते ये गुणास्ते यदि प्रत्यक्षयोग्यद्रव्येषु वर्तन्ते चेत्तेषामपि प्रत्यक्षं चक्षुषा एव जायते।

अनया कारिकया चक्षुरिन्द्रियग्राह्यान् विषयान् सङ्गृह्णाति-

**कारिका-** **क्रियां जातिं योग्यवृतिं समवायं च तादृशम्।**
**गृह्णाति चक्षु:सम्बन्धादालोकोद्भूतरूपयो: ।। ५५ ।।**

**अन्वय:-** चक्षु: आलोक-उद्भूतरूपयो: सम्बन्धात् क्रियाम्, जातिम्, योग्यवृत्तिम्, तादृशं समवायम् च गृह्णाति।

**कारिकार्थ:-** आलोक-उद्भूतरूपयो: = आलोकसंयोगस्य उद्भूतरूपस्य च सम्बन्धात्। चक्षु: = चक्षुरिन्द्रियम्। क्रियाम् = उत्क्षेपणादिपञ्चविधं कर्म। जातिम् = पृथक्त्वत्वादिजातिम्। योग्ये वृत्ति: = योग्यवृत्तिस्ताम् = योग्यवृत्तिं प्रत्यक्षयोग्ये द्रव्ये वर्तमाना ये विषया: तान् सर्वान् चक्षुरिन्द्रियं गृह्णाति = साक्षात्करोति।

**अयमभिप्राय:-** समवायम् च = जातिव्यक्त्योर्य: समवायसम्बन्धस्तञ्च चक्षु: प्रत्यक्षीकरोति। तथैव आलोकश्च उद्भूतरूपञ्च = आलोकोद्भूतरूपे, तयो:- आलोक-उद्भूतरूपयो: य: सम्बन्धोऽर्थाद् आलोकस्य (प्रकाशस्य) उद्भूतरूपस्य च साक्षात् सम्बन्धात् परम्परासम्बन्धाच्च चक्षु: पूर्वोक्तान् विषयान् यथायथं गृह्णाति = साक्षात्करोतीत्यर्थ:। प्रत्यक्षमात्रं प्रति आलोक उद्भूतरूपञ्च कारणमित्युक्तपूर्वमेव।

इदानीं मुक्तावलीकार: कारिकार्थं व्याख्याति-

**मुक्तावली- योग्येति। पृथक्त्वादिकमपि योग्यव्यक्तिवृत्तितया बोध्यम्।तादृशंयोग्यव्यक्तिवृत्तिम्। चक्षुर्योग्यत्वमेव कथं ? तदाह - गृह्णातीति। आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणम्। तत्र द्रव्यचाक्षुषं प्रति तयो: समवायसम्बन्धेन कारणत्वम्, द्रव्यसमवेतरूपादिप्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेनेति ।।**

**व्याख्या-** अत्र योग्यपदेन कारिकास्थयोग्यपदं सूच्यते। तथा च प्रत्यक्षयोग्यद्रव्ये वर्तमानं यत्पृथक्त्ववादिकं तेषां प्रत्यक्षं चक्षुषा भवति। उपयोक्तं मूले- पृथक्त्ववादिकमपि योग्यव्यक्तिवृत्तितया बोध्यम्। तत्र चक्षुयोग्यत्वं कथमिति जिज्ञासायामुच्यते-चक्षुषा घटादिद्रव्याणां प्रत्यक्षं कर्तव्ये उद्भूतरूपम्, आलोकसंयोगश्च समवायेन कारणम्। यस्मिन् द्रव्ये समवायेन उद्भूतरूपम्, आलोकसंयोगश्च वर्तेते, तादृशस्यैव द्रव्यस्य प्रत्यक्षत्वं सम्भवति। यथा- घटादिद्रव्ये समवायेन वर्तमानस्य रूपादे: स्वाश्रयसम्बन्धेन आलोकसंयोग उद्भूतरूपञ्च वर्तेते, अतस्तादृशरूपादि विषयकं प्रत्यक्षं सम्भवति। अतश्चोक्तम्- द्रव्यचाक्षुषं प्रति तयो: (आलोकोद्भूतरूपयो:) समवायसम्बन्धेन कारणत्वम्। यतो हि समवायेन आलोकस्य उद्भूतरूपस्य च सत्त्वे द्रव्यविषयकं चक्षुरिन्द्रियग्राह्यं प्रत्यक्षं भवति, तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्यां द्रव्यचाक्षुषं प्रति आलोकसंयोग:, उद्भूतरूपञ्च कारणमितिरीत्या

कार्यकारणभावो व्यवस्थाप्यते। तथैव घटादिद्रव्ये समवायेन रूपादिप्रत्यक्षं प्रति स्वाश्रयसमवायसम्बन्धेन आलोकसंयोगस्य उद्भूतरूपस्य च कारणत्वम्। अत्र स्वपदेन आलोकसंयोग उद्भूतरूपञ्च गृह्येते, तदाश्रयो घटादिस्तत्समवेतं रूपादिकमिति द्रव्ये समवायेन वर्तमानं यद् रूपादिकं तत्प्रत्यक्षं प्रति स्वाश्रयसमवायसम्बन्धः कारणमित्यर्थः। तत्र समवेतत्वं नाम समवायसम्बन्धेन वर्तमानत्वम्। एवमेव द्रव्ये समवायेन वर्तमानं यद्रूपं तत्र समवेतं रूपत्वादिकं तत्प्रत्यक्षं प्रति स्वाश्रयसमवेतसमवायः कारणम्। अत्र स्वपदेन आलोकसंयोगः उद्भूतरूपञ्च गृह्येते, तदाश्रयो घटादिद्रव्यं तत्र समवेतं (समवायेन वर्तमानं) रूपादिकं, तादृशरूपादिके रूपत्वादिकं समवायेन वर्तते, अनेन प्रकारेण आलोकसंयोगः, उद्भूतरूपञ्च स्वाश्रयसमवेतसमवायसम्बन्धेन रूपत्वादिजातौ वर्तते, अतो रूपत्वादिविषयकप्रत्यक्षं प्रति स्वाश्रयसमवेतसमवायसम्बन्धः कारणम्। इत्थञ्च घटादिद्रव्यचाक्षुषम्, घटादिद्रव्य समवेतरूपादिचाक्षुषम्, तादृशरूपादिचाक्षुषं प्रति च यथायथमालोकसंयोगः उद्भूतरूपं समवायेन, स्वाश्रयसमवायेन, स्वाश्रयसमवेतसमवायेन च कारणमिति निश्चीयते।तत्र एतावत्पार्थक्यं यत् द्रव्यप्रत्यक्षं प्रति आलोकदिसंयोगादेः साक्षात्कारणत्वं वर्तते चेत्, तद्वृत्तिरूपादिप्रत्यक्षे रूपत्वादिजातिप्रत्यक्षे च परम्परासम्बन्धेन तादृशालोकसंयोगादेः कारणत्वं यथायथं बोध्यमित्यर्थः।

यदि घटादिप्रत्यक्षं प्रति आलोकसंयोगस्य कारणत्वं न स्वीक्रियेत तदा अन्धकारे वर्तमानं यद् घटादिकं तस्यापि प्रत्यक्षं स्यात्, तथैवोद्भूतरूपस्य कारणत्वं न स्यात्तदा पिशाचादीनामपि प्रत्यक्षत्वं सम्भवेत्, न च तत् सम्भवतीति घटादिप्रत्यक्षमात्रं प्रति आलोकसंयोगस्य उद्भूतरूपस्य च कारणत्वं सर्वथा आवश्यकम्। अतश्चोक्तम्- आलोकोद्भूतरूपयोः सम्बन्धाच्चक्षुः क्रियां जातिं योग्यवृत्तिं समवायं च गृह्णाति = साक्षात्करोतीत्यर्थः।

## पदानामर्थपरिचयः

**गोचरः** = इन्द्रियस्य ग्राह्यविषयः

**स्मृतः** = शास्त्रेषु कथितः

**अनुद्भूतम्** = अप्रकटितम्, प्रत्यक्षायोग्यम्

**उद्भूतत्वम्** = प्रत्यक्षप्रयोजकः कश्चन जातिविशेषः

**आलोकसंयोगः** = प्रकाशेन सह सम्बन्धः

**योग्यवृत्तिः** = प्रत्यक्षयोग्ये वस्तुनि विद्यमानत्वम्

**प्रयोजकम्** = कारणम् अथवा नियामकम्

**नयनस्य गोचरः** = चक्षुरिन्द्रियस्य विषयः

**साक्षात्करोति** = प्रत्यक्षं करोति

**सुरभित्वम् असुरभित्वम्** = गन्धस्य भेदद्वयम्, सुगन्धो दुर्गन्धश्च

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) जन्यप्रत्यक्षं कतिविधं भवति ?

(ख) मनसा कस्य प्रत्यक्षं जायते ?

(ग) घ्राणेन्द्रियं किमर्थं पृथिवीं ग्रहीतुं न शक्नोति ?

(घ) चाक्षुषप्रत्यक्षं प्रति प्रमुखं कारणद्वयं किम् ?

(ङ) ग्रीष्मोष्मणाम् प्रत्यक्षं चक्षुषा किमर्थं न भवति ?

### २. विवेचनात्मकमुत्तरं लिखत

(क) "येन इन्द्रियेण यद् गृह्यते, तेनैव इन्द्रियेण तद्गता जातिः गृह्यते" इति नियमं सोदाहरणं स्पष्टयत ।

(ख) उद्भूतत्वस्य प्रत्यक्षप्रयोजकत्वं दर्शयत ।

### ३. रिक्तस्थानानि पूरयत

(क) श्रोत्रेन्द्रियस्य गोचरः _________ अस्ति । (शब्दः / रूपम्)

(ख) आलोकसंयोगाभावे _________ प्रत्यक्षं न सम्भवति । (चाक्षुषम् / श्रोत्रम्)

(ग) उद्भूतत्वविशिष्टं _________ नयनस्य गोचरः । (रूपम् / गन्धः)

(घ) _________ प्रत्यक्षं बाह्येन्द्रियजन्यं न भवति । (मानसम् / रासनम्)

*परियोजनाकार्यम्–*

अधोनिर्दिष्टं कोष्टकं पूरयत (अत्र इन्द्रियं तस्य विषयस्तथा गुणा निर्दिष्टा भवेयुः)

| **इन्द्रियम्** | **विषयः (द्रव्यम्/गुणः)** | **गृह्यमाणा जातिः** |
|---|---|---|
| घ्राणम् | गन्धः | गन्धत्वम् |
| रसना | _________ | _________ |
| चक्षुः | रूपम्, घटादि | _________ |
| श्रोत्रम् | _________ | _________ |
| त्वक् | स्पर्शः | _________ |

द्वाविंशः पाठः

# त्वगिन्द्रियादिविषयव्यवस्थापनम्

इदानीं त्वगिन्द्रियग्राह्यान् विषयान् कार्यकारणभावेन व्यवस्थापयति ग्रन्थकारः—

**कारिका-** **उद्भूतस्पर्शवद् द्रव्यं गोचरः सोऽपि च त्वचः।**
**रूपान्यच्चक्षुषो योग्यं रूपमत्राऽपि कारणम्॥ ५६॥**

**अन्वयः-** उद्भूतस्पर्शवद् द्रव्यम्, सः अपि च त्वचः गोचरः, रूपान्यत्, चक्षुषः, योग्यम्, अत्र अपि द्रव्याध्यक्षे रूपं कारणम्।

**कारिकार्थः-** उद्भूतस्पर्शवद् = समवायेन उद्भूतस्पर्शयुक्तं यद् द्रव्यम्, सोऽपि उद्भूतस्पर्शश्च त्वचः = स्पर्शग्राहकस्य त्वगिन्द्रियस्य, गोचरः = प्रत्यक्षविषयो भवति।अर्थात् समवायेन उद्भूतस्पर्शाधिकरणस्य द्रव्यस्य तत्र वर्तमानस्य उद्भूतस्पर्शस्य च प्रत्यक्षं त्वगिन्द्रियेण जायते। रूपान्यत् = रूपाख्यादतिरिक्तं चक्षुषः = चक्षुरिन्द्रियस्य यद् यद् योग्यम् = प्रत्यक्षविषयं द्रव्यगुणादिकं, तत्सर्वं त्वगिन्द्रियेणापि प्रत्यक्षीक्रियते। अत्रापि-त्वगिन्द्रियजन्यप्रत्यक्षेऽपि रूपं कारणं भवति।रूपरहितस्य द्रव्यस्य त्वगिन्द्रियग्राह्यत्वासम्भवादित्यर्थः। द्रव्याध्यक्षे = बाहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे कर्तव्ये समवायेन रूपं कारणं भवति।

मुक्तावलीकारः कारिकार्थं विवृणोति-'उद्भूतेत्यादिना'।

**मुक्तावली-उद्भूतेति।उद्भूतस्पर्शवद्द्रव्यंत्वचोगोचरः।सोऽपि-उद्भूतस्पर्शोऽपि,स्पर्शत्वादिसहितः। रूपान्यदिति। रूपभिन्नं रूपत्वादिभिन्नं यच्चक्षुषो योग्यं तत्त्वगिन्द्रियस्याऽपि ग्राह्यम्। तथा च पृथक्त्वसङ्ख्यादयो ये चक्षुग्राह्या उक्ताः, एवं क्रियाजातिप्रभृतयो योग्यवृत्तयस्त्वचो ग्राह्या इत्यर्थः। अत्रापि त्वगिन्द्रियजन्यद्रव्यप्रत्यक्षे रूप कारणम्। तथा च बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणम्॥**

**व्याख्या-** समवायेन उद्भूतस्पर्शवद् यद् द्रव्यं तस्य प्रत्यक्षं त्वगिन्द्रियेण जायते। तथैव उद्भूतस्पर्शस्यापि प्रत्यक्षं त्वगिन्द्रियेण निष्पन्नं भवति। किञ्च स्पर्शे विद्यमाना या स्पर्शत्वजातिः सापि त्वगिन्द्रियेणैव गृह्यते। "येन इन्द्रियेण यद् गृह्यते, तद्गता जातिस्तदभावश्च तदिन्द्रियग्राह्याः" इति नियमानुसारं उद्भूतस्पर्शः, स्पर्शत्वजातिः, स्पर्शाभावः, स्पर्शसामान्याभावः, स्पर्शप्रागभावादयो विषयाः त्वगिन्द्रियेण गृह्यन्ते। रूपभिन्नमित्यस्य रूपभेदवदित्यर्थः। तथा च अत्र रूपपदेन साक्षात् परम्परासम्बन्धेन रूपवत्त्वं गृह्यते। तथा च रूपाभिन्नं रूपत्वादिभिन्नञ्च यच्चक्षुरिन्द्रियेण

ग्राह्यं तत्सर्वं त्वगिन्द्रियेणापि ग्रहीतुं शक्यम्। अर्थाद् घटादिद्रव्ये वर्तमानं यद्रूपं तत्र समवायेन वर्तमानं यद्रूपत्वादिकं तद् विहाय घटादिद्रव्याणां प्रत्यक्षं त्वगिन्द्रियेणापि भवितुमर्हति। तथैव पृथक्त्वम्, एकत्वादिसङ्ख्यादिगुणा ये चक्षुरिन्द्रियस्य प्रत्यक्षयोग्या: स्यु: पूर्वमुक्ता: क्रिया जातयश्च विषया: ये चक्षुर्ग्राह्यद्रव्येषु वर्तन्ते ते सर्वेऽपि त्वगिन्द्रियेणापि ग्राह्या भवन्ति। यथा- घटादिद्रव्यस्य चक्षुषा प्रत्यक्षं भवति तथैव त्वचापि; तथैव घटत्वादिजाते:, कर्मणां=द्रव्यवृत्तिकर्मणां, पृथक्त्वादीनां, घटाभावस्य च चक्षुरिन्द्रियेण त्वगिन्द्रियेण च उभाभ्यामिन्द्रियाभ्यां प्रत्यक्षं भवितुमर्हतीत्यर्थ:। तत्र रूपस्य रूपत्वजाते: रूपाभावस्य च प्रत्यक्षं चाक्षुषमात्रं भवति न तु त्वगिन्द्रियेणापि, सामर्थ्याभावात्। तत्र त्वगिन्द्रियजन्यद्रव्यविषयकप्रत्यक्षं प्रति च समवायेन रूपं कारणं भवति। तथा च चक्षुषा प्रत्यक्षयोग्यानि यानि पृथिवी-जल-तेजांसि तानि यदि समवायेन रूपवन्तिभवन्ति तदैव त्वगिन्द्रियेण तेषां प्रत्यक्षं भवितुमर्हतीति। यतो हि त्वगिन्द्रियजन्यद्रव्यप्रत्यक्षे स्पर्शस्य चाक्षुषप्रत्यक्षे रूपस्य च कारणत्वस्वीकारे गौरवं स्यात्, तदपेक्षया च बाहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं प्रति रूपत्वेनैव कारणत्वस्वीकारे लाघवं दृश्यते। अतश्चोक्तं मुक्तावलीकारेण- "बाहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणम्" इति।

अत्रैका शङ्का समुदेति- बाहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं प्रति रूपं कारणमिति कार्यकारणभाव: स्वीक्रियते चेत् तदा त्वचा वायुप्रत्यक्षं न स्याद्, वायौ रूपाभावादिति या शङ्का सा नोचिता, इष्टापत्ते:। अर्थाद् याऽपत्तिरुक्ता सा इष्टा। यतो हि प्राचीना वायुद्रव्यस्य अनुमानप्रमाणगम्यत्वं प्रतिपादयन्ति, तेन वायोः प्रत्यक्षगम्यत्वं नास्तीति न कश्चिद् विवाद:।

इदानीं नवीननैयायिकानां मतं प्रस्तूयते-

**मुक्तावली- नवीनास्तु- त्वगिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपं कारणं प्रमाणाभावात् किन्तु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे स्पर्श: कारणम्। अन्वयव्यतिरेकाद्। बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति चेद् ? न किञ्चिद्, आत्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु। रूपस्य कारणत्वे लाघवमिति चेन्न, वायोस्त्वगिन्द्रियेणाग्रहणप्रसङ्गाद्। इष्टापत्तिरिति चेद्, उद्भूतस्पर्श एव लाघवात् कारणमस्तु। प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरेव किं नेष्यते ? तस्मात् प्रभांपश्यामीतिवत् वायुं स्पृशामीति प्रत्ययस्य सत्त्वाद्वायोरपि प्रत्यक्षत्वं सम्भवत्येव, बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वम्। वायुप्रभयोरेकत्वं गृह्यत एव, क्वचिद् द्वित्वादिकमपि, क्वचित् सङ्ख्यापरिमाणाद्यग्रहो दोषादित्याहु: ।।**

**व्याख्या-** नवीननैयायिका बाहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं प्रति रूपस्य कारणत्वं न स्वीकुर्वन्ति। ते कथयन्ति- बाहिरिन्द्रियजन्यं यद् पृथिव्यादिद्रव्यविषयकं प्रत्यक्षात्मकं कार्यं तत्र रूपमावश्यकमित्यत्र न किमपि प्रमाणं लभ्यते। यतो हि रूपसत्त्वे चाक्षुषप्रत्यक्षसत्त्वम्, रूपाभावे चाक्षुषप्रत्यक्षाभाव इत्यन्वयव्यतिरेकाभ्यां चाक्षुषप्रत्यक्षं प्रति रूपं कारणम्। तथैव स्पर्शसत्त्वे स्पार्शनप्रत्यक्षसत्त्वम्, स्पर्शाभावे स्पार्शनप्रत्यक्षाभाव इत्यन्वयव्यतिरेकाभ्यां

स्पार्शनविषयकप्रत्यक्षं प्रति स्पर्शः कारणमिति निश्चीयते। रूपाभावेऽपि त्वचा वायुविषयकं प्रत्यक्षं जायते। तत्र रूपं नास्ति, रूपाभावेऽपि स्पार्शनप्रत्यक्षात्मकस्य कार्यस्य सत्त्वाद् व्यतिरेकव्यभिचारः। अतो बाहिरिरिन्द्रियजन्यद्रव्य विषयकप्रत्यक्षं प्रति रूपस्य कारणत्वं स्वीकर्तुं न शक्यते, व्यतिरेकव्यभिचाराद्। अस्यां स्थितौ प्रश्नोऽयं समुदेति- बाहिरिन्द्रियजन्यद्रव्यविषयकप्रत्यक्षं प्रति किं कारणमिति ? तत्समाधानं कुर्वन् ग्रन्थकारो ब्रूते- न किञ्चिदिति। अर्थाद् न किमपि कारणं भवितुमर्हति। अथवा प्रकारान्तरेण द्रव्यविषयकप्रत्यक्षं प्रति आत्मावृत्तिशब्दभिन्नविशेष गुणवत्त्वं प्रयोजकं भवतु इत्युच्यते। इत्थञ्च घटादिबाहिरिन्द्रियजन्यघटद्रव्यविषयकचाक्षुषं प्रति आत्मनि अवृत्तिः = अवर्तमानः, शब्दभिन्नो यो विशेषगुणः स्पर्शरूपादिस्तद्वत्त्वं प्रयोजकम्, तथैव स्पार्शनप्रत्यक्षे आत्मावृत्तिद्रव्ये वर्तमानो यः शब्दभिन्नो विशेषगुणस्तद्वत्त्वं प्रयोजकमिति रीत्या कार्यकारणभावं स्वीकृत्य बाहिरिन्द्रियजन्यप्रत्यक्षं जायते। अत्र कारणकोटौ आत्मावृत्तिरिति पदं न निवेश्यते चेत्, शब्दभिन्नविशेषगुणपदेन बुद्ध्यादिकं गृह्यते, तद्वत्त्वमात्मन्यपि अस्तीति आत्मनोऽपि बाहिरिन्द्रियजन्यप्रत्यक्षत्वापत्तिः। अतस्तद्वारणाय आत्मावृत्तिरिति दलमावश्यकम्। एवं बुद्ध्यादेर्विशेषगुणत्वेऽपि तादृशगुणस्यात्मनि वृत्तित्वमेव अस्ति, अवृत्तित्वं नास्तीति न दोषः। तथैव शब्दभिन्नेति पदानुक्तौ आत्मावृत्तिविशेषगुणपदेनशब्दोऽपि ग्रहीतुं शक्यते, तद्वत्त्वमाकाशस्य सत्त्वेनाकाशस्यापि बाहिरिन्द्रियजन्यप्रत्यक्षं स्यादतस्तद्वारणाय शब्दभिन्नेति पदं निवेश्यते। तन्निवेशे च तादृशविशेषगुणपदेन शब्दो ग्रहीतुं न शक्यते अतस्तत्र दोषो न सम्भवति। विशेषपदसन्निवेशे तु आत्मनि अवर्तमानशब्दभिन्नगुणपदेन कालद्रव्यवृत्तिपरत्वापरत्वसङ्ख्यादिसामान्यगुणमादाय तद्वत्त्वस्य काले वर्तमानत्वाद् भवति कालेऽतिव्याप्तिः, अर्थात् कालस्यापि बाहिरिन्द्रियजन्यप्रत्यक्षं स्यादतस्तद्वारणाय विशेषपदं निवेशनीयं भवति। तथा सतिपरत्वापरत्वादीनां विशेषगुणत्वाभावाद् न दोषः।

अत्र पुनरेका शङ्का समुदेति- बाहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे निरुक्तौ कार्यकारणभावस्त्वेवमस्त्विति। अत्र रूपस्य कारणत्वस्वीकारे लाघवं दृश्यतेऽतः तादृशप्रत्यक्षं प्रति रूपमेव कारणमिति अङ्गीक्रियतामिति चेन्न- उच्यते, तन्नोचितम्। यतो हि तथा स्वीकारे वायोः रूपाभावात् तत्प्रत्यक्षं न सम्भवति। किन्तु वायुस्तु त्वगिन्द्रियेण प्रत्यक्षीक्रियते, तत्र रूपं नास्ति। अतः स्पर्शवत्त्वेनैव रूपशून्यत्वेऽपि बाहिरिन्द्रियजन्यप्रत्यक्षे रूपस्य कारणत्वं व्यवस्थापयितुं न शक्यते। यदि वायोरनुमानप्रमाणगम्यत्वात् तत्र प्रत्यक्षत्वापत्तिरिष्टेवेति न दोषाय कल्पत इत्युक्त्वा समाधानं विधीयते चेत्तदा ये वायुद्रव्यस्य बाहिरिन्द्रियजन्यप्रत्यक्षं स्वीकुर्वन्ति तन्मतेन लाघवाद् अन्यज्जातिघटितं कार्यकारणभावमुपस्थापयन् आह ग्रन्थकारः-

'उद्भूतस्पर्श एव लाघवात् कारणमस्तु' इति। वायौ रूपसामान्याभावात् तत्प्रत्यक्षं प्रति समवायेन उद्भूतस्पर्शः कारणम्। एतेन लाघवमपि भवतीति न कापि आपत्तिः। तथा सत्यपि प्रमायाः प्रत्यक्षत्वं न स्यात्, तत्र उद्भूतस्पर्शरूपकारणस्य अभावादित्याशङ्कायामुच्यते सा आपत्तिरिष्टेवेति वक्तव्यं भवति, उपायाभावात्।

अमुमेव भावं परिपुष्यन्तो नव्याः सोदाहरणं वायुप्रत्यक्षम् उद्भूतस्पर्शस्य हेतुत्वं व्यवस्थापयन्ति- यथा 'प्रभां पश्यामीति' प्रत्ययो जायते, तथैव 'वायुं स्पृशामीति' प्रत्ययो भवत्येवेति प्रभाया वायोश्च प्रत्यक्षत्वमनुभवसिद्धमेव। एतेन वा

योर्बाहिरिन्द्रियजन्यप्रत्यक्षं केनापि अन्यथा कर्तुं न शक्यते। ततश्चैतद् निश्चित्य शक्यते वक्तुं यद्बाहिरिन्द्रियजन्य-द्रव्यप्रत्यक्षात्मककार्यं प्रति न रूपस्य कारणत्वं भवितुमर्हति, न वा स्पर्शस्य कारणत्वम्। वायोः प्रभायाश्च एकत्वात्तद्गतमेकत्वं गृह्यते एव = प्रत्यक्षविषयीक्रियत इत्यर्थः। क्वचिद् = अवस्थाविशेषे द्वित्वं त्रित्वादिकं च प्रत्यक्षीकर्तुं शक्यते। क्वचित्तु यदि सङ्ख्यापरिमाणादयो न गृह्यन्ते चेत्तत्र सजातीयदोषात् तेषां सङ्ख्यापरिमाणादीनां ग्रहणं न सम्भवति। अतो बाहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं प्रति उद्भूतस्पर्शस्य हेतुत्वं सप्रमाणं निर्धारयन्ति नव्याः।

कारिकाकृद् द्रव्यप्रत्यक्षकारणानि निर्दिशति-

**कारिका-** **द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम्।**
**मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः॥ ५७॥**

**अन्वयः-** द्रव्याध्यक्षे मनसा, त्वचा योगः, ज्ञानकारणम्, मनोग्राह्यम्, सुखम्, दुःखम्,इच्छा, द्वेषः, मतिः, कृतिः।

**कारिकार्थः-** द्रव्याध्यक्षे = बाहिरिन्द्रियजन्यप्रत्यक्षविषये। मनसा = सर्वविषयग्राहक-अन्तरिन्द्रियेण। त्वचः = त्वगिन्द्रियस्य। योगः = सम्बन्धः। ज्ञानकारणम् = बाहिरिन्द्रियजन्यप्रत्यक्षं प्रति कारणमित्यर्थः। मनोग्राह्यम् = मनसा प्रत्यक्षयोग्यम्। सुखम्, दुःखम्,इच्छा, द्वेषः, मतिः = बुद्धिः,कृतिः = प्रयत्नः, एते विशेषगुणा आत्मनो वर्तन्ते। तेषां प्रत्यक्षं मनसा भवति। एतेन ज्ञानसामान्यं प्रति त्वङमनःसंयोगस्य कारणत्वं भवतीति अन्वयव्यतिरेकाभ्यां निश्चीयते।

ग्रन्थकारः कारिकार्थं स्पष्टयति-

**मुक्तावली- त्वचो योग इति। त्वङ्नःसंयोगो ज्ञानसामन्ये कारणमित्यर्थः। किन्तत्र प्रमाणं ? सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा ज्ञानाजननमिति। ननु सुषुप्तिकाले किं ज्ञानं भविष्यति? अनुभवरूपं स्मरणरूपं वा? नाद्यः, अनुभवसामग्र्यभावात्। तथा हि-चाक्षुषादिप्रत्यक्षे चक्षुरादिना सह मनःसंयोगस्य हेतुत्वात्तदभावादेव न चाक्षुषादिप्रत्यक्षम्। ज्ञानादेरभावादेव न मानसं प्रत्यक्षम्, ज्ञानाद्यभावे चात्मनोऽपि न प्रत्यक्षमिति। व्याप्तिज्ञानाभावादेव नानुमितिः, सादृश्यज्ञानाभावान्नोपमितिः, पदज्ञानाभावान्न शाब्दबोधः, इत्यनुभवसामग्र्यभावान्नानुभवः। उद्बोधकाभावाच्च न स्मरणम्। मैवम्, सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्सम्बन्धेनात्मनश्च प्रत्यक्षत्वप्रसङ्गात् तदतीन्द्रियत्वे मानाभावात्। सुषुप्तिप्राक्काले निर्विकल्पकमेव नियमेन जायते इत्यत्रापि प्रमाणाभावात्॥**

**व्याख्या-** त्वङमनःसंयोगसत्त्वे ज्ञानसत्त्वम्, तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्यां ज्ञानत्वावच्छिन्नज्ञानं प्रति त्वङमनःसंयोगः समवायेन कारणम्। अत्र शङ्का जायते- पूर्वोक्तसंयोगेन ज्ञानमुत्पन्नं भवतीत्यत्र किं प्रमाणमिति ? यतो हि सुषुप्तिकाले न किमपि ज्ञानं भवितुमर्हति, "सुखमहमस्वाप्सम्, न किञ्चिदवेदिषम्" अर्थात् सुखपूर्वकम् अहं

सुप्तवान्, तत्र न किमपि अन्वभवमिति सर्वेषां प्राणिनामनुभवः। तत्रोच्यते- यतः सुषुप्तिकाले मनसा सह त्वक्संयोग एव न सम्भवति। तदानीं त्वगिन्द्रियं परित्यज्य मनः पुरीतति मध्ये तिष्ठति, अतः पुरीतता सह मनसः संयोगो न भवितुमर्हति। अस्यां स्थितौ ज्ञानस्य कारणं त्वङमनःसंयोगो नास्तीति कारणाभावात् ज्ञानरूपं कार्यं न सम्भवतीति त्वङमनःसंयोगः ज्ञानसामान्ये कारणं निर्विवादमुपपद्यते।

इदानीं केचन ज्ञानसामान्ये त्वङमनःसंयोगस्य कारणत्वं नाङ्गीकुर्वन्ति। अतस्तन्मतेन 'ननु' इत्यादिना शङ्कापक्षः प्रस्तूयते- ननु सुषुप्तिकाले किं ज्ञानं भविष्यति। अर्थात् सुषुप्तिकाले न किमपि ज्ञानं भवितुमर्हति। न अनुभवात्मकं ज्ञानं सम्भवति, न वा स्मरणात्मकं ज्ञानम्। ज्ञानद्वयस्यैवासम्भवात् ज्ञानं प्रति त्वङमनःसंयोगो न कारणमिति निश्चीयते। यतो हि अनुभवं प्रति या सामग्री अपेक्ष्यते, तदभावादेव आदौ अनुभवो न जायते। तद्यथा- चाक्षुषप्रत्यक्षं प्रति चक्षुर्मनःसंयोगः कारणम्, यदा चक्षुरादिना इन्द्रियेण मनःसंयोगो नास्ति तदा चाक्षुषप्रत्यक्षं न जायते। अतः सुषुप्तौ अपि इन्द्रियमनःसंयोगाभावाच्चाक्षुषादिप्रत्यक्षं न भवितुमर्हति। ज्ञानस्य मानसं प्रत्यक्षं तदैव भवति यदा मन आत्मना संयुज्यते। अनया रीत्या सुषुप्तिकाले बाहिरिन्द्रियजन्यप्रत्यक्षं (चाक्षुषादिप्रत्यक्षं) मानसं प्रत्यक्षञ्च न जायतेऽतो ज्ञानसामान्यं प्रति त्वङमनःसंयोगो न कारणम्।

यदि सुषुप्तिकाले अनुमित्यात्मकं ज्ञानं जायते इत्युच्येततदपि न सम्भवति। कथमिति चेद्, अनुमितिं प्रति व्याप्तिज्ञानं कारणम्, तस्याभावादेव नानुमितिः। अनुमित्यात्मकं ज्ञानं न भवितुमर्हति, न चोपमित्यात्मकं ज्ञानं सम्भवति। उपमित्यात्मकं ज्ञानं प्रति सादृश्यज्ञानमसाधारणं कारणम्, तदभावेन सुषुप्तौ उपमितिरपि न सम्भवतीति स्फुटमेवावगम्यते। एवमेव शाब्दबोधं प्रति पदज्ञानं साधारणं कारणम्, तदभावादेव शाब्दबोधात्मकं ज्ञानमपि तदानीं न सम्भवति। अनेन प्रकारेण यावत्यः प्रत्यक्षानुमित्युपमितिशाब्दबोधात्मका न्यायदर्शनिकैः (नैयायिकैः) अनुमताः प्रमितयः सन्ति, तेषां कृते या सामग्र्यो निर्धारितास्तासां विरहेण सुषुप्तिकाले किमप्यनुभवात्मकं ज्ञानं न भवितुमर्हतीति। अतो ज्ञानं प्रति त्वङ्मनःसंयोगः कारणमिति स्वीकुर्वतां मतं न युक्तियुक्तम्।

तथैव स्मरणात्मकं ज्ञानं प्रति अनुभवः कारणं भवतीति सुषुप्तौ कस्यापि अनुभवस्य विरहेण स्मरणात्मकं ज्ञानमपि न सम्भवतीति स्पष्टमेव। किञ्च अनुभवस्य तृतीयक्षणविनाशित्वात् पूर्वानुभूतस्य उद्बोधकं विना स्मरणात्मकं ज्ञानं नोत्पद्यते, तादृशोद्बोधकाभावाच्च सुषुप्तौ स्मृतिर्न भवितुमर्हति। एतावता सुषुप्तौ सुषुप्तिकाले ज्ञानसामान्यं प्रति त्वङ्मनःसंयोगः कारणमिति स्वीकुर्वतां यन्मतं तन्न युक्तियुक्तम्। मैवमित्यादिना पूर्वोक्तशङ्कायाः समाधानं विधीयते। मा इत्यव्ययपदं निषेधार्थकम्। तथा च ज्ञानसामान्यं प्रति त्वङ्मनःसंयोगरूपकारणं न निषिध्यते चेत् तन्नोचितमित्यर्थः। अर्थाद् निरुक्तरीत्या यदुक्तं तन्न भवितुमर्हतीत्यभिप्रायः। तर्हि यदि ज्ञानसामान्यं प्रति त्वङ्मनःसंयोगस्य हेतुत्वं न स्वीक्रियेत तदा सुषुप्तौ अहं सुखी अहं ज्ञानी इत्याद्यनुभवो जायते। सुषुप्तिपूर्वकालीना या इच्छादिका अतीन्द्रियाः सन्ति तत्कारणभूतस्य ज्ञानस्य ज्ञानादेर्मनःसन्निधानात् तद्विषयकं प्रत्यक्षं भवेदित्यापत्तिः।

सुषुप्तेः प्राग् उत्पन्नज्ञानेच्छादिव्यक्तीनामतीन्द्रियत्वस्वीकारोऽपि न सम्भवति। स्वीक्रियते यदि इत्युच्यते तर्हि तदपि न सम्भवति, यतो हि तत्र न किमपि प्रमाणं लभ्यते। तादृशेच्छादिव्यक्तीनाम् अतीन्द्रियत्वे मानाभावाद्। अत्र मानपदं प्रमाणवाचकम्। तथा च प्रमाणाभावात् तादृशप्रत्यक्षस्य अतीन्द्रियत्वं (इन्द्रियग्रहणायोग्यत्वम्) न वक्तुं शक्यत इत्यर्थः। तथैव सुषुप्तिप्राक्काले निर्विकल्पकं (निष्प्रकारकम्) ज्ञानं नियमतः सुप्तौ वर्तते इत्युक्त्वा समाधानं विधीयते चेत्तदपि नोचितम्, तत्रापि न किमपि प्रमाणं दृश्यते। प्रमाणविरहेण सुषुप्तिप्राक्काले निर्विकल्पकपि ज्ञानं नैव सम्भवति। अतस्तदुपपत्तये ज्ञानमात्रं प्रति त्वङ्मनःसंयोगः कारणमिति स्वीकर्तव्यमेव।

इदानीं ग्रन्थकारः ज्ञानसामान्ये त्वङ्मनःसंयोगस्य कारणत्वे दोषं प्रदर्शयितुं शिष्याणां शङ्कामुपस्थापयति –

**मुक्तावली- अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचक्षुषादिप्रत्यक्षकाले त्वाचप्रत्यक्षं स्याद्, विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च तत्र सत्त्वात्, परस्परप्रतिबन्धादेकमपि वा न स्यादिति ॥**

**व्याख्या** इतः प्राक् ज्ञानमात्रं प्रति त्वङ्मनःसंयोगः कारणमित्युक्तम्। तत्र शङ्का जायते– यदि ज्ञानसामान्ये त्वङ्मनःसंयोगः कारणमित्युच्यते, तदा रसनेन्द्रियेण यदा रासनप्रत्यक्षं भवति, चक्षुरिन्द्रियेण च रूपादिगुणकं चाक्षुषं वा भवति, तदापि त्वङ्मनःसंयोगस्य सत्त्वेन त्वाचप्रत्यक्षमपि स्याद्, अर्थात् स्पर्शविषयकमपि प्रत्यक्षं भवेदित्यापत्तिः। रसनिश्चये जायमाने ज्ञानमात्रं प्रति त्वङ्मनःसंयोगस्य हेतुत्वात्। तदेव स्फुटीकरोति ग्रन्थकारः - 'विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात्'। अर्थाद् रासनादिप्रत्यक्षकाले रसनविषयस्य त्वगिन्द्रियेण सह संयोगो वर्तते, त्वचा सह मनः संयोगश्चेति त्वङ्मनःसंयोगरूपकारणसत्त्वादेव त्वाचप्रत्यक्षेण भाव्यम्। तेन च 'रसविषयकं प्रत्यक्षं करोमि' इतिवद् 'रसं स्पृशामि' इति प्रत्ययोऽपि जायताम्। न च तथा सम्भवति। अतो ज्ञानसामान्यं प्रति त्वङ्मनःसंयोगो न कारणम्।

यदि निरुक्तदोषवारणाय त्वाचप्रत्यक्षसामग्री रासनादिचाक्षुषं प्रति प्रतिबन्धिका भवति, अतो रासनादिप्रत्यक्षकाले त्वाचप्रत्यक्षं न भवितुमर्हतीति समाधानेनापि न निस्तारः। अनया रीत्या परस्परं प्रतिबन्धकत्वे न रासनप्रत्यक्षं सम्भवति न वा त्वाचप्रत्यक्षम्। अमुमेव भावं प्रकाशयति ग्रन्थकारः -'परस्परप्रतिबन्धाद् एकमपि वा न स्यादिति'। अत्र एकमपि नाम -एकमपि प्रत्यक्षात्मकं कार्यं न सम्भवतीत्यर्थः।

त्वङ्मनःसंयोगस्य ज्ञानहेतुत्वविचारप्रसङ्गे केषाञ्चिन्मतं प्रस्तूयते –

**मुक्तावली- अत्र केचित् - पूर्वोक्तयुक्त्यात्वङ्मनःसंयोगस्य ज्ञानहेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स् पार्शनादिप्रतिबन्धकत्वमनुभवानुरोधात् कल्प्यत इति। अन्ये तु सुषुप्त्यनुरोधेन चर्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यते, चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयोगाभावान्न त्वाचप्रत्यक्षमिति वदन्ति।**

**मनोग्राह्यमिति। मनोजन्यप्रत्यक्षविषय इत्यर्थः। मतिर्ज्ञानम्। कृतिः प्रयत्नः, किन्तु मनोमात्रस्य गोचर इत्यनेन पूर्वमुक्तत्वादत्र नोक्तः ॥**

**व्याख्या-** अत्र 'केचिद्' इत्यस्य 'वदन्ति' इति क्रियापदेन सहान्वयो विधीयते। तेन 'केचिद् वदन्ति' इत्यर्थो लभ्यते। तथा च पूर्वं ज्ञानसामान्यं प्रति त्वङ्मनःसंयोगस्य हेतुत्वं सप्रमाणमुपपादितम्। इत्थञ्च 'ज्ञानमात्रं प्रति त्वङ्मनःसंयोगः कारणम्' इति सिद्धम्। पुनश्च रासनप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यादित्यापत्तिः प्रदर्शिता। पुनश्चाक्षुषादिप्रत्यक्षस्य या सामग्री सा रासनादिप्रत्यक्षं प्रति प्रतिबन्धिका। यतो हि चाक्षुषादिप्रत्यक्षं प्रति चक्षुरिन्द्रियम्, चक्षुरिन्द्रियेण सह रूपादिगुणसम्बन्ध इत्यादिसामग्री, सा च रासनप्रत्यक्षं प्रतिबध्नातीति चाक्षुषप्रत्यक्षकाले रासनप्रत्यक्षं न भवितुमर्हति। एतादृशप्रतिबध्यप्रतिबन्धकभावं प्रकल्प्य त्वाचप्रत्यक्षत्वापत्तिर्निराकृता। तेन स्पार्शनप्रत्यक्षकाले त्वाचप्रत्यक्षं न सम्भवतीति 'त्वाचप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वात्' इति तत्समाधानम्।

तत्र अन्ये तु ज्ञानसामान्यं प्रति त्वङ्मनःसंयोगो न कारणमिति प्रतिपादयन्ति। तन्मते सुषुप्त्यनुरोधेन ज्ञानसामान्यं प्रति चर्ममनःसंयोगः कारणं भवति, न तु त्वङ्मनःसंयोगः। अतश्चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयोगसत्त्वेऽपि न तत्र दोषः।

तथैव सुखम्, सुखत्वम्, दुःखम्, दुःखत्वम्, सुखाभावदुःखाभावश्चेत्यादयो मनसैव साक्षात्कर्तुं शक्यन्ते। एते विषया मनोभिन्नेन्द्रियेण ग्राह्या न भवन्तीति पूर्वमात्मनिरूपणावसरे 'मनोमात्रस्य गोचरे' इति इत्यनेन स्फुटीकृतमतोऽत्र न तद्व्याख्यातम्।

## *पदानामर्थपरिचयः*

**आलोकसंयोगः** = चक्षुरिन्द्रियजन्यप्रत्यक्षे प्रकाशस्य सम्बन्धः

**योग्यवृत्तिः** = प्रत्यक्षयोग्ये द्रव्ये विद्यमाना गुणा जातयश्च

**त्वङ्मनःसंयोगः** = त्वगिन्द्रियस्य मनसा सह सम्बन्धः

**पुरीतत्** = नाडीविशेषः, यत्र सुषुप्तिकाले मनः प्रविशति

**मतिः, कृतिः** = ज्ञानं प्रयत्नश्च, यौ मानसप्रत्यक्षस्य विषयौ स्तः

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) जन्यप्रत्यक्षं कतिविधम् ? तेषां नामानि लिखत।

(ख) घ्राणेन्द्रियेण गन्धं विहाय अन्या का जातिर्गृह्यते ?

(ग) चाक्षुषप्रत्यक्षं प्रति द्वे मुख्ये कारणे के ?

(घ) त्वगिन्द्रियजन्यद्रव्यप्रत्यक्षे को गुणः कारणं भवति ?

(ङ) सुषुप्तिकाले ज्ञानं किमर्थं न जायते ?

(च) चक्षुषा कति गुणाः प्रत्यक्षीक्रियन्ते ?

### २. व्याख्यात्मकमुत्तरं लिखत

(क) "येन इन्द्रियेण यद् गृह्यते, तद्गता जातिस्तदभावश्च ग्राह्यः" इति नियमं गन्ध-रस-शब्दादीनां सन्दर्भे सोदाहरणं विवृणुत।

(ख) द्रव्यचाक्षुषं प्रति उद्भूतरूप-आलोकसंयोगयोः कारणत्वं मुक्तावलीकारः कथं प्रसाधयति ? ग्रीष्मोष्मणि (सूर्यापाते) प्रत्यक्षं किमर्थं न भवति ? इति स्पष्टयत।

(ग) "रूपान्यत् चक्षुषो योग्यम्" इति कारिकायास्तात्पर्यं स्फुटीकुरुत।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) प्राचीनमते वायोरनुमेयत्वं तथा नवीनमते वायोरुद्भूतस्पर्शवत्त्वात् प्रत्यक्षत्वमित्येतयोर्मतयोस्तुलनां कुरुत।

(ख) सुषुप्तिकालेज्ञानस्याभावः कथं जायते ? तत्र अनुभवात्मक-स्मरणात्मकज्ञानानां सामग्रीविरहं प्रदर्शयन् त्वङ्मनःसंयोगस्य हेतुत्वं साधयत।

(ग) "सुखं दुःखमिच्छा द्वेषो मतिः कृतिः" इत्येते विषया मनसा एव किमर्थं गृह्यन्ते ? इति निरूप्य आत्मनो विशेषगुणानां मानससाक्षात्कारे महत्त्वं लिखत।

४. **परस्परं मेलयत**

| | |
|---|---|
| घ्राणेन्द्रियग्राह्यम् | उद्भूतस्पर्शः |
| रसनेन्द्रियग्राह्यम् | शब्दत्वजातिः |
| चक्षुरिन्द्रियग्राह्यम् | गन्धत्वम् |
| श्रोत्रेन्द्रियग्राह्या | मधुररसः |
| त्वगिन्द्रियग्राह्यः | उद्भूतरूपम् |

५. **सन्धियुक्तपदच्छेदं कुरुत**

घ्राणजादिप्रभेदेन, आलोकोद्भूतरूपयोः, त्वङ्मनःसंयोगः, सुषुप्त्यनुरोधेन।

६. **यदि अन्धकारे आलोकसंयोगो न स्यात्, तर्हि घ्राणेन्द्रियेण गन्धस्य प्रत्यक्षं भवेद् वा न वा ? मुक्तावल्युक्तरीत्या विमृशत।**

त्रयोविंशः पाठः

# निर्विकल्पकस्वरूपनिरूपणम्

**कारिका- ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते।**

**अन्वयः-** निर्विकल्पाख्यं यद् ज्ञानम्, तद् अतीन्द्रियम् इष्यते।

**कारिकार्थः :** निर्विकल्पकम् = निष्प्रकारकम्, आख्यम् = नाम, यद् ज्ञानम्, तद् अतीन्द्रियम् = इन्द्रियेण ग्रहणायोग्यम् इष्यते = नैयायिकाः स्वीकुर्वन्ति। एतेन नैयायिकाः निष्प्रकारकम् = निर्विकल्पकं ज्ञानमिन्द्रियेण गृहीतं न शक्यमतोऽतीन्द्रियमिति स्वीकुर्वन्तीत्यर्थः।

निर्विकल्पकसविकल्पयोः स्वरूपं सोदाहरणं प्रतिपादयन् ग्रन्थकारस्तयोः पार्थक्यञ्च सोदाहरणं स्पष्टयति-

**मुक्तावली- चक्षुःसंयोगाद्यनन्तरं घट इत्याकारकं घटत्वादिविशिष्टविषयकज्ञानं न सम्भवति, पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावाद् विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्। तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते तदेव निर्विकल्पकम्। तच्च न प्रत्यक्षम्। तथा हि-वैशिष्ट्यानवगाहिज्ञानस्य प्रत्यक्षं न भवति घटमहं जानामीति प्रत्ययात्। तत्राऽत्मनि ज्ञानं प्रकारीभूय भासते। ज्ञाने घटः, तत्र घटत्वम्। तत्र यः प्रकारः स एव विशेषणमित्युच्यते। विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते। विशेषणतावच्छेदकप्रकारकं ज्ञानं हि विशिष्टवैशिष्ट्यज्ञाने कारणम्। निर्विकल्पके च घटत्वादिकं न प्रकारस्तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञाने न सम्भवति, घटत्वाद्यप्रकारकं च घटादिविशिष्टज्ञानं न सम्भवति, जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमात्॥**

**व्याख्या :** नैयायिका निर्विकल्पकसविकल्पकभेदेन द्विविधं ज्ञानं स्वीकृत्य तत्स्वरूपं निर्धारयन्ति। निष्प्रकारकम् = विशेषण-विशेष्य-संसर्गानवगाहिज्ञानं निर्विकल्पकमित्युच्यते। निर्गताः = रहिताः, विकल्पाः = विशेषणविशेष्यसंसर्गा यस्माद् ज्ञानादिति व्युत्पत्त्या निर्विकल्पकमिति स्वरूपं निष्पन्नं भवति। अत्र न्यायमतेन ज्ञानप्रक्रिया प्रस्तूयते – चक्षुषा घटादिविषयस्य संयोगो जायते, तादृशसंयोगानन्तरं प्रथमं घटघटत्वसमवायानां विशेषणविशेष्यसम्बन्धानां ज्ञानं न भवति। यतो हि चक्षुःसंयुक्तो यो घटादिविषयः, तत्र विशेषणम्, विशेष्यम्, विशेषणविशेष्ययोः सम्बन्धः' इति रीत्या त्रयो विषया ज्ञाने भासन्ते। यथा घटे यद् घटत्वं तद् विशेषणम्, घटत्वविशिष्टो घटो विशेष्यः, घटघटत्वयोः सम्बन्धः (समवायः)। तद्रहितं यत्किञ्चिदिदमित्यात्मकं ज्ञानमेव निष्प्रकारकं भवति, तस्यैव नामान्तरं 'निर्विकल्पकम्' इति

नैयायिकाः कथयन्ति। अतः प्रथमं ज्ञानं विशेषणविशेष्यसंसर्गानवगाहि भवतीति तादृशज्ञानमेव निर्विकल्पकमिति सिद्ध्यति।

तत्र कारणमुच्यते- पूर्वं विशेषणस्य घटत्वादिविषयस्य भानासम्भवाद्। अर्थाच्चक्षुःसंयोगानन्तरं 'घट' इत्युक्तौ किं विशेषणम्, किं विशेष्यम्, को वा विशेषणविशेष्ययोश्च सम्बन्ध इति विषयाणां भानं न सम्भवति। 'विशिष्टज्ञानं प्रति विशेषणज्ञानं कारणम्' इति नियमः। विशिष्टबुद्धिस्तादृशविशेषणज्ञानं विना न जायतेऽतो निर्विकल्पकज्ञानं विशेषणविशेष्यसंसर्गावगाहि न भवितुमर्हति। एतेन विशेषणविशेष्यसम्बन्धावगाहि ज्ञानं सविकल्पकं भवति चेत् तद्भिन्नं प्राथमिकं ज्ञानं निर्विकल्पकमिति ज्ञानद्वयस्य पार्थक्यं स्पष्टमेव।

तथाविधं निर्विकल्पकमिति ज्ञानं न प्रत्यक्षम्, यतो हि विशेषणविशेष्ययोर्यद्वैशिष्ट्यं वर्तते तेषामवगाहनं यस्मिन् ज्ञाने सति सम्भवति तस्य प्रत्यक्षं न भवति। यथा- 'घटमहं जानामि' इति यत् प्रत्यक्षं तत्र आत्मनि समवायेन ज्ञानं प्रकारतया भासते। अत्र प्रकारपदस्यार्थो विशेषणम्। विषयतासम्बन्धेन ज्ञानविशेषे हि ज्ञाने घटस्य भानं भवति, तादृशघटादौ घटत्वं जातिः प्रकारतया भासते। प्रकारस्यैव पर्यायवाचिपदं विशेषणम्। प्रकारविशेष्ययोः समानार्थकत्वात् तदेव स्पष्टयन्नाह ग्रन्थकारः- यः प्रकारः स एव विशेषणमित्युच्यते। विशेषणपदार्थे यद्विशेषणं वर्तते, तदेव विशेषणताच्छेदकम्। तच्च ज्ञाने प्रकारतया भासते। विशिष्टज्ञानं प्रति विशेषणविषयकं ज्ञानं कारणम्। अनया रीत्या विशेषणतावच्छेदकं ज्ञानं विशिष्टवैशिष्ट्यावगाहि ज्ञानात्मकं कार्यं प्रति कारणम्। यतो हि विशेषणयुक्तानां पदार्थानां यद्वैशिष्ट्यम् = सम्बन्धः, तद्विषयकम् = तन्निष्ठविषयतानिरूपकं ज्ञानमेव विशिष्टवैशिष्ट्यावगाहि ज्ञानमित्युच्यते। अत्र 'ज्ञानविषययोर्निरूप्यनिरूपकभावः' अर्थाद् विषयविषयिभावसम्बन्धेन ज्ञानेऽन्वयो भवति।

तत्र निर्विकल्पकज्ञाने घटत्वादिकं प्रकारतया न भासते, तेन तादृशज्ञानं विशिष्टवैशिष्ट्यावगाहि भवितुं नार्हति। यतो हि तत्र घटघटत्वसमवायादिविषयकं यत् किञ्चिदिदं विशेषणविशेष्यसम्बन्धभानरहितं निर्विकल्पकं ज्ञानमित्युच्यते। तद्भिन्नं विशेषणविशेष्यभावापन्नं ज्ञानं सप्रकारकं भवति। तच्च प्रत्यक्षात्मकं व्यवसायात्मकं ज्ञानम्। एतादृशज्ञानानन्तरं यज्ज्ञानं जायते, तदनुव्यवसायात्मकं ज्ञानम्। 'व्यवसायजन्यं ज्ञानमेव अनुव्यवसायात्मकं ज्ञानम्' इत्युच्यते। एतेन सविकल्पकज्ञाने निर्विकल्पकं ज्ञानं कारणं भवति, सविकल्पकज्ञानोत्तरं जायमानं ज्ञानं प्रति च सप्रकारकं ज्ञानं कारणमिति रीत्या अनुव्यवसायात्मकं ज्ञानं विशिष्टवैशिष्ट्यावगाहि ज्ञानमिति फलितार्थः।

अत्रेदमवधेयम्- प्रकारताख्या, विशेष्यताख्या, संसर्गताख्या चेति भेदेन ज्ञानीयविषयता त्रेधा। एतादृशविषयतात्रयशून्यं ज्ञानं निर्विकल्पकमित्युक्तम्। अर्थात् प्रकारताशून्यत्वे सति विशेष्यताशून्यत्वे सति संसर्गताशून्यत्वं निर्विकल्पकज्ञानस्य लक्षणम्। 'घटोऽयम्', 'छात्रोऽयम्' इत्यादिज्ञाने 'यत्किञ्चिदिदम्' इत्यात्मकं भानं भवति, तदानीं तत्रस्था विषयाः प्रकारत्वेन विशेष्यत्वेन तयोः (प्रकारविशेष्यपदार्थयोः) संसर्गत्वेन च पृथग्भूय नैव भासन्ते। अतस्तादृशज्ञाने प्रकारताशून्यत्वं विशेष्यताशून्यत्वं संसर्गताशून्यत्वञ्च वर्तते इति भवति लक्षणसमन्वयः। ज्ञानीयविषयाणां भाने कमपि विशेषनियमं स्वीकृत्य नैयायिकाः तत्स्वरूपं निर्धारयन्ति।

अतस्तेषां भानं घटत्वेन पुस्तकत्वेन द्रव्यत्वेनैवेति तादृशज्ञानस्य किञ्चिद्धर्मप्रकारकत्वमिति स्फुटमवगम्यते। अनया रीत्या विशिष्टं ज्ञानं किञ्चिद्धर्मप्रकारकमेवेति पूर्वोक्तनियमेन व्यवस्थाप्यते। तेन 'घट' इत्यकारकं ज्ञानं घटत्वप्रकारकमेव भवति, तस्य जात्यखण्डोपाध्यतिरिक्तत्वात् इति। तत्र घटविषये विद्यमानं यद् घटत्वादिकन्तु स्वरूपतो भासते, जातेस्तादृशं स्वरूपं वर्तते तथैव तत्प्रतीतिरूपपद्यते न तु किञ्चिद्धर्मपुरस्कारेणेत्यर्थः।

एवमेव प्रतियोगित्वम्, अनुयोगित्वमित्यादयो ये अखण्डोपाध्यस्तेषामपि भानं स्वरूपतो भवति। एतेन अनुल्लिख्यमाना जातयोखण्डोपाधित्वेन अभिमताः प्रतियोगित्वानुयोगित्वादयश्च पदार्थाः स्वरूपतो भासन्त इति नैयायिकानां वैशेषिकाणाञ्च निष्कर्षः।

सम्प्रति प्रसङ्गसङ्गत्या प्रत्यक्षकारणानि प्रदर्श्य कार्यकारणभावस्वरूपं व्यवस्थापयति ग्रन्थकारः –

**कारिका- महत्त्वं षड्विधे हेतुः, इद्रियं करणं मतम् ॥ ५८ ॥**

**अन्वयः-** षड्विधे महत्त्वं हेतुः, इन्द्रियं करणं मतम्।

**कारिकार्थः-** षड्विधप्रत्यक्षं प्रत्यपि महत्त्वं हेतुर्भवति। तत्र इन्द्रियाणि च कारणानि भवन्तीत्यर्थः।

**मुक्तावली- महत्त्वमिति। द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणम्। द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन, द्रव्यसमवेतानां गुणत्वकर्मत्वादीनांप्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणमिति ॥**

व्याख्या- 'महत्त्वमित्यनेन कारिकास्थमहत्त्वपदं निर्दिश्यते। तथा च द्रव्यविषयकचाक्षुषरासनत्वादिकप्रत्यक्षेमहत्त्वम् समवायसम्बन्धेन महत्परिमाणं कारणं भवति। अर्थाद् महत्परिमाणवतामेव पृथिव्यादिद्रव्याणां प्रत्यक्षं जायते। अतो द्रव्यादिसाक्षात्कालं प्रति समवायेन महत्परिमाणं कारणमिति कार्यकारणभावमवलम्ब्य द्रव्यादिसाक्षात्कारोपपत्तये द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणमित्युक्तम्।

एवमेव पृथिव्यादिद्रव्येषु समवायेन वर्तमानानां गुणकर्मसामान्यानां यत्प्रत्यक्षं जायते तादृशप्रत्यक्षं प्रतिस्वाश्रयसम वायसम्बन्धेनमहत्परिमाणं कारणम्। अत्र 'स्व' पदेन महत्परिमाणं गृह्यते, तदाश्रयं पृथिव्यादिद्रव्यम्, तत्समवायश्च पृथिव्यादिद्रव्यैः सह वर्तते। यतो हि पृथिव्यादिद्रव्ये गुणाः कर्माणि पृथिवीत्वादिसामान्यानि च ते समवायेन वर्तन्त इति महत्परिमाणं स्वाश्रयसमवायात्मकपरम्परासम्बन्धेन गुणकर्मसामान्येषु तिष्ठति। अतः तेषां गुणकर्मसामान्यानां साक्षात्कारः सम्भवति।

एवमेव पृथिव्यादिद्रव्ये समवेताः (समवायेन वर्तमानाः) ये गुणकर्मादयस्तत्र वर्तमाना ये गुणत्वकर्मत्वादयस्तेषां प्रत्यक्षे महत्परिमाणं स्वाश्रयसमवेतसमवायसम्बन्धेनकारणम्। पूर्ववदत्रापि स्वपदेन महत्परिमाणं गृह्यते तदाश्रयं

पृथिव्यादिद्रव्यं तत्समवेतानि = तेषु (पृथिव्यादिद्रव्येषु) समवायेन वर्तमानानि गुणकर्माणि तत्समवायश्च गुणत्वकर्मत्वादौ वर्तते। यतो हि जातिव्यक्त्योः सम्बन्धः समवाय इति नैयायिकाः स्वीकुर्वन्ति।

अनया रीत्या महत्परिमाणं (महत्त्वं) पृथिव्यादिद्रव्यसमवेतेषु गुणकर्मसु यत्समवेतं गुणत्वं कर्मत्वञ्च तत्र वर्तत इति तादृश द्रव्यसमवेत-समवेत-गुणत्वादिसाक्षात्कारं प्रतिस्वाश्रयसमवेतसमवायसम्बन्धेनमहत्परिमाणं कारणमिति। अत्र कारणतावच्छेदकधर्मो महत्परिमाणत्वं भवति चेत् कारणतावच्छेदकसम्बन्धःस्वाश्रयसमवेतसमवायः। साक्षात्सम्बन्धेन महत्परिमाणस्य गुणत्वादौ असम्भवात् निरुक्तपरम्परासम्बन्धः कल्प्यते।

सम्प्रति इन्द्रियस्वरूपं प्रदर्शयति ग्रन्थकारः-

**मुक्तावली- इन्द्रियमिति। अत्रापि "षड्विधे" इत्यनुषज्यते। इन्द्रियत्वं न जातिः, पृथिवीत्वादिना साङ्कर्यात्, किन्तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सतिज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम्। आत्मादिवारणाय सत्यन्तम्। उद्भूतविशेषगुणस्य श्रोत्रे सत्त्वाच्छब्देतरेति। विशेषगुणस्य रूपादेश्चक्षुरादावपि सत्त्वादुद्भूतेति॥**

**व्याख्या-** महत्परिमाणं षड्विधं प्रत्यक्षं प्रति कारणमिति सोदाहरणं प्रतिपादितम्। तत्र इन्द्रियं करणं भवतीति यथायथं स्फुटीकृतम्। षड्विधस्य प्रत्यक्षस्य प्रत्येकं षड्विधप्रत्यक्षं प्रति समवायेन महत्परिमाणं हेतुरित्यर्थः। अतश्चोक्तं मुक्तावलीमारेण- षड्विध इत्यनुषज्यते। पूर्वोक्तषड्विधप्रत्यक्षं प्रति सम्बध्यत इत्यभिप्रायः।

इन्द्रिये यद् 'इन्द्रियत्वं' वर्तते तन्न जातिः, जातिबाधकस्यसाङ्कर्यदोषस्य सत्त्वात्। साङ्कर्यं नाम जातिबाधको दोषविशेषः। तल्लक्षणं- परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशः।

तद्यथा- पृथिवीत्वाभाववति जलीये रसनेन्द्रिये हि इन्द्रियत्वं वर्तते, इन्द्रियत्वाभाववति घटादिद्रव्ये पृथिवीत्वञ्च दृश्यते। घ्राणेन्द्रियस्य पार्थिवत्वात् तत्र पृथिवीत्वमिन्द्रियत्वञ्च वर्तत एवेति पृथिवीत्वस्येन्द्रियत्वस्य च सामानाधिकरण्यं घ्राणेन्द्रिये सत्त्वाद् जातिबाधकेनसाङ्कर्यदोषेण इन्द्रियत्वस्य जातिमत्त्वं प्रतिबध्यते। अत एव "इन्द्रियत्वं न जातिः" इत्युक्तम्। तर्हि किमिदं (इन्द्रियत्वम्) इति जिज्ञासायामुच्यते- इन्द्रियत्वम्। इन्द्रियलक्षणन्तु- "शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम्"। अत्र इन्द्रियमिति लक्ष्यबोधकं पदम्, 'शब्देतर' इत्यादिकन्तु लक्षणबोधकम्। तत्र तथा च शब्देतरे ये उद्भूतविशेषगुणाः- रूप-रस-आदयः, सुखादयश्च, ते च गुणाः पृथिव्यादौ आत्मनि च समवायेन वर्तन्ते न तु इन्द्रिये। अतस्तेषां गुणानामनाश्रयत्वं चक्षुरादौ लक्ष्यीभूते इन्द्रिये प्रसिद्धमेव। ज्ञानमात्रं प्रतिइन्द्रियमनःसंयोगःकारणम्, तादृशज्ञानकारणमनःसंयोगाश्रयत्वञ्च चक्षुरादौ सत्त्वाद् भवति लक्ष्ये लक्षणसमन्वयः।

अत्र 'शब्देतरविशेषगुणानाश्रयत्वमिति' सत्यन्तविशेषणपदानुपादाने ज्ञानं प्रति समवायेन कारणं यद् आत्ममनःसंयोगः, तदाश्रयत्वस्य आत्मनि सत्त्वादलक्ष्ये आत्मनि लक्षणसमन्वयाद् भवत्यतिव्याप्तिः। अतस्तद्वारणाय सत्यन्तविशेषणदलं

लक्षणे निवेशनीयम्। शब्देतरोद्भूता ये विशेषगुणाः सुखादयस्तेषामाश्रयत्वमेव आत्मनि वर्तते न तु अनाश्रयत्वमिति नात्मनि लक्षणमिदं सङ्गच्छते। तस्मान्नाति व्याप्तिः। तथैव शब्देतरेति पदनिवेशे सति- 'उद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमन:संयोगाश्रयत्वम्' इति लक्षणमित्युच्यते चेत्- तत्रोद्भूतविशेषगुणपदेनशब्दोऽपि ग्रहीतुं शक्यते, तदाश्रयत्वमेव गगनात्मकश्रोत्रेन्द्रिये वर्तते, तादृशानाश्रयत्वाभावात् श्रोत्रेन्द्रिये लक्षणं न सङ्गच्छतेऽतस्तत्राव्याप्तिः। तद्वारणाय 'शब्देतरेति' दलमावश्यकम्। तदुपादाने च शब्देतरविशेषगुणपदेन शब्दो न ग्रहीतुं शक्यते, शब्दं विहाय तदितरविशेषगुणा रूपाद्याः सुखाद्याश्च एव गृह्यन्ते, तेषामनाश्रयत्वं ज्ञानकारणमन:संयोगाश्रयत्वं यावत्सु इन्द्रियेषु वर्तत इति न कोऽपि दोषः।

'उद्भूतपदं' यदि लक्षणे न निवेश्यते तदा शब्देतरे येअनुद्भूतरूपादयोविशेषगुणाः गृह्यन्ते, तेषामनाश्रयत्वं चक्षुरादौ नास्तीति लक्ष्ये लक्षणस्यागमनात्अव्याप्तिः। तन्निवेशे च चक्षुरादौ रूपादयो ये विशेषगुणाः सन्ति ते नैवोद्भूताः, तेन शब्देतरोद्भूतविशेषगुणानाश्रयत्वस्य ज्ञानकारणमन:संयोगाश्रयत्वस्य चक्षुरादौ सत्त्वाद् भवति लक्षणसमन्वयो न तत्राव्याप्तिरित्यर्थः।

अनेन प्रकारेण 'शब्देतरानुद्भूतविशेषगुणानाश्रयत्वविशिष्टज्ञानकारणमन:संयोगाश्रयत्वम्' इन्द्रियत्वमिति इन्द्रियलक्षणं विधाय तद्घटकानां पदानामावश्यकत्वञ्चसोदाहरणं स्फुटीकृतम्। यद्यपि अन्यविधान्यपि इन्द्रियलक्षणानि ग्रन्थकारैरिन्द्रियलक्षणनिरूपणप्रसङ्गे प्रस्तुत्य विचारितानि सन्ति परमिदं लक्षणमन्येभ्यो लक्षणेभ्यो विलक्षणं वस्तुगतञ्च प्रतीयते, यदिन्द्रियलक्षणं मुक्तावलीकारेण विहितमिति।

**मुक्तावली- उद्भूतत्वं न जातिः शुक्लत्वादिना सङ्करात्। न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यम् ? उद्भूतरूपत्वादिना चाक्षुषादौ जनकत्वानुपपत्तेः, किन्तु शुक्ल त्वादिव्याप्यंनानैवानुद्भूतत्वम्, तदभावकूटश्चोद्भूतत्वम्, तच्च संयोगादावप्यस्ति। तथा च शब्देतरोद्भूतगुणः संयोगादिः चक्षुरादावप्यस्त्यतो विशेषेति। कालादिवारणाय विशेष्यदलम्। इन्द्रियावयवविषयसंयोगस्यापि प्राचां मते प्रत्यक्षजनकत्वादिन्द्रियावयववारणाय, नवीनमते कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतचक्षुःसंयोगाश्रयस्य कालादेर्वारणाय मन:पदम्।ज्ञानकारणमित्यपितद्वारणायैव।करणमिति।असाधारणंकारणंकरणम्।असाधारणत्वं व्यापारवत्त्वम्॥**

**व्याख्या-** उद्भूतत्वं किमिति शिष्यस्य मनसि यदा जिज्ञासा जायते तदा तां जिज्ञासां समाधत्ते ग्रन्थकारः- उद्भूतत्वं न जातिः। अर्थाद् उद्भूते वर्तमानं यद् उद्भूतत्वं तन्न जातिर्भवितुमर्हतीति तात्पर्यम्। कस्मादिति शङ्कायामुच्यते- "शुक्लत्वादिना साङ्कर्यादिति"। अर्थाद् जातिबाधकस्य जातिप्रतिबन्धकस्य साङ्कर्यदोषस्य सत्त्वादेव उद्भूतत्वं जातिर्न भवितुं शक्नोति।

यथा- उद्भूतत्वाभाववति परमाणुगतरूपे शुक्लत्वं वर्तते उद्भूतत्वन्तु न दृश्यते। प्रत्यक्षगन्धे च तादृशमुद्भूतत्वं शुक्लत्वञ्चोभयं वस्त्रादौ (अन्यवस्त्रादिगतशुक्लरूपे) वर्तत इति जातिप्रतिबन्धकस्य साङ्कर्यदोषस्य सत्त्वादुद्भूतत्वं न जातिरपि तूपाधिरित्यर्थः।

पुनत्र शङ्काजायते- शुक्लत्वादिव्याप्यं यद् उद्भूतत्वं तन्न एकमपि तु नाना (अनेकम् इत्यर्थः)। आदिपदेन नीलत्वपीतत्वादिकं गृह्यते। तथा च शुक्लत्वव्याप्यमेकमुद्भूतत्वम्, नीलत्वव्याप्यमुपरमुद्भूतत्वम्, सुरभित्वव्याप्यम् अन्यद् उद्भूतत्वमिति रीत्या उद्भूतत्वं नानाविधम्। अत्र 'शुक्लत्वव्याप्यं' नाम शुक्लत्वं नीलत्वाद्यपेक्षया व्यापकम्, यतो हि उद्भूतत्वापेक्षया शुक्लत्वनीलत्वादिकं व्यापकम्, तादृशशुक्लत्वाद्यपेक्षया च उद्भूतत्वं व्याप्यमित्यभिप्रायेणोक्तम्- शुक्लत्वादिव्याप्यम् उद्भूतत्वम्, तच्च नानाविधमिति या शङ्का समुपस्थापिता सा नोचिता। अत्र 'न' चेत्यस्य वाच्यमिति क्रियापदेन सहान्वयं विधाय शङ्काकर्तुरभिप्रायः प्रकटीक्रियते।

उक्तशङ्कायाः समाधानमुच्यते- उद्भूतत्वस्य यदि नानात्वं स्वीक्रियते तदा चाक्षुषादिप्रत्यक्षं प्रति उद्भूतत्वेन रूपादीनां कारणत्वं सत्त्वाद् व्यवस्थापयितुं न शक्यते। अर्थात् चाक्षुषादिप्रत्यक्षे रूपादीनां यत् कारणत्वं तच्च उद्भूतत्वेनैवेति या अनुभवसिद्धा व्यवस्था सा नोपपद्यते (न सिध्यतीत्यर्थः)। कुतः ? इत्याशङ्कायामुच्यते- व्यभिचाराद्, यतो हि शुक्लत्वव्याप्य-उद्भूतत्वाभावेऽपि नीलत्वव्याप्य-उद्भूतत्वविशिष्टरूपादिसत्त्वे चाक्षुषप्रत्यक्षं सर्वानुभवसिद्धम्, अर्थात् चाक्षुषं भवत्येवेति कारणाभावेऽपि प्रत्यक्षात्मककार्यस्य जायमानत्वाद् व्यतिरेकव्यभिचारः। अनेन प्रकारेण शुक्लत्वादिव्याप्यं यद् उद्भूतत्वं तस्य नानाविधत्वं वक्तुं न शक्यते। अतो ग्रन्थकारस्तादृशमुद्भूतत्व निरूप्य अनुद्भूतत्वस्य पार्थक्यं प्रदर्श्य तत्स्वरूपमित्थं निर्धारयति- किन्तु शुक्लत्वादिव्याप्यं नामैवानुद्भूतत्वं तदभावकूटश्चोद्भूतत्वम्।

अर्थात् शुक्लत्वनीलत्वादिव्याप्यत्वेन यस्य प्रतीतिर्भवति तदेवानुद्भूतत्वम्, तच्च नानाविधम्, तादृशनानाविधानुद्भूतत्वाभावसमूह एवोद्भूतत्वम्, तेनैव रूपेण चाक्षुषादिप्रत्यक्षे रूपादिकं कारणमिति रीत्या उद्भूतत्वस्वरूपं व्यवस्थाप्य कार्यकारणभावः स्वीक्रियते चेन्न कश्चन दोषः।

एवं सति पूर्वोक्तेन्द्रियलक्षणेविशेषपदानुपादाने शब्देतरतादृशानुद्भूतत्वाभावसमुदायात्मकोद्भूतत्वविशिष्टगुणपदेन 'संयोग'स्यापि ग्रहणसम्भवात् तदाश्रयत्वमेव चक्षुरादौ वर्तत इति न तु तदनाश्रयत्वमिति भवत्यव्याप्तिः। अतस्तद्वारणीय विशेषपदं लक्षणे निवेशनीयम्। तन्निवेशे च विशेषगुणपदेन संयोगो ग्रहीतुं न शक्यते, संयोगस्यसामान्यगुणत्वात्। तत्र सुखादिविशेषगुणं गृहीत्वा तदनाश्रयत्वं लक्ष्ये चक्षुरादीन्द्रिये वर्तत इति भवति लक्षणसमन्वयः।

तथैव 'ज्ञानकारणमनःसंयोगाश्रयत्वमिति' विशेष्यदलानुपादाने कालादेरपि शब्देतरोद्भूत तद्विशेषगुणाश्रयत्वादलक्ष्ये लक्षणगमनादतिव्याप्तिः। तदर्थं विशेष्यदल इन्द्रियलक्षणघटके विशेष्यदलं निवेशनीयम्। तन्निवेशे च कालादौ ज्ञा नकारणमनःसंयोगाश्रयत्वाभावान्न तत्रातिव्याप्तिः। तथैव विशेष्यदले मनःपदं न निवेश्यते चेत् प्राचीनमते चक्षुरादीन्

द्रियावयवघटसंयोगस्यापि चाक्षुषप्रत्यक्षकारणत्वं स्वीक्रियते, तत्र ततश्च शब्दतरोद्भूतविशेषगुणानश्रयत्वं ज्ञानकारण तादृशेन्द्रियावयवसंयोगश्रयत्वञ्च चक्षुराद्यवयवे वर्तत इति तत्रातिव्याप्तिः ।

मनःपदस्य निवेशे तु चक्षुरादीन्द्रियावयवे मनःसंयोगाश्रयत्वाभावान्नातिव्याप्तिः सम्भवति । नव्यानां मते तु कालद्रव्ये रूपस्याभावाच्चक्षुःसंयुक्तविशेषणतासन्निकर्षः कारणं न स्वीक्रियते, तेन प्रत्यक्षे तादृशसन्निकर्षान्तर्गतचक्षुःसंयोगस्यापि लक्षणघटकज्ञानकारणसंयोगपदेन ग्रहणसम्भवात्, तदाश्रयत्वं कालादौ सत्त्वादलक्ष्ये लक्षणगमनादतिव्याप्तिः । तदर्थमिन्द्रियलक्षणघटकविशेष्यदले मनःपदं निवेशनीयम्। तन्निवेशे च कालादौ ज्ञानकारणमनःसंयोगाभावान्नातिव्याप्तिः । तत्रैव ज्ञानकारणादिति पदानुक्तौ मनःसंयोगस्य कालादौ सत्त्वात् पुनस्तत्रातिव्याप्तिः, तत्पदनिवेशे तु कालादेर्मनःसंयोगाश्रयत्वस्य वर्तमानत्वेऽपि ज्ञानकारणमनःसंयोगाश्रयत्वस्य तत्राविरहान्नातिव्याप्तिः ।

अत्र करणप्रविष्टकार्यकारणभावे कारणपदेनासाधारणं कारणं गृह्यते। अर्थाद् असाधारणं कारणं करणम्। तत्रासाधारणत्वं च व्यापारवत्त्वम्। तथा च व्यापारवदसाधारणं कारणं करणमित्यर्थः। एवञ्च घटादिविषयकं यत्प्रत्यक्षं भवति तत्र चक्षुषो यो घटसंयोगः, तस्यैव व्यापारत्वम् (द्वारत्वम्) तद्वदसाधारणं कारणं चक्षुरादिकमिति घटादिविषयकचाक्षुषप्रत्यक्षकरणं चक्षुरादिकमिन्द्रियमिति । व्यापारस्य नामान्तरं द्वारमित्युच्यते ।

तच्च तज्जन्यत्वे सति तज्जन्यजनकत्वम्। यथा- चक्षुषा घटस्य यः संयोगस्तत्र चक्षुरिन्द्रियजन्यत्वं घटविषयकप्रत्यक्षजनकत्वं च वर्तत इति व्यापारलक्षणसमन्वयात्चक्षुर्घटसंयोगस्य व्यापारत्वं सिद्ध्यति। एवमेवान्यत्रापि बोध्यम्।

## *पदानामर्थपरिचयः*

**निर्विकल्पकज्ञानम्** = विशेषणविशेष्यसंसर्गसम्बन्धशून्यं ज्ञानम् (निष्प्रकारकं ज्ञानम्)

**सविकल्पकज्ञानम्** = विशेषणविशेष्यसम्बन्धावगाहि ज्ञानम् (सप्रकारकं ज्ञानम्)

**विशिष्टबुद्धिः** = विशेष्यविशेषणसम्बन्धावगाहिनी बुद्धिः

**जनकत्वम्** = कारणत्वम्

**असाधारणत्वम्** = विशेषणधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वम्

**सुषुप्तिः** = पुरीतद्वाड्यवच्छेदेन जायमान आत्ममनःसंयोगः

## अभ्यासः

### १. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) निर्विकल्पकज्ञानस्य लक्षणं किम् ?

(ख) विशिष्टबुद्धिर्का ?

(ग) विशिष्टबुद्धिं प्रति किं कारणम् ?

(घ) निर्विकल्पकं ज्ञानं प्रत्यक्षं भवति न वा ?

(ङ) द्रव्यप्रत्यक्षे महत्त्वं केन सम्बन्धेन कारणं भवति ?

(च) इन्द्रियत्वं जातिरस्ति न वा ?

(छ) करणस्य लक्षणं मुक्तावल्यां किम् उक्तम् ?

### २. व्याख्यात्मकमुत्तरं लिखत

(क) चक्षुःसंयोगाद्यनन्तरं प्रथमं 'घटः' इति विशिष्टज्ञानं किमर्थं न सम्भवति ? "विशेषणज्ञानस्य कारणत्वात्" इति नियममत्र सोदाहरणं विवृणुत।

(ख) द्रव्यगुणकर्मणां प्रत्यक्षे कारणानि निर्दिशत।

### ३. विवेचनात्मकमुत्तरं लिखत

(क) "शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति..." इति इन्द्रियलक्षणस्य पदकृत्यं विवेचयत।

(ख) "उद्भूतत्वं न जातिः" इति मुक्तावलीकारस्य आशयः कः ? शुक्लत्वादिनैव साङ्कर्यं प्रदर्शयन् उद्भूतत्वस्य स्वरूपं (अनुद्भूतत्वाभावकूटत्वं) विवृणुत।

(ग) "जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमः" इति सिद्धान्तं निर्विकल्पकसविकल्पकयोर्मध्ये सङ्गमयत।

## ४. उचितोत्तरे ( ✓ ) चिह्नेन अनुचितोत्तरे ( X ) इति चिह्नेन सङ्केतयत

(क) निर्विकल्पकं ज्ञानं चक्षुषा गृह्यते। ( )

(ख) विशिष्टवैशिष्ट्यज्ञाने विशेषणज्ञानं कारणम्। ( )

(ग) महत्त्वं गुणप्रत्यक्षे साक्षात् समवायसम्बन्धेन कारणम्। ( )

(घ) इन्द्रियं व्यापारवद् असाधारणं कारणं भवति। ( )

## ५. परस्परं मेलयत

| | |
|---|---|
| निर्विकल्पकम् | व्यापारवदसाधारणकारणम् |
| द्रव्यप्रत्यक्षे | विषयतात्रयशून्यं ज्ञानम् |
| करणम् | समवायसम्बन्धेन महत्त्वम् |
| गुणादिप्रत्यक्षे | स्वाश्रयसमवायसम्बन्धेन महत्त्वं हेतुः |

## ६. सन्धियुक्तपदच्छेदं कुरुत

चक्षुःसंयोगाद्यनन्तरम्, विशेषणतावच्छेदकप्रकारकम्, शब्देतरोद्भूतविशेषगुणः।

***परियोजनाकार्यम् -***

विशेषणविशेष्यतासंसर्गतेति विषयतात्रयं सोदाहरणमेकस्मिन् रेखाचित्रेण दर्शयत।

# लौकिकसन्निकर्षनिरूपणम्

**कारिका-** विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ॥ ५९ ॥
द्रव्येषु समवेतानां तथा तत्समवायतः।
तत्राऽपि समवेतानां शब्दस्य समवायतः ॥ ६० ॥
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः।
प्रत्यक्षं समवायस्य विशेषणतया भवेत् ॥ ६१ ॥
विशेषणतया तद्वदभावानां ग्रहो भवेत्।
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ॥ ६२ ॥

**अन्वयः-** विषयेन्द्रियसम्बन्धः व्यापारः, सः अपि षड्विधः। द्रव्यग्रहस्तु संयोगात्, संयुक्तसमवायतः द्रव्येषु समवेतानां, तथा तत्समवायतः तत्रापि समवेतानां, समवायतः शब्दस्य, समवेतसमवायेन तु तद्वृत्तीनां ग्रहः। विशेषणतया समवायस्य प्रत्यक्षं भवेत्, तद्वद् यत्र 'यदि स्याद् उपलभ्येत' इत्येवं प्रसज्यते तत्राभावानां ग्रहोऽपि विशेषणतया भवेत्।

**कारिकार्थः-** अनया कारिकया सोदाहरणं लौकिकाः षट् सन्निकर्षाः प्रदर्श्यन्ते = विषयोन्द्रियसम्बन्धः = घटपटादिविषयाणामिन्द्रियेण सह यः सम्बन्धः, स सन्निकर्ष इत्युच्यते, व्यापारः = तादृशसम्बन्ध एव व्यापारो भवति, सः = तादृशविषयेन्द्रियसम्बन्धोऽपि षड्विधः = षट्प्रकारकः, अर्थाल्लौकिकसन्निकर्षाः षड् भवन्तीत्यर्थः, तु = निश्चयेन, द्रव्यग्रहः = द्रव्यप्रत्यक्षम्, संयोगात् = संयोगनामकसन्निकर्षाज्जायते, द्रव्येषु = पृथिवीजलादिद्रव्येषु, समवेतानाम् = समवायेन वर्तमानानाम् जातिगुणादीनांग्रहः, संयुक्तसमवायतः = संयुक्तसमवायनामकसन्निकर्षात् भवति, तथा = तेनैव प्रकारेण, तत्र = गुणदिवृत्तिजातीनां रूपत्वादीनाम्, अपि, तत्समुवायात् = स्वसंयुक्तसमवेतसमवायाख्यात् सन्निकर्षात्, शब्दस्य = शब्दनामकस्य श्रोत्रेन्द्रियग्राह्यस्य गुणस्य प्रत्यक्षम्, समवायात् = समवायनामकसन्निकर्षाद् भवति, तद्वृत्तीनाम् = शब्दे वृत्तीनां शब्दत्वादीनाञ्चग्रहः = प्रत्यक्षं तुसमवेतसमवायेन = समवेतसमवायाख्येन सन्निकर्षेण, समवायस्य = समवायनामकस्य सम्बन्धविशेषस्य, प्रत्यक्षम् = साक्षात्कारः, विशेषणतया = विशेषणताख्यसन्निकर्षेणभवेत् = जायते, तद्वत् = तेनैव प्रकारेण, अभावानाम् =

घटपटाद्यभावानाम्विशेषणतया = विशेषणताख्यसन्निकर्षेण, प्रत्यक्षम् = इन्द्रियजन्यं ज्ञानं भवेत्, यदि स्यात् = यदि इदं वस्तु अत्र भवेत्, तर्हि उपलभ्येत् = प्रत्यक्षं प्राप्येत्, यत्र = यस्मिन् स्थले, प्रसज्यते = एतादृशी प्रसक्तिर्जायते नोपलभ्यते, अतस्तन्नास्तीति अनुभवानुरोधेन भूतलादौ तावदभावविषयकं प्रत्यक्षं विशेषणतासन्निकर्षेण विशेष्यताख्यसन्निकर्षेण वा भवतीति भावः।

इदानीं ग्रन्थकारः कारिकार्थं व्याख्याति-

**मुक्तावली- विषयेन्द्रियसम्बन्ध इति। व्यापारः- सन्निकर्षः। षड्विधं सन्निकर्षमुदाहरणाद्वारा प्रदर्शयति- द्रव्यग्रह इति। द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यम्। द्रव्यसमवेतप्रत्यक्षमिन्द्रियसंयुक्तसमवायजन्यम्। एवमग्रेऽपि। वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणं, द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः कारणं, द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः, एवमन्यत्राऽपि विशिष्यैव कार्यकारणभावः॥**

**व्याख्या-** कारिकास्थविषयेन्द्रियादिपदस्य निर्देशार्थं 'विषयेन्द्रियेति' उक्तम्। तत्र व्यापारो नाम सन्निकर्षविशेषः। नैयायिका इन्द्रियार्थसन्निकर्षजन्यबाह्यप्रत्यक्षं प्रति षड्विधान् लौकिकसन्निकर्षान् व्यापारत्वेन स्वीकृत्य प्रत्यक्षस्वरूपं व्यवस्थापयन्ति। ते च - १. संयोगः २. संयुक्तसमवायः ३. संयुक्तसमवेतसमवायः ४. समवायः ५. समवेतसमवायः ६. विशेषणविशेष्यभावश्च (विशेषणत्वम्, विशेष्यत्वञ्च) तदुदाहरणानि यथाक्रमं प्रदर्श्यन्ते।

तथा च - घटादिद्रव्यप्रत्यक्षं प्रतिसंयोगसन्निकर्षः कारणं भवति। अर्थात् संयोगसन्निकर्षद्वारा द्रव्यविषयकं प्रत्यक्षं जायते। यतो हि चक्षुरादीन्द्रियेण सह यथा घटादिद्रव्यस्य संयोगे सति घटादिविषयकं प्रत्यक्षं सम्भवति। तस्मादुक्तम्- द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यमिति। एतेन इन्द्रियार्थसंयोगस्य पृथिव्यादिद्रव्यविषयकप्रत्यक्षजनकत्वमित्यर्थः सिद्ध्यति (प्रतिपाद्यते)। तादृशप्रत्यक्षे च विषयेन्द्रियसंयोगसन्निकर्षो व्यापारः।

यतो हि द्रव्यसमवेतरूपादिप्रत्यक्षं प्रति इन्द्रियसंयुक्तसमवायसन्निकर्षः कारणम्। यतो हि घटे यन्नीलादिरूपविषयकं प्रत्यक्षं भवति तद्धि चक्षुरादीन्द्रियसंयुक्ते घटे समवेतम्। नीलादिरूपविषयकं प्रत्यक्षं चक्षुरिन्द्रियसंयुक्तसमवायजन्यम्। अतस्तथाविधं प्रत्यक्षं प्रति संयुक्तसमवायसन्निकर्षः कारणम्। तथैव द्रव्यसमवेता ये गुणास्तत्र समवेतं गुणत्वद्विषयकं प्रत्यक्षं प्रति इन्द्रियसंयुक्तसमवेतसमवायसन्निकर्षो हेतुः। शब्दविषयकप्रत्यक्षं प्रतिसमवायसन्निकर्षः कारणम्। शब्दत्वसाक्षात्कारं प्रति समवेतसमवायः। तथैव घटाभाववद्भूतलेघटाभावप्रत्यक्षे विशेषणताख्यसन्निकर्षः कारणं भवति। क्वचिद्विशेष्यताख्यसन्निकर्षश्च कारणं भवतीति यथायथं बोध्यम्। एतत्सर्वं कारिकार्थनिरूपणावसर एव प्रपञ्चितं वर्तते। वस्तुतस्तु इत्यादिना द्रव्यचाक्षुषप्रत्यक्षे सन्निकर्षाः सन्ति ते स्फुटीकृताः। विषयतासम्बन्धेन चक्षुरिन्द्रियजन्यद्रव्यविषयकप्रत्यक्षं प्रतिचक्षुःसंयोगः समवायेन कारणम्। अर्थाद् द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन प्रत्यक्षप्रकारकद्रव्यविशेष्यकं यत्प्रत्यक्षं जायते तदर्थं

चक्षुरिन्द्रियसंयोगः समवायेन कारणम्। अत्र कार्यतावच्छेदकसम्बन्धो द्रव्यवृत्तिलौकिकविषयत्वञ्चेत् कारणतावच्छेदकसम्बन्धः समवायः। यतो हि संयोगस्य गुणत्वात् स समवायेन विषयग्राहकेन्द्रिये विषये च वर्तते। तथैव विषयतासम्बन्धेन द्रव्यसमवेततद्गुणनिष्ठं यत्प्रत्यक्षं तादृशप्रत्यक्षं प्रतिचक्षुःसंयुक्तसमवायः स्वरूपसम्बन्धेन कारणम्। एवमेव द्रव्यसमवेतविषयतासम्बन्धेन द्रव्यसमवेतगुणादिसमवेतगुणत्वादिविषयकप्रत्यक्षं प्रति चक्षुःसं युक्तसमवेतसमवायाख्यसन्निकर्षः स्वरूपसम्बन्धेन कारणम्। अनया रीत्या स्पार्शनरासनादिप्रत्यक्षेष्वपि इमामेव प्रक्रियामवलम्ब्य कार्यकारणभावस्य निरूपणं प्रकाशनञ्च विधेयम्।

उक्तञ्च- एवमन्यत्रापि विशेष्यैव कार्यकारणभावः। अत्र कार्यकारणभावो नाम कार्यत्वं कारणत्वञ्च। एतादृशकार्यकारणतयोरेव प्रत्यक्षसन्निकर्षयोः कृते सम्बन्धश्च यथायथं बोध्यम्।

इदानीं महत्परिमाणस्योद्भूतरूपस्य च पृथक् पृथक् प्रत्यक्षं प्रति पृथक् कार्यकारणभावस्वीकारे गौरवो दोषस्तं प्रदर्शयन् तत्परिहारं करोति ग्रन्थकारः। प्रत्यक्षकारणे सन्निकर्षे महत्परिमाणस्य उद्भूतरूपस्य च निवेश्य लाघवं प्रदर्शयितुं ग्रन्थकारः शङ्कापक्षनिर्देशपूर्वकं प्रत्यक्षसन्निकर्षयोः कार्यकारणभावस्वरूपं च व्यवस्थापयति ग्रन्थेनानेन -

**मुक्तावली- परन्तु पृथिवीपरमाणुनीले नीलत्वम्, पृथिवीपरमाणौ पृथिवीत्वं च चक्षुषा कथं न गृह्यते ? तत्र परम्परयोद्भूतरूपसम्बन्धस्यमहत्त्वसम्बन्धस्य च सत्त्वात्। तथा हि नीलत्वजातिरेकैव घटनीले परमाणुनीले च वर्तते। तथा च महत्त्वसम्बन्धो घटनीलमादाय वर्तते। उद्भूतरूपसम्बन्धस्तूभयमादायैववर्तते। एवं पृथिवीत्वेऽपि घटादिकमादाय महत्त्वसम्बन्धो बोध्यः। एवं वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषप्रत्यक्षं स्यात्। तस्मादुद्भूतरूपावच्छिन्नम–हत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतचाक्षुषे, तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतचाक्षुषे कारणत्वं वाच्यम्। इत्थं च परमाणुनीलादौ न नीलत्वादिग्रहः, परमाणौ चक्षुःसंयोगस्य महत्त्वावच्छिन्नत्वाभावाद्। एवं वाय्वादौ न सत्तादिचाक्षुषं, तत्र चक्षुःसंयोगस्य रूपावच्छिन्नत्वाभावात्। एवं यत्र घटस्य पृष्ठावच्छेदेनाऽऽलोकसंयोगः चक्षुःसंयोगस्त्वग्रावच्छेदेन, तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे विशेषणं देयम्। एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणम्, द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः, द्रव्यसमवेतसमवतेस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः। अत्रापि मह त्त्वावच्छिन्नत्वमुद्भूतस्पर्शावच्छिन्नत्वं पूर्ववदेव बोध्यम्। एवं गन्धप्रत्यक्षे घ्राणसंयुक्तसमवायः, गन्धसमवेतस्य घ्राणजप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः। रासनप्रत्यक्षे रसनासंयुक्तसमवायः, रससमवेतरासनप्रत्यक्षे रसनासंयुक्तसमवेतसमवायः कारणम्। शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः, शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः कारणम्। अत्र सर्वं प्रत्यक्षं लौकिकं बोध्यम्। वक्ष्यमाणमलौकिकप्रत्यक्षमिन्द्रियसंयोगादिकं विनाऽपि सम्भवति।**

**व्याख्या -** परमाणोरतीन्द्रियत्वात् प्रत्यक्षं प्रति महत्परिमाणस्य कारणत्वात् तत्प्रत्यक्षं चक्षुषा न जायते इति नैयायिकानां मतम्। अत्र शङ्का जायते- प्रत्यक्षं प्रति उद्भूतरूपसम्बन्धो महत्परिमाणसम्बन्धश्च इति द्वावश्यकौ भवतः। तथा सति पृथिवीपरमाणौ समवायेन यन्नीलरूपं तत्र समवेता या नीलत्वजातिस्तस्या अपि प्रत्यक्षं स्याद्, एवमेव पृथिवीपरमाणौ समवायेन या पृथिवीत्वजातिस्तद्विषयकं प्रत्यक्षं मपि भवेद्। अर्थात् पार्थिवपरमाणुगतसमवेतसमवेतनीलत्वस्य च पृथिवीपरमाणुसमवेतपृथिवीत्वस्य च चक्षुरिन्द्रियेण प्रत्यक्षं भवतु इति पूर्वपक्षिणोऽभिप्रायः।

तत्कथमिति जिज्ञासायामुच्यते— चाक्षुषप्रत्यक्षकारण उद्भूतरूपस्य महत्परिमाणस्य च साक्षात्सम्बन्धेन तादृशनीलत्वे पृथिवीत्वे वा अभावेऽपि स्वसमवेतस्वाश्रयसमवेतसमवेतत्वसम्बन्धेन उद्भूतरूपस्य महत्परिमाणस्य च नीलत्वे (पृथिवीपरमाणुनिष्ठं यन्नीलं तद्गतनीलत्वजातौ) पृथिवीत्वे च वर्तमानत्वाच्चक्षुषा तादृशनीलत्वादेः पृथिवीत्वस्य च प्रत्यक्षं स्यादेव। यतो हि नीलत्वं जातिः, सा एकैव, अत एव नीलत्वजातिः समवायेन घटस्य नीलरूपे, परमाणोर्नीलरूपे च वर्तत एव। महत्परिमाणञ्च घटे समवायेन वर्तत एव। तथा च उक्तपरम्परासम्बन्धघटकस्वपदेन महत्परिमाणं गृह्यते, तदाश्रयो घटः, तत्समवेतं नीलरूपं तत्र समवायेन समवेता नीलत्वजातिः, तादृशसमवेतत्वं नीलत्वे अस्ति। महत्परिमाणस्य निरुक्तपरम्परासम्बन्धेन नीलत्वे वर्तमानत्वात् कारणसत्त्वेन पृथिवीपरमाणुगतनीले विद्यमानायाः नीलत्वजातेः प्रत्यक्षापत्तिः। तथैवोद्भूतरूपवत्त्वमपि सम्भवति। अत्रापि सम्बन्धघटकस्वपदेन उद्भूतरूपं (घटपटादिगतमुद्भूतरूपं) गृह्यते तदाश्रयो घटपटादिः, तत्समवेतं नीलरूपं तत्र समवेता नीलत्वजातिरितिस्वाश्रय-समवेत-समवेतत्वात्मकपरम्परासम्बन्धेनघटनीलगतनीलत्वे स्थूलपृथिवीगतपृथिवीत्वे वर्तते। अतो विषयतासम्बन्धेन नीलत्वजातिविषयकं प्रत्यक्षं न केनापि निराकर्तुं शक्यते। तत्रोद्भूतरूपसम्बन्धस्तु घटनीलघटगतस्थूलघटसमवेतनीलरूपं पृथिवीपरमाणुसमवेतनीलरूपञ्चेत्युभयमादाय स्वाश्रयसमवेतसमवेतत्वसम्बन्धेन वर्तते। अनया रीत्या पृथिवीपरमाणुगतनीलत्वविषयकं प्रत्यक्षं पृथिवीपरमाणुगतपृथिवीत्वविषयकं प्रत्यक्षञ्च सर्वथा सम्भवति, पूर्वोक्तपरम्परासम्बन्धेन उद्भूतरूपस्य महत्परिमाणवत्त्वस्य च सत्त्वात्, कारणसत्त्वे कार्यस्यावश्यं भावित्वादित्यर्थः।

एवमेव पूर्वोक्तप्रकारेणैव वायुद्रव्ये वर्तमानाया वायुत्वजातेर्वायुत्वात्मकसत्तायास्तद्गतो यो गुणस्तस्य च चक्षुरिन्द्रियजन्यं प्रत्यक्षं कथं न स्यात्? निरुक्तपरम्परासम्बन्धेन उद्भूतरूपस्य महत्परिमाणस्य च वायुत्वरूपसत्तायां वायुगतस्पर्शादौ सत्त्वात्, यदि कारणकलापो लभ्यते चेत् प्रत्यक्षात्मकेन कार्येण भाव्यम्। एतावता इन्द्रियैर्ग्रहीतुमशक्यानां विषयाणां चाक्षुषत्वापात्तिं पूर्वपक्षरुतया प्रदर्श्य तत्परिहाराय परिष्कृतं विशेषकार्यकारणभावस्वरूपमित्थं व्यवस्थापयति ग्रन्थकारः- तथा चविषयतासम्बन्धेन द्रव्यसमवेतचाक्षुषं प्रति उद्भूतरूपावच्छिन्नं महत्परिमाणावच्छिन्नं यच्चक्षुःसंयुक्तं द्रव्यं तत्समवायः कारणम्। एतादृशकार्यकारणभावस्वीकारे सति न पूर्वोक्तप्रत्यक्षापात्तिः सम्भवति।

अर्थाद् द्रव्यसमवेतचाक्षुषप्रत्यक्षात्मकं कार्यं प्रति उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायः कारणं भवति चेद् द्रव्यसमवेतचाक्षुषं प्रति कारणं स्वीक्रियते चेद्, द्रव्यसमवेतसमवेतचाक्षुषप्रत्यक्षं प्रति च उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवेतसमवायः कारणमिति। उक्तदोषपरिहाराय परिष्कृतं कार्यकारणभावस्वरूपं

स्वीक्रियते। तथा सति पृथिवीपरमाणौ यद्रूपं तदनुद्भूतरूपं वर्तते न तु उद्भूतरूपम्, तथैव पृथिवीपरमाणौ अणुपरिमाणं वर्तते न तु महत्परिमाणमिति। उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायात्मकस्य कारणस्य विरहात् पृथिवीपरमाणुगतं यन्नीलत्वं तद्विषयकं प्रत्यक्षं न भवितुमर्हति। कुतः ? इति कृतशङ्कायामुच्यते- परमाणौ चक्षुःसंयोगस्य महत्त्वावच्छिन्नत्वाभावाद्। अर्थाच्चक्षुःसंयोगे महत्परिमाणवत्त्वं नास्ति, पृथिवीपरमाणोरणुपरिमाणवत्त्वादिति।

तथैव वायुगता वायुत्वात्मिका सत्ता वायवीयस्पर्शश्च न चक्षुषा प्रत्यक्षीकर्तुं शक्यते, वायौ रूपाभावाद् रूपावच्छिन्नचक्षुःसंयोगात्मकं कारणमेव न लभ्यते।

पुनरत्र शिष्यस्य मनसि एका शङ्का समुदेति- अन्धकारे विद्यमानस्य घटादेः प्रत्यक्षं स्यात्, तत्कथमिति चेद् ? उद्भूत रूपावच्छिन्नमहत्परिमाणावच्छिन्नचक्षुःसंयोगात्मकस्य कारणस्य सत्त्वादित्युच्यते, तन्नोचितम्। यतो हि —

चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपवत्त्वं महत्परिमाणवत्त्वञ्च चक्षुःसंयोगे विशेषणत्वेनापेक्ष्यते तथैवालोकसंयोगोऽपि आवश्यकः। अन्धकारे विद्यमाने घटे विद्यमानस्य घटस्य पृष्ठदेशे नैव आलोकसंयोगो वर्तते, तत्र चक्षुःसंयोगस्तु अग्रदेशावच्छेदेनेति आलोकसंयोगावच्छिन्नचक्षुःसंयोगत्मकं कारणं नास्ति। अतस्तादृशस्थले चाक्षुषप्रत्यक्षत्वापत्तिवारणाय चक्षुःसंयोगे आलोकसंयोगावच्छिन्नत्वं विशेषणपदं निवेशनीयम्।

तथा सति चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपावच्छिन्नमहत्परिमाणावच्छिन्नआलोकसंयोगावच्छिन्नचक्षुःसंयोगः कारणम्। अत एव अन्धकारे विद्यमानस्य घटादेश्चाक्षुषप्रत्यक्षं न भवितुमर्हति आलोकसंयोगाभावादिति रीत्या कार्यकारणभावस्वीकारे पूर्वोक्ताः सर्वेऽपि दोषा निराकृता भवन्ति। तेन चक्षुःसंयोगस्यालोकसंयोगवत्त्वमपि सर्वथा आवश्यकमिदमनुभवानुरोधेन चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपम्, महत्परिमाणम्, आलोकसंयोगश्चेत्येते सर्वथा अपेक्षन्ते, एषु एकस्यापि विरहे न चाक्षुषं प्रत्यक्षं भवितुमर्हतीति संक्षेपेण चाक्षुषप्रत्यक्षकारणानि सोदाहरणं प्रतिपादितानीति।

चाक्षुषप्रत्यक्षानिरूपणानन्तरं प्रसङ्गसङ्गत्या क्रमप्राप्तस्य स्पार्शनादिप्रत्यक्षस्य सन्निकर्षात्मकानि कारणानि सोदाहरणं प्रस्तौति मुक्तावलीकारः-

**मुक्तावली- एवमात्मप्रत्यक्षे मन:संयोग:, आत्मसमवेतमानसप्रत्यक्षे मन:संयुक्तसमवाय:, आत्मसमवेतसमवेतमानसप्रत्यक्षे मन:संयुक्तसमवेतसमवाय: कारणम्। अभावप्रत्यक्षे समवायप्रत्यक्षे चेन्द्रियसम्बद्धविशेषणता हेतु:। वैशेषिकमते तु समवायो न प्रत्यक्ष:। अत्र यद्यपि विशेषणता नानाविध, तथा हि- भूतलादौघटाद्यभाव: संयुक्तविशेषणतया गृह्यते। सङ्ख्यादौ रूपाद्यभाव: संयुक्तसमवेतविशेषणतया, संङ्ख्यात्वादौ रूपाद्यभाव: संयुक्तसमवेतसमवेतविशेषणतया, शब्दाभाव: केवलश्रोत्रावच्छिन्नविशेषणतया, कादौ खत्वाद्यभाव: श्रोत्रावच्छिन्नसमवेतविशेषणविशेषणतया, एवं कत्वाद्यवच्छिन्नभावे**

गत्वाभावादिकं श्रोत्रावच्छिन्नविशेषणतया, घटाभावादौ पटाभावश्चक्षुःसंयुक्तविशेषणविशेषणतया। एवमन्यत्राऽप्यूह्यम्, तथाऽपि विशेषणतात्वेन एकैव सा गण्यतेऽन्यथा षोढा सन्निकर्ष इति प्राचां प्रवादो व्याहन्येतेति। यदि स्यादुपलभ्येत इति अत्राभावप्रत्यक्षे योग्यानुपलब्धिः कारणम्। तथा हि- भूतलादौ घटादिज्ञाने जाते घटाभावादिकं न ज्ञायत। तेनाभावोपलम्भे प्रतियोग्युपलम्भाभावः कारणम्। तत्रयोग्यताऽप्यपेक्षिता। सा च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपा, तदर्थश्च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसञ्जित उपलम्भरूपः प्रतियोगी यस्य सोऽभावप्रत्यक्षे हेतुः। तथाहि- यत्राऽलोकसंयोगादिकं वर्तते तत्र यद्यत्र घटः स्यात्तर्हि उपलभ्येतेत्यापादयितुं शक्यते। तत्र घटाभावादेः प्रत्यक्षं भवति अन्धकारे तु नापादयितुं शक्यते तेन घटाभावादेरन्धकारे न चाक्षुषप्रत्यक्षं स्पार्शनप्रत्यक्षन्तु भवत्येव।आलोकसंयोगादिकं विनाऽपि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात्। गुरुत्वादिकं यदयोग्यं तदभावस्तु न योग्यस्तत्र गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्यत्वाद्। वायावुद्भूतरूपाभावः, पाषाणे सौरभाभावः, गुडे तिक्ताभावः, वह्नावनुष्णत्वाभावः, श्रोत्रे शब्दाभावः, आत्मनि सुखाद्यभाव एवमादयस्तत्तदिन्द्रियैर्गृह्यन्ते तत्तत्प्रत्यक्षस्यापादयितुं शक्यत्वात्। संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता, अन्योन्याभावप्रत्यक्षेऽधिकरणयोग्यताऽपेक्षिता अतः स्तम्भादौ पिशाचादिभेदोऽपि चक्षुषा गृह्यत एव। एवं प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम्, तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षा वर्णिताः॥

**व्याख्या-** सोदाहरणं चाक्षुषप्रत्यक्षं निरूप्य क्रमप्राप्तं द्रव्यस्पार्शनप्रत्यक्षंविचार्यते। स्पर्शविषयकं प्रत्यक्षं त्वगिन्द्रियेण जायते। पृथिव्यादिद्रव्यस्य त्वचा शीतोष्णस्पशादिनिष्पादकं यत्प्रत्यक्षात्मकं ज्ञानं भवति तदेव द्रव्यस्पार्शनप्रत्यक्षमित्युच्यते। विषयतासम्बन्धेन तादृशस्पार्शनप्रत्यक्षं प्रति समवायेनत्वक्संयोगः कारणम्। अर्थात् त्वगिन्द्रियजन्यद्रव्यसमवेतशीतोष्णादिस्पर्शविषयकं प्रत्यक्षं प्रति समवायेन त्वक्संयोगाख्यसन्निकर्षः कारणम्।

तथैव घटादिद्रव्ये समवेतो यः शीतोष्णादिस्पर्शः, तत्र समवायेन वर्तमानं शीतोष्णादिस्पर्शत्वं (जातिः), विषयतासम्बन्धेन तादृशस्पर्शत्वजातिविषयकं स्पार्शनप्रत्यक्षं प्रतित्वक्संयुक्तसमवेतसमवायः कारणम्। तत्र संयुक्तो नाम संयोगाश्रयः। तथा च त्वगिन्द्रियेण संयुक्तं घटादिद्रव्यं तत्समवेत- (समवायेन वर्तमानः) शीतोष्णादिस्पर्शः, तत्र समवायश्च तादृशस्पर्शत्वाजातौ (जातिव्यक्त्योः समवायात्) वर्तत इति स्पर्शत्वादिजातिविषयकप्रत्यक्षं प्रति त्वगिन्द्रियसंयुक्तसमवेतसमवायाख्यसन्निकर्षः कारणमिति। बहिरिन्द्रियजन्यप्रत्यक्षमात्रं प्रति महत्परिमाणम्, उद्भूतस्पर्शश्चावश्यको भवति। अत्र पूर्वोक्तप्रक्रियामवलम्ब्य अतस्तावदत्रापि कारणकोटौ खलु 'महत्त्वावच्छिन्नत्वम् उद्भूतस्पर्शावच्छिन्नत्वञ्च विशेषणतया निवेशनीयम्। इत्थञ्चोद्भूतस्पर्शावच्छिन्नमहत्परिमाणावच्छिन्नत्वक्संयोगः, त्वक्संयुक्तसमवेतसमवायो वा कारणमिति यथायथं ज्ञेयम्।

एवमेव पृथिवीद्रव्ये वर्तमानो यो गन्धस्तद्विषयकं प्रत्यक्षं प्रति घ्राणेन्द्रियसंयुक्तसमवायाख्यसन्निकर्षः कारणम्। तद्यथा- घ्राणेन्द्रियेण संयुक्तं पार्थिवं द्रव्यं घटादिकम्, तत्र समवायेन गन्धो वर्ततेऽतो पार्थिवघटादिद्रव्यसमवेत गन्धविषयकं प्रत्यक्षं प्रति तादृशगन्धसमवेतगन्धत्वं प्रति घ्राणसंयुक्तसमवायाख्यः सन्निकर्षः कारणं भवति चेत्, तादृशगन्धसमवेतगन्धत्वविषयकं प्रत्यक्षञ्च प्रति घ्राणेन्द्रियसंयुक्तसमवेतसमवायाख्यः सन्निकर्षः कारणम्। तथैव रसनेन्द्रियजन्यमधुरादिरसविषयकप्रत्यक्षं प्रति रसनेन्द्रियसंयुक्तसमवायाख्यसन्निकर्षः कारणम्। रसे समवायेन वर्तमानं यद्रसत्वं तद्विषयकप्रत्यक्षं प्रतिरसनेन्द्रियसंयुक्तसमवेतसमवायाख्यसन्निकर्षो हि हेतुः। यतो हि अत्रापि पूर्ववद् रसनेन्द्रियस्य संयोगो जलेन सह वर्तते तत्र समवायेन मधुरादिरसो विद्यते, तादृशरसे च समवायेन रसत्वमिति रीत्या रसनिष्ठ-रसत्वजातिविषयकप्रत्यक्षं प्रति रसनेन्द्रियसंयुक्तसमवेतसमवायःकारणम्।

अनेनैव प्रकारेण शब्दविषयकसाक्षात्कारं प्रति श्रोत्रेन्द्रियावच्छिन्नसमवायाख्यसन्निकर्षः कारणम्। तत्र श्रोत्रं नाम कर्णशष्कुल्यावच्छिन्नमाकाशम्, तादृशाकाशे शब्दश्च समवायेन वर्तमानत्वात् तद्विषयकप्रत्यक्षं प्रति श्रोत्रावच्छिन्नसमवायस्य हेतुत्वं स्वीक्रियते चेत्, तादृशशब्दे समवेतं यच्छब्दत्वं वर्तते तद्विषयकसाक्षात्कारं प्रति श्रोत्रेन्द्रियावच्छिन्नसमवेतसमवायस्यहेतुत्वम्। एतत्सर्वं लौकिकसन्निकर्षद्वारा जायमानं प्रत्यक्षं प्रदर्शितम्। अर्थाल्लौकिकसन्निकर्षप्रत्यक्षयोः कार्यकारणभावं प्रदर्श्य सोदाहरणं लौकिकसन्निकर्षजन्यप्रत्यक्षं विवेचितम्।

तत्र नैयायिका वैशेषिकाश्च प्रत्यक्षं हिलौकिकालौकिकभेदेनप्रत्यक्षं द्विविधमिति प्रतिपादयन्ति। लोके भवं लौकिकमिति व्युत्पत्त्या लोकानुभवागम्यं प्रत्यक्षं लोकप्रसिद्धमिति चार्थः। अमुमेव विषयं स्पष्टयन्ति हि ग्रन्थकारः- अत्र सर्वं प्रत्यक्षं लौकिकं बोध्यम्। तादृशलौकिकभिन्नं यत्प्रत्यक्षं भवति तच्चालौकिकं प्रत्यक्षं पूर्वोक्तषड्विधलौकिकसंयोगसंयुक्तसमवायादिसन्निकर्षं विनैव सम्भवति। तत्सर्वमलौकिकसन्निकर्षनिरूपणावसरे स्फुटीभविष्यति।

## *पदानामर्थपरिचयः*

**सन्निकर्षः** = इन्द्रियविषययोः सम्बन्धो व्यापारविशेषः

**संयोगः** = द्रव्यप्रत्यक्षे कारणभूतः सम्बन्धः

**संयुक्तसमवायः** = द्रव्ये समवेतानां गुणादीनां प्रत्यक्षे कारणम्

**समवायः** = शब्दश्रावणप्रत्यक्षे कारणभूतः सम्बन्धः (श्रोत्रस्य आकाशात्मकत्वात्)

**विशेषणता** = अभावस्य तथा समवायस्य प्रत्यक्षे कारणभूतः सम्बन्धः

**योग्यानुपलब्धिः** = अभावप्रत्यक्षे अनिवार्यं कारणम् (यदि प्रतियोगी स्यात्तर्हि उपलभ्येत इति प्रसञ्जनम्)

**अभिभवः** = बलवता आवरणेन कस्यचित् ज्ञानस्य प्रतिबन्धः

## अभ्यासः

### १. षड्विधसन्निकर्षाणां समनस्केन अभ्यासं कुरुत ।

| क्रम | लौकिकसन्निकर्षस्य नाम | प्रत्यक्षविषयः (लक्ष्यम्) | उदाहरणम् |
|---|---|---|---|
| १ | **संयोगः** | द्रव्यम् | चक्षुषा घट-प्रत्यक्षम् |
| २ | **संयुक्त-समवायः** | द्रव्यगत-गुणाः/क्रियाः | घटरूपस्य प्रत्यक्षम् |
| ३ | **संयुक्त-समवेत-समवायः** | गुणगत-जातयः | घटरूपत्वजातेः प्रत्यक्षम् |
| ४ | **समवायः** | शब्दः | श्रोत्रेण शब्दप्रत्यक्षम् |
| ५ | **समवेत-समवायः** | शब्द-वृत्ति-जातिः | शब्दत्वजातेः प्रत्यक्षम् |
| ६ | **विशेषणता** | अभावः, समवायश्च | भूतले घटाभावः |

### २. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) प्रत्यक्षप्रमां प्रति व्यापारः कः ?

(ख) द्रव्यप्रत्यक्षे कः सन्निकर्षो हेतुर्भवति ?

(ग) अभावप्रत्यक्षे कः सन्निकर्षः ?

(घ) शब्दस्य श्रोत्रेण सह कः सम्बन्धोऽस्ति ?

(ङ) अन्धकारे घटाभावस्य चाक्षुषप्रत्यक्षं किमर्थं न भवति ?

(च) पिशाचभेदः (अन्योन्याभावः) स्तम्भे कथं गृह्यते ?

### ३. व्याख्यात्मकमुत्तरं लिखत

(क) केवलं चक्षुःसंयोगेन द्रव्यप्रत्यक्षं किमर्थं न सम्भवति ? "उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयोगः" इत्यस्याशयं स्फुटीकुरुत ।

(ख) "प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वम्" इति योग्यतायाः स्वरूपं स्पष्टयत ।

(ग) श्रोत्रेन्द्रियस्य स्वरूपं किं वर्तते ? शब्दतद्गतजात्योश्च प्रत्यक्षे द्विविधः सम्बन्धः कः ? निदर्शयत ।

## ४. विवेचनात्मकमुत्तरं लिखत

(क) अभावप्रत्यक्षे विशेषणतासन्निकर्षः "संयुक्तविशेषणतेत्यादिभेदेन नाना अस्ति, तथापि सा "एका" किमर्थं गण्यते ? तत्र युक्तिं लिखत।

(ख) संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता अपेक्षिता, परं अन्योन्याभावप्रत्यक्षे अधिकरणस्येति नियममिममादाय'स्तम्भे पिशाचभेदः' कथं गृह्यत इति विश्लेषयत।

## ५. परस्परं मेलयत

| | |
|---|---|
| घटप्रत्यक्षे | संयुक्तसमवेतसमवायः |
| घटरूपप्रत्यक्षे | इन्द्रियसम्बद्धविशेषणता |
| घटरूपत्वप्रत्यक्षे | चक्षुःसंयोगः |
| अभावप्रत्यक्षे | चक्षुःसंयुक्तसमवायः |

## ६. सन्धियुक्तपदच्छेदं कुरुत

विषयेन्द्रियसम्बन्धः, श्रोत्रावच्छिन्नसमवायः, योग्यानुपलब्धिः।

## ७. यदि समवायस्यप्रत्यक्षं न स्यात्तर्हि शब्दस्य प्रत्यक्षं कथं भवेत् ? मुक्तावल्युक्तरीत्या विमृशत।

# अलौकिकसन्निकर्षनिरूपणम्

एतावता लौकिकसन्निकर्षो वर्णितः, इदानीमलौकिकसन्निकर्षं वर्णयितुं प्रारभते ग्रन्थकारः--

**कारिका-** अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥ ६३ ॥
आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते।
तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥ ६४ ॥

**अन्वयः-** अलौकिकः व्यापारः तु त्रिविधः परिकीर्तितः, सामान्यलक्षणः, ज्ञानलक्षणः, तथा योगजः। आश्रयाणां सामान्यज्ञानम् तु आसत्तिः इष्यते। तदिन्द्रियजतद्धर्मबोधसामग्री अपेक्ष्यते।

**कारिकार्थः-** अलौकिकस्तु व्यापारः = अलौकिकसन्निकर्षस्तु, त्रिविधः = त्रिप्रकारक, परिकीर्तितः = कथितः। सामान्यलक्षणो = सामान्यलक्षणसन्निकर्षः, ज्ञानलक्षणो = ज्ञानलक्षणसन्निकर्षः, योगजस्तथा = योगजसन्निकर्षश्च (इति)। आश्रयाणां सामान्यज्ञानं तु = आश्रयाणां (पिण्डानां) यत् सामान्यज्ञानं तदत्र आसत्तिः = सन्निकर्षः, मन्यते। अत्र तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते = तदिन्द्रियजन्य-तद्धर्मविषयकज्ञानसामग्री अपेक्षिता भवति।

**मुक्तावली-** अलौकिकसन्निकर्षस्त्विदानीमुच्यते- अलौकिकस्त्विति। व्यापारः सन्निकर्षः। सामान्यलक्षण इति। सामान्यं लक्षणं यस्येत्यर्थः। तत्र लक्षणपदेन यदा स्वरूपमुच्यते तदा सामान्यस्वरूपा प्रत्यासत्तिरित्यर्थो लभ्यते। तच्चेन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं बोध्यम्। तथा- हि यत्रेन्द्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं यत्र जातं तत्र ज्ञाने धूमत्वं प्रकारः, तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवं रूपं सकलधूमविषयकं ज्ञानं जायते। अत्र यदीन्द्रियसम्बद्धप्रकारीभूतमित्येवोच्यते तदा धूलीपटले धूमत्वभ्रमानन्तरं सकसधूमविषयकं ज्ञानं न स्यात् तत्र धूमत्वेन सह इन्द्रियसम्बन्धाभावात्। मन्मते त्विन्द्रियसम्बद्धं धूलीपटलं, तद्विशेष्यकं धूम इति ज्ञानं, तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः। इन्द्रियसम्बन्धश्च लौकिको ग्राह्यः। इदं च बहिरिन्द्रियस्थले, मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिः ॥

परन्तु समानानां भावः सामान्यम्, तच्च क्वचिन्नित्यं धूमत्वादि, क्वचिच्चानित्यं घटादि। यत्रैको घटः संयोगेन भूतले समवायेन कपाले वा ज्ञातस्तदनन्तरं सर्वेषामेव तद्घटवतां भूतलादीनां कपालादीनां

**वा ज्ञानं भवति। तत्रेदं बोध्यम्- परन्तु सामान्यं येन सम्बन्धेन ज्ञायते तेन सम्बन्धेनाधिकरणानां प्रत्यासत्तिः किन्तु यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं तत्र सामान्यलक्षणया सर्वेषां तद्घटवतां भानं न स्यात्, सामान्यस्य तदानीमभावात्। किञ्चेन्द्रियसम्बद्धविशेष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने इन्द्रियसम्बन्धं विनाऽपि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्त्वात् तादृशज्ञानं कुतो न जन्यते ? तस्मात् सामान्यविषयकं ज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह - आसत्तिरिति। आसत्तिः- प्रत्यासत्तिरित्यर्थः। तथा च सामान्यलक्षण इत्यत्र लक्षणशब्दस्य विषयोऽर्थः। तस्मात् सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थो लभ्यते। ननु चक्षुःसंयोगादिकं विनाऽपि सामान्यज्ञानं यत्र वर्तते तत्र सकलघटादीनां चाक्षुषप्रत्यक्षं स्यादत आह- तदिति। अस्याऽर्थः- यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जननीयं तदा यत्किञ्चिद्धर्मिणि तत्सामान्यस्य तदिन्द्रियजन्यज्ञानस्य सामग्र्यपेक्षिता। सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकम्। तेनान्धकारादौ चक्षुरादिना तादृशं ज्ञानं न जायते ॥**

**व्याख्या-** "अलौकिकस्त्विति" प्रतीकमुपादाय ग्रन्थकारोऽलौकिकसन्निकर्षं व्याचष्टे। सामान्यमेव लक्षणं (स्वरूपं) यस्याः सा सामान्यलक्षणप्रत्यासत्तिः। अत्र कश्चन प्रश्नो भवति यत् किं सामान्यं (जातिः) स्वयमेव सन्निकर्षोऽस्ति उत तस्य ज्ञानम् ?

प्रथमं तावत् सामान्यमेव प्रत्यासत्तिरिति पक्षं विवृणोति। तत्र सामान्यं कीदृशं ग्राह्यम् ? 'इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं' सामान्यं प्रत्यासत्तिः। यथा- चक्षुषा इन्द्रियेण सह धूमस्य संयोगो वर्तते। तत्र "अयं धूमः" इति ज्ञानं जातम्। अस्मिन् ज्ञाने धूमो विशेष्योऽस्ति धूमत्वं च प्रकारः। अत्र धूमत्वं सामान्यम् इन्द्रियसम्बद्धे धूमे प्रकारभूतं सत् सकलधूमानामलौकिकप्रत्यक्षं जनयति।

अत्र 'इन्द्रियसम्बद्धविशेष्यक' इति निवेशस्य प्रयोजनं दर्शयति। यदि केवलं 'इन्द्रियसम्बद्धं सामान्यं' प्रत्यासत्तिरुच्येत तर्हि यत्र धूलीपटले धूमत्वभ्रमो जातस्तत्र सकलधूमभानं न स्याद्, यतो धूलीपटले वास्तवं धूमत्वं नास्ति (इन्द्रियसम्बद्धत्वं नास्ति)। परं मन्मते (नैयायिकमते) इन्द्रियसम्बद्धं धूलीपटलं वर्तते तद्विशेष्यकं च धूमत्वप्रकारकं ज्ञानं जातमतस्तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिर्भवति। इन्द्रियसम्बन्धश्च अत्र लौकिक एव ग्राह्यः।

ततः परं सामान्यस्य अनित्यत्वमपि दर्शयति। 'समानानां भावः सामान्यम्'। तच्च क्वचिद् नित्यं (जातिरूपं यथा धूमत्वम्) क्वचित् च अनित्यं (घटादिरूपम्)। यदा एको घटः संयोगेन भूतले दृश्यते तदा तद्घटत्वेन सम्बन्धेन सर्वेषां तद्घटवतां भूतलानां ज्ञानं भवति परमत्र दोषो वर्तते- यदि घटो नष्टः स्यात्, तर्हि तद्घटस्य स्मरणात् सकलतद्घटवद्भूतलानां भानं न स्याद्, यतो हि सामान्यं (घटः) तदानीं नष्टम्। अपि च- अतीतेन ज्ञानेन अद्यैव सकलज्ञानं कुतो न जायते ? अत एव सिद्धान्ती आह- "आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते"। अर्थात् सामान्यं स्वयं सन्निकर्षो नास्ति अपि तु सामान्यविषयकं ज्ञानमेव प्रत्यासत्तिरस्ति। एवं सति लक्षणशब्दस्य विषय इत्यर्थो भवति।

अन्तेऽतिप्रसङ्गभङ्गं करोति। यदि सामान्यज्ञानमेव सन्निकर्षस्तर्हि चक्षुःसंयोगं विनापि अन्धकारे सकलघटानां चाक्षुषं स्यात्। तत्राह- "तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते"। यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जननीयं भवति तदा तस्मिन् इन्द्रिये 'लौकिकसामग्री' (आलोकसंयोगादि) अपि अपेक्षिता। अन्धकारे चक्षुःसंयोगादिरूपसामग्र्या अभावात् तादृशमलौकिकं ज्ञानं न जायते।

**कारिका- विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः।**

**अन्वयः-** यस्य विषयी तस्यैव ज्ञानलक्षणः व्यापारः।

**कारिकार्थः-** यस्य = यस्य विषयस्य, विषयी = ज्ञानं (पूर्वज्ञानं), तस्यैव = तस्यैव (विषयस्य), व्यापारः = सन्निकर्षः, ज्ञानलक्षणः = ज्ञानलक्षणसन्निकर्षः (भवति)।

**मुक्तावली- ननु ज्ञानलक्षणा प्रत्यासत्तिर्यदि ज्ञानरूपा, सामान्यलक्षणाऽपि ज्ञानरूपा तदा तयोर्भेदो न स्यादत आह- विषयीति। सामान्यलक्षणाप्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति। ज्ञानलक्षणाप्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिः। अत्रायमर्थः- प्रत्यक्षे सन्निकर्षं विना भानं न सम्भवति, तथा च सामान्यलक्षणां विना धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च भानं कथं भवेत्? तदर्थं सामान्यलक्षणा स्वीक्रियते। न च सकलवह्निधूमभानाभावे का क्षतिरिति वाच्यम्। प्रत्यक्षधूमे वह्निसम्बन्धस्य गृहीतत्वादन्यधूमस्य चानुपस्थितत्वाद् धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः। मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसन्देहः सम्भवति। न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञापत्तिरिति वाच्यम्। प्रमेयत्वेन सकलप्रमेयज्ञाने जातेऽपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञ्याभावाद्। एवं ज्ञानलक्षणाया अस्वीकारे सुरभि चन्दनमिति ज्ञाने सौरभस्य भानं कथं स्याद्? यद्यपि सामान्यलक्षणयापि सौरभस्य भानं सम्भवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणया। एवं यत्र धूमत्वेन धूलीपटलं ज्ञातं तत्र धूलीपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया।**

**व्याख्या-** मुक्तावलीकार इदानीं सामान्यलक्षणाज्ञानलक्षणयोः परस्परं भेदं तथा तयोरावश्यकतामित्थं विवृणोति- ननु यदि उभयत्र ज्ञानमेव प्रत्यासत्तिः (सन्निकर्षः) तर्हि तयोर्भेदः कथं सिद्ध्यति? तत्राह- "विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः"। अयं भावः- सामान्यलक्षणाप्रत्यासत्तिः स्वविषयस्य (सामान्यस्य) आश्रयभूतानां व्यक्तीनां ज्ञानं जनयति। परं ज्ञानलक्षणाप्रत्यासत्तिस्तु यद्विषयकं ज्ञानं भवति तस्यैव विषयस्य प्रत्यक्षं जनयति।

अत्र सामान्यलक्षणाया आवश्यकतां प्रतिपादयति- प्रत्यक्षे सन्निकर्षं विना भानं न सम्भवति। यदि सामान्यलक्षणा न स्यात् तर्हि धूमत्वेन सकलधूमानां वह्नित्वेन च सकलवह्नीनां ज्ञानं कथं भवेद्? न च वाच्यं यत् सकलधूमानां

ज्ञानेन किं प्रयोजनमिति। यतो हि यदि सर्वदेशीयसर्वकालीयधूमानां ज्ञानं न भवेत् तर्हि व्याप्तिसंशय एव न घटेत। वर्तमानधूमे वह्निसम्बन्धो निश्चितोऽस्ति, अन्यानां धूमानां तु अनुपस्थितिरस्ति, अतो "धूमो वह्निव्याप्यो न वा" इति सन्देहः कथं स्यात् ? सामान्यलक्षणया तु निखिलधूमोपस्थितौ सत्यां कालान्तरीयदेशान्तरीयधूमेषु व्याप्तिसन्देहः सम्भवति।

अत्र कश्चन शङ्कते- यदि सामान्यलक्षणाऽङ्गीक्रियते तर्हि प्रमेयत्वसामान्येन सकलप्रमेयाणां ज्ञाने जाते पुरुषस्य 'सार्वज्ञ्यापत्तिः' (सर्वज्ञत्वं) भवेत्। तत्र समाधानं ददाति यत्- प्रमेयत्वेन रूपेण सकलपदार्थानां सामान्यज्ञानं जायते चेदपि एकैकस्य पदार्थस्य 'विशिष्य' (विशेषरूपेण) ज्ञानं न भवति। अतः सार्वज्ञ्यापत्तिर्न सम्भवति।

ततः परं ज्ञानलक्षणाया उपयोगं दर्शयति। ज्ञानलक्षणां विना "सुरभि चन्दनम्" इति प्रत्यक्षे सौरभस्य (गन्धस्य) भानं न स्यात्। यद्यपि सौरभत्वरूपसामान्येन सकलसौरभाणां भानं सामान्यलक्षणया सम्भवति तथापि प्रकृतचन्दननिष्ठस्य सौरभस्य प्रत्यक्षं तु ज्ञानलक्षणया एव भवति। अपि च- यत्र धूलीपटले धूमत्वभ्रमो जातस्तत्र धूलीपटलस्य अनुव्यवसाये (ज्ञानस्य ज्ञाने) भानमपि ज्ञानलक्षणया एव भवति।

**कारिका-** **योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ।। ६५ ।।**
**युक्तस्य सर्वदा भानं, चिन्तासहकृतोऽपरः ।**

**अन्वयः-** योगजः युक्तयुञ्जानभेदतः द्विविधः प्रोक्तः।

**कारिकार्थः-** योगजः = योगजसन्निकर्षः, युक्तयुञ्जानभेदतः = युक्त-युञ्जानभेदात्, द्विविधः = द्विप्रकारकः प्रोक्तः = कथितः। युक्तस्य = समाहितमनस्कस्य (सदा समाधिस्थस्य) योगिनः, सर्वदा = सर्वस्मिन् काले, भानम् = (निखिलपदार्थानां) प्रत्यक्षं भवति। अपरस्य = असमाहितमनस्कस्य अभ्यासरतस्य योगिनस्तु चिन्तासहकृतः = ध्यानधारणादिसहायेन विषयभाने समर्थो भवतीत्यर्थः।

**व्याख्या-** योगजः सन्निकर्षो द्विविधः प्रोक्तः- युक्तयुञ्जानभेदेन। अयं विभागो योगिनां सामर्थ्यभेदाद् भवति। योगजधर्मो नाम कश्चनालौकिको विशेषगुणो यो योगाभ्यासादिना आत्मनि उत्पद्यते। एष एव धर्मः सन्निकर्षरूपेण कार्यं करोति येन योगिनोऽतीतानागतविप्रकृष्टसूक्ष्मपदार्थानां प्रत्यक्षं कर्तुं शक्नुवन्ति।

तत्र प्रथमो युक्तयोगी। युक्तस्य योगिनः सर्वदा निखिलपदार्थानां भानं जायते। अस्यार्थोऽयमस्ति यद् यो योगी समाधौ सिद्धोऽस्ति तस्य ज्ञानं सदा भवति। तस्य कृते कस्यचित् पृथक् चिन्तनस्य मनःस्थैर्यस्य वा अपेक्षा न भवति। सः सर्वकालप्रसक्तेन योगजधर्मेणैव विश्वं करतलामलकवत् साक्षात्करोति।

द्वितीयस्तु युञ्जानः। 'अपरः' इति पदेनास्यैव सङ्ग्रहः कृतः। युञ्जान स योगी उच्यते योऽद्यापि योगाभ्यासपरोऽस्ति। अस्य योगिनः प्रत्यक्षं चिन्तासहकृतं भवति। अर्थाद् यदा स मनो योगे निदधाति, कञ्चन विषयं चिन्तयति च तदैव

तस्यालौकिकं प्रत्यक्षं भवति न तु सर्वदा। अस्मिन् प्रत्यक्षप्रक्रियायां योगजधर्मेण सह 'चिन्ता' (ध्यानात्मिका भावना) सहकारिणी भवति। अयं योगजसन्निकर्षो न केवलं पृथिव्यादिद्रव्याणां साक्षात्कारं जनयति अपि तु परमाणूनां, धर्माधर्मयोस्तथा आत्मनोऽपि प्रत्यक्षं साधयति, यत्सामान्यजनानां चक्षुरादिभिरिन्द्रियैरसम्भवं वर्तते।

**मुक्तावली- योगज इति। योगाभ्यासजनितो धर्मविशेषः श्रुतिपुराणादिप्रतिपाद्य इत्यर्थः। युक्तयुञ्जानरूपयोगिद्वैविध्याद्धर्मस्याऽपि द्वैविध्यमिति भावः। युक्तस्येति। युक्तस्य तावद्योगजधर्मसहायेन मनसा आकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति। द्वितीयस्य चिन्ताविशेषोऽपि सहकारीति॥**

**व्याख्या-** योगज इति। योगाभ्यासजनितः कश्चन विलक्षणो धर्मविशेषो योगजसन्निकर्ष इत्युच्यते। अयं धर्मो न केवलं तर्कसिद्धोऽपि तु 'श्रुतिपुराणादिप्रतिपाद्यः' (वेदेषु पुराणेषु च वर्णितः) अस्ति। यथा सामान्यजनानां लौकिकसन्निकर्षः ज्ञानं जनयति तथैव योगिनां कृतेऽयं योगजधर्म एव प्रत्यासत्तिः (सन्निकर्षः) भूत्वा ज्ञानं जनयति। अत्र युक्तयुञ्जानभेदेन योगिद्वैविध्यात् तज्जन्यधर्मस्यापि द्वैविध्यं बोध्यम्।

युक्तस्येति। अत्र योगिनां ज्ञानप्रक्रिया वर्णिता। यो युक्तः (नित्यसमाधिस्थ) योगी भवति तस्य ज्ञानं सर्वदैव भवितुमर्हति। स योगजधर्मसहायेन मनसा आकाशपरमाणुकालदिशादीनां निखिलपदार्थानां साक्षात् प्रत्यक्षं करोति। तस्य कृते कस्यापि बाह्येन्द्रियस्य लौकिकसन्निकर्षस्य वाऽपेक्षा न भवति। यतस्तस्य योगजधर्म एव सर्वविषयकज्ञानजनने समर्थोऽस्ति।

द्वितीयस्य अर्थाद् युञ्जानस्य (योगाभ्यासकुर्वाणस्य) योगिनः कृते केवलं योगजधर्मः पर्याप्तो न भवति। तत्र 'चिन्ताविशेषः' (एकाग्रतात्मिका भावना) अपि सहकारिकारणं भवति। यदा स युञ्जानो योगी कञ्चन विषयं ध्यायति तदैव तस्यालौकिकं प्रत्यक्षं जायते न तु सर्वदा।

### *पदानामर्थपरिचयः*

| | |
|---|---|
| **सामान्यलक्षणा** | = सामान्यमेव स्वरूपं यस्याः प्रत्यासत्तेः सा |
| **ज्ञानलक्षणा** | = ज्ञानमेव स्वरूपं यस्याः प्रत्यासत्तेः सा |
| **प्रत्यासत्तिः** | = सम्बन्धः |
| **योगजः** | = योगाभ्यासजनितः कश्चन धर्मविशेषः |
| **युक्तयोगी** | = यो नित्यसमाधौ सिद्धोऽस्ति, यस्य ज्ञानं सर्वदा भवति सः |
| **युञ्जानयोगी** | = यः योगाभ्यासे प्रवृत्तोऽस्ति, चिन्तिते सति यस्य ज्ञानं भवति सः |
| **व्याप्तिसंशयः** | = धूमो वह्निव्याप्यो न वा इति सन्देहः |

## अभ्यासः

### १. अलौकिकसन्निकर्षसारणीमुच्चैः पठत

| सन्निकर्षस्य नाम | स्वरूपम् | उदाहरणम् |
|---|---|---|
| **सामान्यलक्षणा** | सामान्यविषयकं ज्ञानम् | सकलधूमविषयकं ज्ञानम् |
| **ज्ञानलक्षणा** | प्रत्यक्षविषयकं पूर्वज्ञानम् | सुरभि चन्दनम् इति चक्षुषा गन्धभानम् |
| **योगजः** | योगाभ्यासजनितो धर्मः | परमाण्वाकाशादीनां साक्षात्कारः |

### २. अतिसङ्क्षिप्तमुत्तरं लिखत

(क) अलौकिकः सन्निकर्षः कतिविधः प्रोक्तः ?

(ख) "आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते" अत्र 'आसत्तिशब्दस्य कोऽर्थः ?

(ग) 'सुरभि चन्दनम्' इत्यत्र कोऽलौकिकः सन्निकर्षो वर्तते ?

(घ) योगजसन्निकर्षः कतिविधः ?

(ङ) कस्य योगिनो ज्ञानं सर्वदा भवति ?

(च) व्याप्तिग्रहाय कस्यालौकिकसन्निकर्षस्य आवश्यकता भवति ?

### ३. व्याख्यात्मकमुत्तरं लिखत

(क) सामान्यं स्वयं सन्निकर्षो नास्ति, अपि तु सामान्यविषयकं ज्ञानं प्रत्यासत्तिरिति मुक्तावलीकारस्य मतं स्पष्टयत।

(ख) "सुरभि चन्दनम्" इति प्रत्यक्षे चक्षुषा गन्धस्य भानं कथं सम्भवति ? प्रतिपादयत।

(ग) युक्तयुञ्जानयोगिनोः प्रत्यक्षप्रक्रियायां को मुख्यो भेदः ? निरूपयत।

## ४. विवेचनात्मकमुत्तरं लिखत

(क) "विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः" इति पङ्क्त्या द्वयोरलौकिकसन्निकर्षयोर्विषयगतं पार्थक्यं निरूपयत।

(ख) यदि प्रमेयत्वसामान्येन सकलप्रमेयाणां ज्ञानं सम्भवति तर्हि सामान्यजनः सर्वज्ञः किमर्थं न भवति ? तत्र ज्ञानयोर्भेदं विवृणुत।

(ग) तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते इति नियमस्यान्धकारे घटचाक्षुषप्रसङ्गे विश्लेषणं कुरुत।

(घ) अलौकिकज्ञानेऽपि लौकिकसामग्र्याः का भूमिका ? इति स्पष्टीकुरुत।

## ५. परस्परं मेलयत

| | |
|---|---|
| सामान्यलक्षणा | अतीतानागतविषयसाक्षात्कारः |
| ज्ञानलक्षणा | व्याप्तिग्रहे प्रयोजिका |
| योगजसन्निकर्षः | चन्दन-सौरभ-प्रत्यक्षम् |
| युक्तयोगी | चिन्तासहकृतप्रत्यक्षम् |
| युञ्जानयोगी | सर्वदा निखिलपदार्थभानम् |

## ६. सन्धियुक्तपदच्छेदं कुरुत

सामान्यलक्षणोऽलौकिकः, तदिन्द्रियजतद्धर्मबोधः, सर्वदैव भवितुमर्हति।

## ७. यदि सामान्यलक्षणा न स्यात्, तर्हि व्याप्तिनिश्चये का समस्या आपतेद् ? मुक्तावलीरीत्योत्तरं लिखत।

### *परियोजनाकार्यम्-*

लौकिकसन्निकर्षालौकिकसन्निकर्षयोरुपभेदानेकस्मिन् रेखाचित्रे दर्शयत।

**।। इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां न्यायसिद्धान्तमुक्तावल्यां प्रत्यक्षपरिच्छेदः ।।**

# परिशिष्टम्

## कारिकावली

नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।

तस्मै कृष्णाय नम: संसारमहीरुहस्य बीजाय ॥ १ ॥

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।

समवायस्तथाऽभाव: पदार्था: सप्त कीर्तिता: ॥ २ ॥

क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मन: ।

द्रव्याण्यथ गुणा रूपं रसो गन्धस्तत: परम् ॥ ३ ॥

स्पर्श: सङ्ख्या परिमिति: पृथक्त्वं च तत:परम् ।

संयोगश्च विभागश्च परत्वं चापरत्वकम् ॥ ४ ॥

बुद्धि: सुखं दु:खमिच्छा द्वेषो यत्नो गुरुत्वकम् ।

द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥ ५ ॥

उत्क्षेपणं ततोऽपक्षणमाकुञ्चनं तथा ।

प्रसारणं च गमनं कर्माण्येतानि पञ्च च ॥ ६ ॥

भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च ।

तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥ ७ ॥

सामान्यं द्विविधं प्रोक्तं परं चापरमेव च ।

द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥ ८ ॥

परभिन्ना च या जाति: सैवापरतयोच्यते ।

द्रव्यादित्रिकवृत्तिस्तु परापरतयोच्यते ॥ ९ ॥

व्यापकत्वात् पराऽपि स्याद् व्याप्यत्वादपराऽपि च ।

अन्त्यो नित्यद्रव्यवृत्तिर्विशेष: परिकीर्तित: ॥ १० ॥

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः।

तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः॥ ११॥

अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः।

प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च॥ १२॥

एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते।

सप्तानामपि साधर्म्यं ज्ञेत्वादिकमुच्यते॥ १३॥

द्रव्यादयः पञ्च भावा अनेके समवायिनः।

सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः॥ १४॥

सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः।

पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥ १५॥

अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता।

कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम्॥ १६॥

समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्।

एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम्॥ १७॥

यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत्।

तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात्॥ १८॥

येन सह पूर्वभावः, कारणमादाय वा यस्य।

अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम्॥ १९॥

जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते।

अतिरिक्तमिथापि यद्भवेन्नियतावाश्यकपूर्वभाविनः॥ २०॥

एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम्।

घटादौ दण्डरूपादि द्वितीयमपि दर्शितम्॥ २१॥

तृतीयं तु भवेद् व्योम कुलालजनकोऽपरः।

पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ॥ २२॥

समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्।

गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम्॥ २३॥

अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते।

क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता॥ २४॥

क्षितिर्जलं यथा तेज: पवनो मन एव च।

परापरत्वमूर्तत्वक्रियावेगाश्रया अमी॥ २५॥

कालखात्मदिशां सर्वगतत्वं परमं महत्।

क्षित्यादि पञ्च भूतानि चत्वारि स्पर्शवन्ति हि॥ २६॥

द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम्।

अव्याप्यवृत्ति: क्षणिको विशेषगुण इष्यते॥ २७॥

रूपद्रवत्वप्रत्यक्षयोगिन: प्रथमाश्रय:।

गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रव:॥ २८॥

आत्मानो भूतवर्गाश्च विशेषगुणयोगिन:।

यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत्॥ २९॥

स्पर्शादयोऽष्टौ वेगाख्य: संस्कारो मरुतो गुणा:।

स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणा:॥ ३०॥

स्पर्शादयोऽष्टौ वेगश्च गुरुत्वं च द्रवत्वकम्।

रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश॥ ३१॥

स्नेहहीना गन्धयुता: क्षितावेते चतुर्दश।

बुद्ध्यादिषट्कं सङ्ख्यादिपञ्चकं भावना तथा॥ ३२॥

धर्माधर्मौ गुणा एते ह्यात्मन: स्युश्चतुर्दश।

सङ्ख्यादिपञ्चकं कालदिशो: शब्दश्च ते च खे॥ ३३॥

सङ्ख्यादय: पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।

परापरत्वे सङ्ख्याद्या: पञ्च वेगश्च मानसे ॥ ३४ ॥

तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।

षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मत: ॥ ३५ ॥

स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकज: ।

नित्याऽनित्या च सा द्वेधा नित्या स्यादणुलक्षणा ॥ ३६ ॥

अनित्या तु तदन्या स्यात् सैवावयवयोगिनी ।

सा च त्रिधा भवेद् देहमिन्द्रियं विषयस्तथा ॥ ३७ ॥

योनिजादि भवेद् देहमिन्द्रियं घ्राणलक्षणम् ।

विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृत: ॥ ३८ ॥

वर्ण: शुक्लो रसस्पर्शौ जले मधुरशीतलौ ।

स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥ ३९ ॥

नित्यतादि प्रथमवत् किन्तु देहमयोनिजम् ।

इन्द्रियं रसनं सिन्धुर्हिमादिर्विषयो मत: ॥ ४० ॥

उष्ण: स्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम् ।

नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत् ॥ ४१ ॥

इन्द्रियं नयनं वह्नि: स्वर्णादिर्विषयो मत: ।

अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मत: ॥ ४२ ॥

तिर्यग्गमनवानेष ज्ञेय: स्पर्शालिलिङ्गक: ।

पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ॥ ४३ ॥

प्राणादिस्तु महावायुपर्यन्तो विषयो मत: ।

आकाशस्य तु विज्ञेय: शब्दो वैशेषिको गुण: ॥ ४४ ॥

इन्द्रियं तु भवेच्छ्रोत्रमेक: सन्नप्युपाधित: ।

जन्यानां जनक: कालो जगतामाश्रयो मत: ॥ ४५ ॥

परापरत्वधीहेतु: क्षणादि: स्यादुपाधित: ।

दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ॥ ४६ ॥

उपाधिभेदादेकाऽपि प्राच्यादिव्यपदेशभाक् ।

आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ॥ ४७ ॥

शरीरस्य न चैतन्यं मृतेषु व्यभिचारत: ।

तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृति: ॥ ४८ ॥

मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् ।

धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगत: ॥ ४९ ॥

प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथि: ।

अहंकारस्याश्रयोऽयं मनोमात्रस्य गोचर: ॥ ५० ॥

विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता ।

अनुभूति: स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ॥ ५१ ॥

प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ।

घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥ ५२ ॥

घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृत: ।

तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुते: ॥ ५३ ॥

उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये ।

विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम् ॥ ५४ ॥

क्रियां जातिं योग्यवृत्तिं समवायं च तादृशम् ।

गृह्णाति चक्षु: सम्बन्धादालोकोद्भूतरूपयो: ॥ ५५ ॥

उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः।

रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम्॥ ५६॥

द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम्।

मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः॥ ५७॥

ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते।

महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम्॥ ५८॥

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः।

द्रव्यग्रहस्तु संयोगात्, संयुक्तसमवायतः॥ ५९॥

द्रव्येषु समवेतानां, तथा तत्समवायतः।

तत्रापि समवेतानां, शब्दस्य समवायतः॥ ६०॥

तद्वृत्तीनां समवेतसमवायेन तु ग्रहः।

प्रत्यक्षं समवायस्य विशेषणतया भवेत्॥ ६१॥

विशेषणतया तद्वदभावानां ग्रहो भवेत्।

यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते॥ ६२॥

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः।

सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा॥ ६३॥


आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते।

तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते॥ ६४॥

विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः।

योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः॥ ६५॥

युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः।




नेपालसर्वकारः
शिक्षाखेलकुदमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्